TANTRIK TEXTS

EDITED BY
ARTHUR AVALON

VOL. II

POONA UNIVERSITY LIBRARY

*SH*A*T*CHAKRANIRŪPA*N*A
AND
PĀDUKĀPANCHAKA

EDITED BY
TĀRĀNĀTHA VIDYĀRATNA

CALCUTTA
SANSKRIT PRESS DEPOSITORY
30, CORNWALLIS STREET

LONDON
LUZAC & CO
46, GREAT RUSSEL STREET, W.C

1913

INTRODUCTION.

This volume commences with the *Shat*-chakra-nirūpa*n*a, of Pur*n*ānanda Svāmī which forms the sixth chapter of the hitherto unpublished work of that author entitled Shrītattva-chintāma*n*ī. The latter is a voluminous treatise in Twenty-five Chapters. The MSS. in the library of the Asiatic Society of Bengal covers some 400 pages of close writing on paper larger than foolscap.

The first Chapter deals with Tattvabodha; the Second with the necessity of and different modes of Dīk*sh*a; the Third Chapter gives directions regarding the selection of the place of Dīk*sh*a, Kūrmmachakra, Vāstuyāga and Vighnanāshaka Ma*nd*ala (danger destroying circle): also as to the appropriate sacrifices and Mantras of the Devatās to be worshipped in the Ma*nd*ala; the Fourth Chapter is devoted to the rules relating to the erection of the Ma*nd*apa; the Fifth Chapter speaks of the auxiliary Devatās and their places in Dīk*sh*a; and the rules relating to their Pūjā; of the kumbha (jar); of the metals to be used in its making and its size and shape.

The sixth chapter of it here published contains a description of the six centres, the so-called Mūlādhāra, Svādi*shth*āna, Ma*n*ipura, Anāhata, Vishuddha, and Ajnā Chakras or Lotuses (padma) a knowledge of which is essential for the understanding of the Yoga method dealt with in the Tantras. To this work there is a commentary, apparently written by Kālī-chara*n*a. Though there is no direct statement of such authorship yet the commentaries on the *Shat*-chakra and the Pādukā-panchaka are written in the same style, and under v. 43 of the *Shat*-chakra the Commentator says that he has made clear, the matter there referred to in the commentary (which was written by Kālīchara*n*a) on the Pādukā-panchaka-stotra (pādukā panchaka stotre spa*sht*ī-k*r*ītam). Kālīchara*n*a begins his commentary on

the Pādukāpanchaka by saying that it is composed by himself (Kālīcharaṇah prakāshayet). To the commentary of Kālīcharaṇa are added notes by the Commentator Shangkara, who appears to have used a text slightly different from that of Kālīcharaṇa. The variant readings have been here noted.

This work and its commentaries are followed by the Pādukā-panchaka with the commentary of Kālīcharaṇa already referred to. The latter is a careful commentator, who has dealt with his subject in a thorough manner but the difficulties of both the text and his commentary are such that the reader will be glad to avail himself of the notes from the third commentary here referred to, by Vishvanātha on the second Paṭala of the Kaivalya-kalikā Tantra, which, (though so far as I am aware not now available) dealt, in this portion of it with the same subject and much on the same lines as Pūrṇānanda's *Shaṭ*-chakra. Rather, it should be said that, as the Kaivalya-kalikā is held to have been an original Tantra, it is not unlikely that Pūrṇānanda was indebted to it for his own work. In some matters, Vishvanātha has explained things in his own way, simply and in a manner which goes straight to the point.

The Shaṭ-chakra contains fifty fives verses. To these is added another, here numbered 31 (1) and located at the end of the volume which though not noticed, by either Kālī-charaṇa or Shangkara, is given by Baladeva's text.

The work may be conveniently divided into eight sections, namely, (1) verses 1 to 3 which deal with the Nāḍīs, (2) verses 4 to 13 treating of the Mūlādhāra Padma, (3) verses 14 to 18, which deal with the Svādishṭhāna, (4) verses 19 to 21 with Maṇipūra, (5) verses 22 to 27 with Anāhata, (6) verses 28 to 31 with Vishuddha, (7) verses 32 to 38 with Ajnā, (8) verses 39 to 49 with the Sahasrāra, and (9) verses 50 to 54 with the passage of Kuṇḍalinī from the Mūlādhāra to Sāhasrāra piercing on her way thither the six chakras—a Tāntrika Yoga process known as *Shaṭ*-chakra-bheda or as some call it Bhūtashuddhi.

It is not necessary to deal further with the subject matter here, as I have, in preparation for publication, an English translation of the text now given. The *Shat*-chakra-nirupa*n*a and the Pādukā-panchaka with notes of Kalīchara*n*a were first published in Shakābda, 1778 (A. D. 1858) by the Suchāru Press, Cālcutta, under the editorship of the late Anandachandra Vedāntavāgīsha. This edition which is rare having been long out of print, has been used in the preparation of this volume. In 1276 (A.D. 1869) another edition of the *Shat*-chakra with the commentary of Rāmavallabha was published by Kālīdas Bhattācharyya, along with the Pādukā-panchaka and its commentary by Kālī-chara*n*a. Kālīprasanna Vidyāratna in 1294 (A.D. 1887) published the *Shat*-chakra together with a number of other books on Yoga. This edition of the *Shat*-chakra contained the commentary of Rāma-vallabha though it is not acknowledged as such by the editor. There have been several other cheap publications on Yoga which contain the *Shat*-chakra nirūpa*n*a. Some are provided with Bengali translations but none with notes. The commentaries of Vishvanātha and the notes from Shangkara are published for the first time.

CALCUTTA. ARTHUR AVALON.

January 1913.

षट्चक्रनिरूपणम्।

कालीचरणकृतया श्लोकार्थपरिष्कारिण्या टीकया शङ्करकृतया षट्-
चक्रभेदटिप्पन्या विश्वनाथकृतया षट्चक्रविवृत्याख्यया
टीकया च समेतम्।

पादुकापञ्चकम्।

कालीचरणकृतया अमलाख्यटीकया सहितम्।

श्रीआर्थारएवेलनेन प्रवर्त्तितं पर्य्यवेक्षितञ्च।

श्रीतारानाथविद्यारत्नेन सम्पादितम्।

कलिकातानगर्य्यां
संस्कृतयन्त्रे
श्रीउपेन्द्रनाथचक्रवर्त्तिना मुद्रितम्।

लण्डनराजधान्यां लुज्याक् एण्ड कों कर्त्तृकेण
प्रकाशितम्।

कलिकातानगर्य्यां ३० नं, कर्णओयालिसष्ट्रीटस्थसंस्कृतप्रेस-
डिपजिटरीभवने प्राप्तव्यम्।

खृः १९१३।

शुद्धिपत्रम् ।

अशुद्धम्	शुद्धम्	पृः—पं
सुपस्तिकेयम्	सुपुस्तिकेयम्	१–१४
नाटोपरि	नादोपरि	११–१८
पदे	पाठे	१२–१५
राकिनी	राकिणी	१३–११
सा देर्वा	सा देवी	१३–२२
कर्णिका	कर्णिका	१४–१६
निवास	विलास	१७–११
विद्यच्छ्रेणी	विद्युच्छ्रेणी	१८–२०
तरङ्गिनी	तरङ्गिणी	२०–१४
नानाद्बिन्दुः	नादाद्बिन्दुः	२२—९
अभिलषितं	अभिलसितं	२७—४
"	"	२७–२२
प्रकृष्टोद्दाम-मश्रियः	प्रकृष्टोद्दाम-श्रियः	३२–२४
पूर्णान्दुना	पूर्णेन्दुना	३७–२४
वृषमं	वृषभं	३९—६
विभूषित	विभूषितः	३९–१०
सुमुखसदने	सुसुखसदने	४८—१
अतिप्रयत्नः	अतिप्रयत्नतः	५५—६
भूलभूतात्	मूलभूतात्	५६—४
उम्मनी	उन्मनी	५८–२५
वज्राख्या-नाड़ीमाह	वज्राख्यां नाड़ीमाह	११२–१६
वैश्यानर	वैश्वानर	१२०–१९
शाकिन्यथ-ह्यापि	शाकिन्यथे-ह्यापि	१२२–१६
स मनोन्मनी	समनोन्मनी	१३१—९
दुःखजाल-सङ्कल	दुःखजाल-सङ्कुल	१४१—६

कै० कृष्णाजी गणेश लिमये
पुणें ४.
यांच्या ग्रंथसंग्रहांतून.

षट्चक्रनिरूपणम् ।

अथ तन्त्रानुसारेण षट्चक्रादिक्रमोद्गतः ।
उच्यते परमानन्दनिर्व्वाहप्रथमाङ्कुरः ॥ * ॥

॥ ॐ ॥

महायोगज्ञानात् परिचितषडम्भोजविभवः, स एवान्तस्तत्त्वप्रकटनसमर्थो न हि परः। बुधश्रेष्ठो ज्येष्ठोऽप्यमिलितकृपानाथककृणः, षडब्जान्तस्तत्त्वं षसहविभवं प्रस्फुटयितुम् ॥ अथ दुःखपङ्कमग्नं जगदुद्दिधीर्षुः परमकारुणिकः पूर्णानन्दस्वामी मुक्तिसम्पादकतत्त्वज्ञानसिद्धये षट्चक्रे कुण्डलिनीयोगं वक्तु-मिच्छन् साधकावधानाय प्रतिजानीते अथेति। अथानन्तरं स्वकृतश्रीतत्त्व-चिन्तामण्यां षट्चक्रनिरूपनात् पूर्व्वप्रदर्शिततत्तत्कर्म्मकथनानन्तरमित्यर्थः। अस्यार्थः परमानन्दनिर्व्वाहप्रथमाङ्कुरः उच्यते इत्यन्वयः। परमानन्दो ब्रह्म, "नित्यं विज्ञानमानन्दं ब्रह्म" इति श्रुतेः। तस्य निर्व्वाहस्तत्साक्षात्काररूप-

---

॥ ओं नमः परमदेवतायै ॥

प्रणम्य शैलाधिपकन्यकायाः, पदाब्जमब्जासनविष्णुपूज्यम् ।
प्रतन्यते श्रीयुतशङ्करेण, षट्चक्रटीकाख्यसुमक्तिकेयम् ॥

॥ * ॥ अथेत्यादि। यद्यप्यथशब्दो मङ्गलप्रश्नाद्यर्थे वर्त्तते, तथापि आनन्तर्य्यार्थ एव गृह्यते, यद्ग्रन्थीयप्रस्तावस्तत्प्रस्तावस्यानन्तरत्वात्। मङ्गलार्थोऽयमिति केचित्। तन्त्रानुसारेण शिवोक्ततन्त्रीयप्रस्तावानुसारेणेत्यर्थः। षट्चक्रादिक्रमेण उद्गतो योऽर्थ इत्यर्थः। अत्रादिपदेन सहस्रदलपद्मादिकमुच्यते। परमानन्दो निरञ्जनस्तस्मिन् यो निर्व्वाहो ज्ञानप्राप्तिस्तस्य प्रथमाङ्कुर इति यावत्।

मेरोर्व्वाह्यप्रदेशे शशिमिहिरशिरे सव्यदक्षे निषण्णे,
मध्ये नाड़ी सुषुम्ना त्रितयगुणमयी चन्द्रसूर्य्याग्निरूपा ।
धूस्तूरस्मेरपुष्पग्रथिततमवपुः कन्दमध्याच्छिरःस्था,
वज्राख्या मेढ्रदेशाच्छिरसि परिगता मध्यमे स्याज्ज्वलन्ती ॥ १ ॥

निष्पत्तिः तस्मै प्रथमाङ्कुरस्तत्कारणभूतप्रथमप्रकाशमानकर्म्मस्वरूपः मया पूर्णानन्देनोच्यते इत्यर्थः । सोऽङ्कुरः किम्भूतः ? तन्त्रानुसारेण षट्चक्रादिक्रमोद्गत इति तन्त्रानुसारेण तन्त्रमतेन षट्चक्रादीनां मूलाधार-स्वाधिष्ठान-मणिपूरकानाहत-विशुद्धाज्ञाख्यानाम् आदिना तत्सम्बन्धिनाडीलिङ्गव्योम-पञ्चकशिवशक्त्यादीनाञ्च यः क्रमः, तच्चिन्तनकुण्डलिन्युत्थापनब्रह्मपद्मगमना-गमनशिवशक्तिमेलनादिविधानानुपूर्व्विकरूपः क्रमः, तेन उद्गतः प्राप्तः योग-साधनाद्यभिन्नः इत्यर्थः । ततश्च तन्त्रविहितषट्चक्रघटितयोगसाधनाभिन्न-ब्रह्मसाक्षात्कारादिकारणीभूतकर्म्मस्वरूपोऽङ्कुरो मया उच्यते इति समुदाया-नुगततात्पर्य्यार्थः ॥ * ॥

अथ तादृशवक्ष्यमाणयोगः षट्चक्रनाड्योर्ज्ञानं विना न सम्भवतीत्यतः प्रथमं तदुपयुक्तनाड्यो निरूप्यन्ते मेरोरित्यादिविभिः श्लोकैः । मेरोर्मेरु-दण्डस्य स च दण्डो मूलावधिग्रीवापर्य्यन्तव्यापकपृष्ठास्थि इति स्फुटी-करिष्यामः । तद्बाह्यदेशे शशिमिहिरशिरे इति । शशी चन्द्रः, मिहिरः

---

(१) मेरोरिति—मेरोर्व्वहिःस्थाने शशिमिहिरशिरे इड़ापिङ्गलाख्ये स्तः इति । सव्यदक्षे वामदक्षिणयोः तत्र प्राण्यङ्गत्वात् समाहारः । निषण्णे लग्ने इति यावत् । मध्ये मेरोरिति सम्बन्ध-नीयम् । त्रितयगुणमयी सत्त्वरजस्तमोगुणमयी । त्रितय इति अवयवार्थे तयट् । यतश्चन्द्र-सूर्य्याग्निरूपा अतस्त्रितयगुणमयी । कन्दमध्यात् मूलाधारादिति यावत् । शिरःस्था शिरः-स्थिता । तदेव धूस्तूरपुष्पस्फुटितस्येव ग्रथिततमं प्रकृष्टं प्रसिद्धं वपुर्यस्याः । एतेन—उभयतो धूस्तूराकृतिर्द्विमुखीति फलितार्थः । अपरा चास्या मध्ये वज्रानाम्नी नाड़ी, सा तु मेढ्रदेशात् शिरसि परिणता सुषुम्नायाः किञ्चित् खर्व्वा सहस्रदलपङ्कजसुषुम्नास्ययोरुपर्य्यधोभावेन सम्पुट-त्वात् । ज्वलन्ती देदीप्यमाना ।

सूर्य्यः, शिरा नाड़ी ततश्च चन्द्रसूर्य्यस्वरूपिण्यौ द्वे नाड्यौ इड़ापिङ्गलाख्ये सव्यदक्षे वामदक्षिणे निषस्से स्थिते इत्यर्थः। तदाह भूतशुद्धितन्त्रे,—

मेरोर्व्वामे इड़ा दक्षे पिङ्गला च स्थिते उभे ॥ इति ॥

अनयोश्चन्द्रसूर्य्यस्वरूपत्वमाह सम्मोहनतन्त्रे—

वामगा या इड़ा नाड़ी शुक्ला चन्द्रस्वरूपिणी ।
शक्तिरूपा हि सा देवी साक्षादमृतविग्रहा ॥
दक्षे तु पिङ्गला नाम पुरुषा सूर्य्यविग्रहा ।
रौद्रात्मिका महादेवी दाड़िमीकेशरप्रभा ॥ इति ॥

इमे नाड्यौ मूलाद्दृजुरूपेणाज्ञाचक्रान्तं प्राप्य नासारन्ध्रगते ।

तदुक्तं यामले—

इड़ा च पिङ्गला चैव तस्य वामे च दक्षिणे ।
ऋज्व्वीभूते शिरे ते च वामदक्षिणभेदतः ।
सर्व्वपद्मानि संवेष्ट्य नासारन्ध्रगते शुभे ॥

अत्र "शिरे ते च" इत्यत्र "च"कारो "वा"र्थः, तेन सर्व्वपद्मानि संवेष्ट्य "वामदक्षिणभेदतः" वामदक्षिणभेदेन वेणीबन्धक्रमेण सर्व्वपद्मानि संवेष्ट्य वा नासारन्ध्रगते इत्यर्थः। एतेनानयोः स्थित्यां द्विविधः कल्पो दर्शितः। अन्यत्रानयोर्धनुराकारेण स्थितिरुक्ता। तद्यथा—

विद्धि ते धनुराकारे नाड़ीड़ापिङ्गले परे ॥ इति ॥

धनुराकारप्रकारमाह—

या वाममुष्कसम्बन्धा सा श्लिष्यन्ती सुषुम्नया ।
दक्षिणं जत्रुमाश्रित्य धनुर्व्वक्रा हृदि स्थिता ।
वामांशजत्र्वन्तरगा दक्षिणां नासिकामियात् ॥ इति ॥

जत्रु स्कन्धभुजयोः सन्धिः ।

तथा दक्षिणमुष्कोत्था नासाया वामरन्ध्रगा ॥ इति ॥

वामदक्षिणमुष्कोत्थिते ते भ्रूमध्यपर्य्यन्तं प्राप्य तत्र इड़ापिङ्गलासुषुम्नानाड़ीत्रयाणां त्रिवेणीरूपेण ग्रन्थिभावमापन्ने नासारन्ध्रमिलिते इत्यर्थः।

तदुक्तम्—इड़ायां यमुना देवी पिङ्गलायां सरस्वती ।
सुषुम्नायां वसेद्गङ्गा तासां योगस्त्रिधा भवेत् ॥
सङ्गता ध्वजमूले च विमुक्ता भ्रूवियोगतः ।
त्रिवेणीयोगः सा प्रोक्ता तत्र स्नानं महाफलम् ॥ इति ॥

मध्ये इति मेरुदण्डमध्यरन्ध्रे इत्यर्थः । तदुक्तं—
"मेरुमध्ये स्थिता या तु मूलादाब्रह्मरन्ध्रगे"त्यादि ।

तथा त्रिपुरासारसमुच्चये—"या मुण्डाधारदण्डान्तरविवरगते"त्यादि । अत्र यद्यपि—

मेरोर्व्वामे स्थिता नाड़ी इड़ा चन्द्रामृता शिवे ।
दक्षिणे सूर्य्यसंयुक्ता पिङ्गला नाम नामतः ।
तद्बाह्ये तु तयोर्मध्ये सुषुम्ना वह्निसंयुता ॥

इति तन्त्रचूड़ामणिवचने सुषुम्नाया मेरोर्व्वाह्यस्थितिः प्रतीयते, तथापि तद्वचनं मतभेदेन, ग्रन्थकारमते तु "सकलसरसिजान् मेरुमध्यान्तरस्थान्" इत्युत्तरश्लोके षट्पद्मानां मेरुमध्यरन्ध्रस्थत्वकथनेन तदाधारभूतायाः सुषुम्नाया मेरुमध्यरन्ध्रस्थत्वम् ।

चितयगुणमयीति त्रितयं गुणं सुषुम्ना वज्रा चित्रिणीति रूपभेदेन त्रिसूत्ररूपं तदात्मिकेत्यर्थः । अथवा त्रितयगुणं सुषुम्नादिनाड़ीत्रयमपेक्ष्य इयमेकैयमेकैयमेकैति त्रितयावर्त्तनं यत्र, सा त्रितयगुणा तन्मयीत्यर्थः । यद्वा त्रितयगुणाः सत्त्वरजस्तमोगुणा यस्यां तन्मयीत्यर्थः । ततश्च चित्रिणी सत्त्वगुणमयी, वज्रा रजोगुणमयी, सुषुम्ना तमोगुणमयीति । चन्द्रसूर्य्याग्निरूपेति । चित्रिणी चन्द्ररूपा, तेन शुक्लवर्णा, वज्रिणी सूर्य्यरूपा, तेन दाड़िमीकुसुमप्रभा, सुषुम्ना वह्निरूपिणी तेन रक्तवर्णा इति । एतत्त्रिविधव्याख्यानप्रमाणमाह सुषुम्नालक्षणमभिधाय भूतशुद्धौ—

तदन्तर्द्वादशाङ्गुल्योर्द्ध्वे तु वज्राख्या चित्रिणी तथा ।
अतः सुषुम्ना त्रिगुणा लसन्ती ललना यथा ॥
सत्त्वादित्रिगुणाधारा चन्द्रसूर्य्याग्निरूपिणी ॥ इति ॥

कन्दमध्याच्छिरःस्था इति कन्दः सर्व्वनाड़ीनां मूलं तल्लक्षणमाह।--

गुदात्तु द्व्यङ्गुलादूर्द्ध्वं मेढ्रात्तु द्व्यङ्गुलादधः।
चतुरङ्गुलविस्तारं कन्दमूलं खगाण्डवत्॥
नाड्यस्तस्मात् समुत्पन्नाः सहस्राणां द्विसप्ततिः॥ इति॥

तद्रूपकन्दमारभ्य शिरःस्था शिरःस्थिताधोमुखसहस्रदलकमलकर्णिकावर्त्ति-द्वादशदलपङ्कजाधःपर्य्यन्तस्थितेत्यर्थः। "कुण्डलीविवरकाण्डमण्डितं, द्वादशार्णसरसीरुहं भजे" इति गुरुपादुकास्तोत्रस्मरणात् कुण्डलीविवरकाण्डरूपायाश्चित्रिणीनाड्याः तदवधिकत्वे तदधिकरणसुषुम्नाया अपि तदवधिकत्वम्। अन्यथा सहस्रदलोर्द्ध्वपर्य्यन्तस्थायित्वे सहस्रदलपद्मस्य चत्वारिंशत्श्लोके "शून्यदेशे प्रकाशमि"त्यनेन शून्यदेशे स्थायित्वानुपपत्तेः। सुषुम्नावृतत्वे शून्यदेशत्वाभावात्। अत्र केचित्—"मेरोर्मध्यपृष्ठगतास्तिस्रो नाड्यः प्रकीर्त्तिता" इति निगमतत्त्वसारवचनं प्रमाणं दर्शयित्वा इड़ापिङ्गलासुषुम्नेति तिसृणां नाड़ीनां मेरुमध्यस्थितिं वदन्ति। तन्न इड़ापिङ्गलयोर्मेरुवहिःस्थितेः सर्व्वतन्त्रवचनसिद्धत्वात् ग्रन्थकारेणापि मेरोर्व्वाह्यप्रदेशे इत्यनेन तयोर्वहिःस्थितेः स्पष्टमुखेनाभिधानाच्च। किञ्च इड़ापिङ्गलयोर्मेरुमध्यस्थत्वे धनुराकारभङ्ग्या हृदयात् जतुसंलग्नत्वं न सम्भवति।

निगमतत्त्वसारवचने तिस्रो नाड्य इति सुषुम्ना वज्रा चित्रिणीति तिस्रः, न त्विड़ापिङ्गलयोस्तदन्तर्भावः। अत्र सुषुम्नाया मूलादिमस्तकपर्य्यन्तस्थितिप्रकारमाह—

सुषुम्ना चव्यवल्लीव मेरुश्लिष्टा पुरोगता।
ग्रीवान्तं प्राप्य गलिता तिर्य्यग्भूता वरानने।
शङ्खिनीनालमालम्ब्य गता सा ब्रह्मसादनम्॥ इति॥

तथान्यत्र—

चापाकारे स्थिते चान्ये सुषुम्ना प्रणवाकृतिः।
पृष्ठास्थिघुण्टितो भिन्ना तिर्य्यग्भूता ललाटगा।
भ्रूमध्ये कुण्डली लग्ना मुखेन ब्रह्मरन्ध्रगा॥ इति॥

गलिता मेरुदण्डान्निःसृता । तथा छुरिकेतो भिन्ना इत्यस्याप्ययमर्थः । एतेन मेरुदण्डस्य ग्रीवापर्य्यन्तस्थितिः प्रतीयते ।

शङ्खिनीनालमालम्ब्येति । शङ्खिनीलक्षणमाह ।

ईश्वर उवाच ।—

सरस्वती कुहुश्चैव सुषुम्नापार्श्वयोः स्थिते ।
गान्धारी हस्तिजिह्वा च इड़ायाः पूर्व्वपार्श्वयोः ॥

तथा—

गान्धारायाः सरस्वत्या मध्ये प्रोक्ता च शङ्खिनी ।
शङ्खिनी नाम सा नाड़ी सव्यकर्णान्तमिष्यते ॥

तथान्यत्र—

शङ्खिनी कण्ठविवरात् तिर्य्यग्भूता ललाटगा ।
चित्रिणीसङ्गताश्लिष्टा यावच्छिरसमम्बिके ॥ इति ॥

ततश्च सरस्वतीगान्धार्य्योर्म्मध्ये कन्दमूलमारभ्य कण्ठपर्य्यन्तं गता वक्रगत्या एकाग्रेण वामकर्णरन्ध्रमिलिता, अपराग्रेण मस्तकान्तं प्राप्तेति । अत्र केचित्—

पादादिब्रह्मरन्ध्रान्तं यदस्थि कीलकोपमम् ।
चतुर्द्दशानां लोकानां मेरुदण्डः प्रचक्षते ॥

इति निगमतत्त्वसारवचनं प्रमाणं दर्शयित्वा पदादिब्रह्मरन्ध्रपर्य्यन्तं मेरुदण्डस्य स्थितिमाहुस्तच्चिन्त्यम् । यः पृष्ठदण्डः स एव मेरुदण्डस्तस्य मूलकन्दादूर्द्ध्वावधि ग्रीवापर्य्यन्तस्थितेः प्रत्यक्षसिद्धत्वेन प्रत्यक्षसिद्धवस्तुनो वचनमन्यथा कर्त्तुं न शक्नोति । किञ्चाखण्डैकास्थ्नो मेरुदण्डस्य पादादिस्थितत्वे पादयोराकुञ्चनप्रसारणादिक्रिया न स्यात्, तस्मान्मूलोर्द्ध्वावधिरेव मेरुदण्डः । निगमतत्त्वसारवचनस्य त्वयमर्थः । पादादिब्रह्मरन्ध्रपर्य्यन्तं शरीरमधिकृत्य यदस्थि कीलकोपमं कीलकवद्द्वारकमिति मेढ्रदेशान्मूलकन्दाद्द्व्यङ्गुलोर्द्ध्वावधि । तदुक्तं भूतशुद्धौ—

तन्मध्ये द्व्यङ्गुलोर्द्ध्वे तु वज्राख्या चित्रिणी तथा ॥ इति ॥ १ ॥

तन्मध्ये चित्रिणी सा प्रणवविलसिता योगिनां योगगम्या,
लूतातन्तूपमेया सकलसरसिजान् मेरुमध्यान्तरस्थान्।
भित्त्वा देदीप्यते तद्ग्रथनरचनया शुद्धबोधस्वरूपा,
तन्मध्ये ब्रह्मनाड़ी हरमुखकुहरादादिदेवान्तसंस्था॥ २॥

तन्मध्ये इति वज्रामध्ये इत्यर्थः। प्रणवविलसिता आज्ञाचक्रावच्छेदे तन्मध्ये प्रणवप्रकाशेन प्रकृष्टोद्दीप्यमाना; अतएव ग्रन्थकारेण सप्तत्रिंशत्-श्लोके "तदनु च नवीनार्कबहुलप्रकाशं ज्योतिर्वा गगनधरणीमध्यमिलित-मि"त्युक्तम्। लूतातन्तूपमेया मर्कटसूत्रतुल्यसूक्ष्मा तद्ग्रथनरचनया भित्त्वा देदीप्यते इत्यर्थः। यत्तु—

चित्रिणीशून्यविवरे संजाताम्भोरुहाणि षट्।
तत् पत्रेषु महादेवी भुजङ्गी विहरन्ति च॥

इति कल्पसूत्रचतुर्थकाण्डीयवचनं तत् एकवचनान्तभुजङ्गीकर्त्त्रा वहुवच-नान्तविहरन्तिक्रियान्वयायोगादमूलम्। समूलत्वेऽपि तस्यायमर्थः—विहर-न्तीति शिवोक्तत्वात् एकवचनार्थे वहुवचनम्। चित्रिणीरन्ध्रविवरे इति कर-णार्थविषयाधारे सप्तमी। ततश्च भुजङ्गी कुण्डलिनी महादेवी चित्रिणीशून्ये चित्रिणीनाड्या मध्यरन्ध्रे यत् विवरम् इतस्ततो वहिर्गमनपथः, तेन पथा चक्रभेदक्रमेण षड़म्भोरुहाणि संजाता सम्प्राप्ता सती तत्पत्रेषु विहरति दीप्यते इत्यर्थः। यद्वा यानि षड़म्भोरुहानि सुषुम्नान्तराले विहरन्ति प्रकाशन्ते,

---

(२) तन्मध्ये इति। तन्मध्ये वज्रामध्ये चित्रिण्याख्यनाड़ी प्रसिद्धत्वेन विलसति। प्रणव इव विलसिता प्रदीप्ता। योगिनां योगगम्या (अतिसूक्ष्मत्वात्) अतएव लूतातन्तूपमेया। सकलसरसिजान् मूलाधारादीन्। मेरुमध्ये सुषुम्नावज्रानाड्यौ तयोरन्तरस्थान् मध्यस्थान्-भित्त्वा तेषां पद्मानां ग्रथनरचनया देदीप्यते भृशं दीप्तिं कुर्व्वतीत्यर्थः। एतस्या मध्यवर्त्तिनी ब्रह्मनाड़ी कन्दस्थहरमुखच्छिद्रात् परमशिवान्तरस्थिता मध्ये आश्रिता शुद्धबुद्धीनां बोधो ज्ञानं यस्याः।

विद्युन्मालाविलासा मुनिमनसि लसत्तन्तुरूपा सुसूक्ष्मा,
शुद्धज्ञानप्रबोधा सकलसुखमयी शुद्धबोधस्वभावा ।
ब्रह्मद्वारं तदास्ये प्रविलसति सुधाधारगम्यप्रदेशं,
ग्रन्थिस्थानं तदेतद्वदनमिति सुषुम्नाख्यनाड्या लपन्ति ॥ ३ ॥

भुजङ्गी चित्रिणीरन्ध्रविवरेण तत्पद्मेषु संजाता संस्थिता सती अनन्तरं सहस्रदले विहरतीति । न तु तद्वचनात् षट्पद्मानां चित्रिणीविवरे स्थितिः प्रतीयते । तन्मध्ये चित्रिणीमध्ये । ब्रह्मनाड़ीति अत्र नड़गताविति धातोर्नाड्यते गम्यतेऽनया पदव्या इति नाड़ी पदवी, ब्रह्मणो नाड़ीति व्युत्पत्त्या ब्रह्मनाड़ी ब्रह्मपदवी शब्दब्रह्मरूपायाः कुण्डलिन्याः परमशिवसन्निधिगमनपथरूपचित्रिणीनाड्यन्तर्गतशून्यभाग इति यावत् । न तु चित्रिणीमध्ये नाड्यन्तरमस्तीति निष्कर्षः । हरमुखकुहरात् स्वयम्भुलिङ्गच्छिद्रात् आदिदेवः सहस्रदलकमलकर्णिकामध्यस्थपरं विन्दुः अन्यत् सुगमम् ॥ २ ॥

श्लोकान्तरेण तां विशिषयति विद्युन्मालेति । लसत्तन्तुरूपेति । लसन्ती दीप्यमाना तन्तुरूपिणी अञ्जतन्तुसदृशी कुण्डलिनी यत्र सेत्यर्थः । सकलसुखमयी सर्व्वानन्दमयीत्यर्थः । शुद्धबोधस्वभावेति शुद्धबोधाय तत्त्वज्ञानाय स्वस्य आत्मनो भावो भावना यत्रेत्यर्थः । तदास्ये ब्रह्मनाड्याः आस्ये हरमुखकुहरे ब्रह्मद्वारं कुण्डलिन्याः शिवसन्निधिगमनाय प्रवेशनिर्गमपथरूपमित्यर्थः । सुधाधारगम्यप्रदेशमिति । सुधाधारः परमशिवशक्ति-

---

(३) विद्युन्मालेत्यादि । एतस्या ब्रह्मनाड्या एव विशेषणान्याह, विद्युन्मालेति । विद्युन्मालेव विलासः प्रकाशो यस्याः । मुनिमनसि प्रकाशस्वरूपालतन्तुरूपा अतः सूक्ष्मा । शुद्धज्ञानस्य प्रकाशो यस्याः । अतः कलासहितानां सुखमयी, यद्वा सर्व्वेषां सुखमयी शुद्धभाव एवात्मभावो यस्याः, यद्वा शुद्धभावानां स्वे परमात्मनि भावो ज्ञानं यत् सा तथा । तस्या मुखे ब्रह्मद्वारं प्रकाशते । अमृतस्य य आसारः शीकरस्तस्य गम्यप्रदेशो गमनप्रकृति यदास्यमिति यावत् । "प्रदेशस्थानमार्गयोः" इति त्रिकाण्डशेषः । तदेतद्वदनं सुषुम्नानाम नाड्या ग्रन्थिस्थानम् । सुधियो वदन्तीति तत् तया सहास्यलग्नं मिलनं तत्रैवेति ॥ [अत्रमते शुद्धभावस्वभावेति पाठः ।]

अथाधारपद्मं सुषुम्नास्यलग्नं
ध्वजाधो गुदोर्द्ध्वं चतुःशोणपत्रम्।
अधोवक्त्रमुद्यत्सुवर्णाभवर्णै-
र्वकारादिसान्तैर्युतं वेदवर्णैः ॥ ४ ॥

सामरस्यनिःसृतामृतधारो गम्यते मूलाधारस्थशिवशक्तिभ्यां लभ्यते येन द्वारेण तद्रूपप्रदेशमित्यर्थः। तदेतदिति तस्य द्वारस्य एतत्समीपवर्त्तिप्रदेशं सुषुम्नाया ग्रन्थिस्थानं कन्दसुषुम्नयोः सन्धिस्थानं सुषुम्नाया वदनञ्च इति लपन्ति आगमज्ञा वदन्ति इति समुदायार्थः ॥ ३ ॥ * ॥

नाड़ीं निरूप्य अङ्गप्रत्यङ्गादिसहितं मूलाधारचक्रं निरूप्यते अथाधारपद्ममिति नवभिः श्लोकैः। सुषुम्नास्यलग्नं चतुष्पार्श्वे कन्दसुषुम्नयोः सन्धिस्थानसंलग्नपत्रमित्यर्थः। ध्वजाधो गुदोर्द्ध्वं लिङ्गमूलादधोऽवधि सुषुम्नापर्य्यन्तं इत्यर्थः। चतुःशोणपत्रं रक्तवर्णचतुर्द्दलम्। वकारादिसान्तैः व श ष स इति वेदवर्णैर्युतम्। अत्र षट्चक्रेषु पद्मानां दलावच्छेदे दक्षिणावर्त्तेन वर्णयोगश्चिन्तनीयः। तदुक्तं विश्वसारतन्त्रे—

सर्व्ववर्णात्मकं पत्रं पद्मानां परिकीर्त्तितम्।
दक्षिणावर्त्तयोगेन लिखनं चिन्तयेद्धिया ॥ इति ॥ ४ ॥

---

(४) अथाधार इति। नाड़ीप्रस्तावनानन्तरं षट्पद्मानां यथाक्रमं सूलतः सङ्गतिः कथ्यते। अथाधारपद्मं वक्ष्ये इति सम्बन्धः। सुषुम्नाया आस्ये संलग्नं ध्वजाधो गुदशब्दोऽयं गुदस्योर्द्ध्वे अपानस्थाने तत्पद्मस्य अवस्थितिः। चतुःशोणपत्रं चत्वारि रक्ताकारपत्राणि यस्य। अधःस्थितं वक्त्रं कर्णिकादिर्यस्येति। उद्यत्सुवर्णस्य या आभा तस्या इव वर्णं यस्य। एवम्भूतैरन्तस्थीयवकाराद्यैर्दलैः सकारान्तैश्चतुर्व्वर्णैर्युतम्। एतेन एतद्वर्णोपलक्षितदलान्यस्य वक्ष्यमाणस्वदलान्तरालमध्यवर्त्ति तद्भूतवर्णत्वात् ॥

अमुष्मिन् धरायाश्चतुष्कोणचक्रं
समुद्भासि शूलाष्टकैरावृतं तत्।
लसत्पीतवर्णं तडित्कोमलाङ्गं
तदङ्के समास्ते धरायाः स्वबीजम् ॥ ५ ॥

अमुष्मिन् धरायाश्चतुष्कोणचक्रमिति। एतत्पद्मकर्णिकायां चतुष्कोणरूपं पृथ्वीमण्डलं समास्ते इत्यर्थः। मण्डलं विशेषयति समुद्भासीत्यादिना। तस्य मण्डलस्याष्टदिक्षु प्रकाशमानाष्टशूलैर्युक्तं एतन्मण्डलं पीतवर्णं, स्पष्टमाह।

मूलाधारे धराचक्रं चतुष्कोणं प्रियम्बदे।
पीतवर्णं परिवृतञ्चाष्टशूलैः कुलाचलैः ॥ इति ॥

शूलैः कीदृशैः कुलाचलैरिति कामिन्याः स्तनसदृशाग्रैरित्यर्थः।
यद्वा—कुलाचलैरिति।

नीलाचलं मन्दरञ्च पर्व्वतं चन्द्रशेखरम्।
हिमालयं सुवेलञ्च मलयञ्च सुपर्व्वतम्।
चतुष्कोणे वसेद्देवि एतत् सप्तकुलाचलम् ॥

इति निर्व्वाणतन्त्रवचनात् यथा पृथ्वीमध्ये सप्तकुलाचलास्तथात्राष्टशूलानि कुलाचलसदृशानि इति भावः। तदङ्के इति तस्य धरामण्डलस्य अङ्के मध्ये धरायाः स्वबीजं लकारः समास्ते। एतद्बीजमपि पीतवर्णं तद्यथा—

बीजं तन्मध्यतश्चैन्द्रं पीतवर्णं चतुर्भुजम्।
वज्रहस्तं महाबाहुमैरावतगजस्थितम् ॥ इति ॥

तेन लसत्पीतवर्णमित्युभयसम्बन्धः ॥ ५ ॥

(५) अमुष्मिन् इति। अमुष्मिन् पद्मे धरायाः पृथिव्याश्चतुष्कोणावच्छिन्नं चक्रं सम्यक्प्रकारेण उद्भासितुं शीलं येषां एवम्भूतैरष्टशूलैरावृतं तच्चक्रं इति श्रीमद्भगवद्भैरवीकलाविर्भूतडाकिन्यादिनिवासभूतत्वात्। पृथिव्यादिचक्राणां तत्वाधिष्ठितत्वाच्च मूलाधारादीनां चक्रसंज्ञा प्रतीयते। भैरवीचक्रसंस्थितिरित्यादि यामलवचनात्। कीदृशं लसत्पीतवर्णं यस्य। विद्युदिव अङ्गं यस्य तच्चक्रमध्ये पृथिव्याः स्वबीजमास्ते। सानुस्वारलकार इति ॥

चतुर्व्वाहुभूषं गजेन्द्राधिरूढं
तदङ्के नवीनार्कतुल्यप्रकाशः ।
शिशुः सृष्टिकारी लसद्वेदवाहु-
र्मुखाम्भोजलक्ष्मीश्चतुर्भागभेदः ॥ ६ ॥

धरावीजध्यानमाह चतुरित्यादि । यदेव धरावीजं तदेवैन्द्रवीजमित्य-विरुद्धम् ।

तदङ्के इति धरावीजस्याङ्के सृष्टिकारी ब्रह्मा वसेदित्यन्वयः । तदङ्के धरावीजस्य विन्दुमध्ये इति वोध्यम् ।

तदुक्तं—

मूलाधारे धरावीजं तद्विन्दौ ब्रह्मणः स्थितिः ।
तदङ्के शिशुरूपस्य गजारूढोऽमराधिपः ॥ इति ॥

शिशुरूपस्य ब्रह्मणः स्थितिरित्यन्वयः ।

तदङ्के धरावीजक्रोड़े अमराधिप इति तु मतान्तरम् ।

स्वमते धरावीजैन्द्रवीजयोरभेदात् "मन्त्राणां देवता प्रोक्ता देवता मन्त्र-रूपिणी" इति वचनाच्च तयोरभेदवर्णनम् ।

निर्व्वाणतन्त्रे—

ऐन्द्रवीजं वरारोहे लिङ्गस्य वामदेशके ।
सुसिद्धं ब्रह्मसदनं नादोपरि सुसुन्दरम् ।
तत्रैव निवसेद्ब्रह्मा सृष्टिकर्त्ता प्रजापतिः ॥ इति ॥

---

(६) चतुर्व्वाहुभूषमिति । वीजस्य विशेषणं चत्वारो वाहवो भूषा अलङ्कारा इव यस्य । गजेन्द्रं अधिरूढ़ं गत्यर्थाकर्म्मकेत्यादिसूत्रात् कर्त्तरि क्तः । तदङ्के तस्याङ्के वीजाकारमूर्त्तेरङ्के प्रातःकालीनसूर्य्यतुल्यदीप्तिः सृष्टिकारी शिशुर्विराजते । लसच्चत्वारो वाहवो यस्य । मुखाम्भोजलक्ष्मीश्चतुर्भागो वेदो यस्य अर्थात् चतुर्म्मुखविशिष्टब्रह्मा इत्यर्थः । [अन्यमते "चतुर्भागवेद" इति पाठः ।]

अत्र धरावीजस्योर्द्ध्वे नादोपरि ब्रह्मस्थितिकथने नादोर्द्ध्वे विन्दुमध्ये स्थितिरवगम्यते । लिङ्गस्य वामदेशके इति मतान्तरम् ।

अतएव सारदायां—

आधारांश्च विदुस्तत्र मतभेदादनेकधा । इत्युक्तम् ।

स किम्भूतः ? लसद्वेदवाहुरिति । अत्र केचित् ब्रह्मणो द्विभुजदर्शनेन लसद्वाहुवेदाः सामवेदादयो वाहौ यस्येति व्युत्पत्तिं कृत्वा तदेव संस्थापयन्ति । तत्र ब्रह्मणो हस्ताभ्यां वेदधारणस्य कुत्राप्यदर्शनात् । किन्त्वत्र ब्रह्मा चतुर्भुजत्वेनैव ध्येयः ।

तथा स्पष्टमाह भूतशुद्धौ—

तदङ्के च चतुर्व्वाहुं रक्तवर्णं शिशुं शिवे ।
चतुर्व्वक्त्रं हंसपृष्ठे ब्रह्माणं विद्धि पार्व्वति ॥ इति ॥

मुखाम्भोजलक्ष्मीश्चतुर्भागभेदः इति अस्य ब्रह्मणश्चतुर्भिर्भागैर्यो भेदः अवयवेषु विशेषः सैव मुखाम्भोजलक्ष्मीरित्यर्थात् ब्रह्मणश्चतुर्म्मुखत्वमायातम् । यद्वा—मुखे अम्भोजलक्ष्मीर्यस्य तथा चतुर्भिर्भागैः अर्थात् मुखावच्छेदे भेदो यस्येति विशेषणद्वयम् । "चतुर्भागवेद" इति पदे अभेदरूपेण पूर्व्वप्रकारार्थः । अत्र ब्रह्मणो हस्तेऽस्त्रानभिधानेऽपि—

दण्डकमण्डलुधरां अक्षसूत्राभयन्तथा ।
ध्यायेत्तां रक्तवर्णाञ्च ब्राह्मीं कृष्णाजिनोज्ज्वलाम् ॥

इति विश्वसारतन्त्रोक्तब्राह्मीध्याने ब्रह्मशक्तिहस्ते दण्डकमण्डल्वक्षसूत्राभयदर्शनादत्रापि तथा कल्प्यते "यस्य देवस्य यद्रूपं" इत्यादिना सप्तशतीस्तोत्रे शिवशक्त्योरैकात्म्यदर्शनात् इति वदन्ति ।

वस्तुतस्तु—

अभयवरदहस्तं कुण्डिकामक्षमालाम् ।
दधतममलभूषं चिन्तयेदादिमूर्त्तिम् ॥

इति यामलोक्तकर्म्मान्तरीयध्यानप्राप्ताभयवरादीनि ध्येयानि । स्पष्टमन्यत् ॥ ६ ॥

वसेदत्र देवी च डाकिन्यभिख्या
लसद्वेदबाहूज्ज्वला रक्तनेत्रा ।
समानोदितानेकसूर्य्यप्रकाशा
प्रकाशं वहन्ती सदा शुद्धबुद्धेः ॥ ७ ॥

आधारपद्मे डाकिनीशक्तिस्थितिमाह वसेदिति। अत्र पद्मे डाकिनी नाम्नी देवी वसेदित्यन्वयः। सा किम्भूता ? सदा सर्व्वस्मिन् काले शुद्धबुद्धेस्तत्त्वज्ञानस्य प्रकाशं वहन्ती तत्त्वज्ञानसम्पादयित्रीत्यर्थः। तथाच योगाङ्गत्वेनात्र तां ध्यात्वा तत्त्वज्ञानमाप्नोति इति भावः। इयं देवी चक्राधिष्ठात्री तदुक्तं—

वज्रं वशषसोपेतं डाकिन्या समधिष्ठितम् ॥ इति ॥

तथा—

डाकिनी राकिनी चैव लाकिनी काकिनी तथा ।
शाकिनी हाकिनी चैव क्रमात् षट्पङ्कजाधिपाः ॥ इति ॥

अस्या ध्यानविशेषमाहान्यत्र—

रक्ताचीं रक्तवर्णां पशुजनभयकृत् शूलखट्वाङ्गहस्तां
वामे खड्गं दधानां चषकमपि सुधापूरितं चैकवक्त्राम् ।
अत्युग्रामुग्रदंष्ट्रामरिकुलमथनीं पायसान्ने प्रसक्तां
मूलाधारेऽमृतार्थे परिप्लुतवपुषां डाकिनीं चिन्तयेत्ताम् ॥ इति ॥

तथा—

सिन्दूरतिलकोद्दीप्तामञ्जनाञ्चितलोचनाम् ।
कृष्णाम्बरपरीधानां नानाभरणभूषिताम् ॥

---

(७) वसेदत्रेति। अत्रैव चक्रे डाकिन्यभिख्या नाम यस्याः सा वसेत्। "अभिख्या नामशोभयोः" इत्यमरः। लसद्भिः प्रकाशद्भिश्चतुर्बाहुभिरुज्ज्वला रक्ताकारनेत्रा च सा देवी। समानोदितेति; एककालीनोदितानां अनेकसूर्य्याणामिव प्रकाश उदयो यस्याः सा तथा। सर्व्वदा शुद्धबुद्धीनां प्रकाशं वहन्ती परमार्थविषयीभूता सद्धर्मं विभावयन्ती तद्भावान्वितानां ज्ञानमेव ददातीत्यर्थः।

वज्राख्यावक्त्रदेशे विलसति सततं कर्णिकामध्यसंस्थं
कोणं तत् त्रैपुराख्यं तड़िदिव विलसत्कोमलं कामरूपम् ।
कन्दर्पो नाम वायुर्निवसति सततं तस्य मध्ये समन्तात्
जीवेशो बन्धुजीवप्रकरमभिहसन् कोटिसूर्य्यप्रकाशः ॥ ८ ॥

इत्यादि कर्म्मान्तरोक्तडाकिनीध्याने प्राप्ते कृष्णाम्बरं ध्येयमिति । अत्र ब्रह्मादीनां षट्चक्रस्थसकलदेवानां भावभेदेनोर्द्ध्वाधोवक्त्रेण स्थितिचिन्तनमाह शाक्तानन्दतरङ्गिणीधृतमायातन्त्रे—

पार्व्वत्युवाच ।

अधोवक्त्रस्थितिस्तत्र अधोभागे कथं भवेत् । इति प्रश्ने,

महादेव उवाच ।

तत्सर्व्वं पङ्कजं देवि सर्व्वतोमुखमेव च ।
प्रवृत्तिभावचिन्तायामधोवक्त्राणि चिन्तयेत् ।
निवृत्तिभावमार्गेषु सदैवोर्द्ध्वमुखानि च ॥ इति ॥

अन्यत् सुगमम् ॥ ७ ॥

मूलचक्रकर्णिकायां त्रिकोणं निरूप्यते वज्राख्यावक्त्रदेशे इति । सुषुम्नाया आस्यात् द्व्यङ्गुलोर्द्ध्वं लिङ्गमूलादधो वज्रावक्त्रम् । तत्तु मूलाधारकमलकर्णिकामध्यस्थगह्वरान्तर्व्वर्त्ति तत्र त्रिकोणं विलसति इत्यन्वयः । त्रिकोणं कीदृशं ? त्रैपुराख्यमिति । त्रिकोणगर्भस्थकामवीजघटककरमध्ये त्रिपुरसुन्दर्य्य-

---

(८) वज्राख्येति । अस्यैव पद्मस्य कर्णिकामध्यस्थं त्रैपुराख्यं त्रिपुरासम्बन्धीयं त्रैपुरं तदेवाख्या नाम यस्य । चतुष्कोणं वज्राख्यनाड्याः समदेशे प्रकाशते । सर्व्वदैव विद्युदिव प्रकाशते कोमलं कामरूपपीठम् । यद्वा भक्ताभिलाषस्वरूपं तस्य कोणस्य मध्ये समन्ताच्चतुर्दिक्षु सर्व्वदैव कन्दर्पो नाम वायुर्विलसति काम एव वायुभूतोऽत्रास्ति इति गुरुचरणाः । तेनैव हेतुना जीवात्मनाविर्भवतीति आह जीवेश इति । किम्भूतः ? वन्धूकपुष्पसमूहं अत्यर्थं उपहसन्निव । ततोऽप्यत्यर्थरक्ताकारः अतो वायुः रूपवानित्यादि सांख्यसिद्धान्तमपि सङ्गच्छते । पुनः कीदृशः ? कोटिसूर्य्याणां इव प्रकाशो दीप्तिर्यस्येति ।

धिष्ठानात् त्रैपुराख्यमिति तात्पर्य्यम् । तदुक्तं शाक्तानन्दतरङ्गिण्यां ककार-तत्त्वकथनमुपक्रम्य—

तेषां मध्ये स्थिता देवी सुन्दरी परदेवता । इति ।

कोमलं सुस्निग्धम् । तथा कामरूपं कामं निरूप्यतेऽनुभूयते येन तादृशं मदनागारात्मकमित्यर्थः । अतएव—

त्रिकोणं तत्तु विज्ञेयं शक्तिपीठं मनोहरम् । इत्युक्तम् ।

एतत् त्रिकोणं धरावीजस्योर्द्धे तदुक्तं सम्मोहने धरावीजमधिकृत्य—

रामा[1] ज्येष्ठा तथा रौद्री त्रिरेखा च तदूर्द्धतः । इति ।

तत्त्रिकोणमध्ये कन्दर्पवायुस्थितिमाह कन्दर्प इति । समन्तात् त्रिकोण-व्यापकरूपिणीत्यर्थः । जीवेश इति अस्य जीवधारकत्वाज्जीवेश इत्युक्तम् । तथा हि—

कन्ददेशे वसेत् प्राणो ह्यपानो गुदमण्डले ।

इत्यादिवचने गुदमण्डलस्थवायोरपानत्वाभिधानात्[2] तादृशगुदमण्डलस्थ-कन्दर्पवायोरप्यपानांशः । ततश्च—

अपानः कर्षति प्राणं प्राणोऽपानञ्च कर्षति ।
रज्जुबद्धो यथा श्येनो गतोऽप्याकृष्यते पुनः ।
तथा चैतौ विषम्वादे सम्वादे सन्त्यजेदिमम् ॥ इति ॥

विषम्वादे परस्परवैपरीत्यगमने एतौ प्राणापानवायू तथा कर्षाकर्षिणौ सम्वादे अविरोधिगमने इमं देहं सन्त्यजेदित्यर्थकतद्वचने कन्दर्पावान्तरनामकापान-वायोः प्राणाकर्षकत्वेन देहधारणत्वाज्जीवधारकत्वं प्रतीयते अतो जीवेश इत्युक्तिरिति भावः । अतएव ग्रन्थकृता दशमश्लोके "श्वासोच्छ्वासविभञ्जनेन जगतां जीवो यया धार्य्यते" इत्यनेन श्वासोच्छ्वासरूपयोः प्राणापानयोर्जीव-धारकत्वं स्वयमेवोक्तम् । स्पष्टमन्यत् ॥ ८ ॥

---

१ । "रामा" इत्यत्र "वामा" इति पाठान्तरम् ।
२ । "अपानत्वविधानात्" इति वा पाठः ।

तन्मध्ये लिङ्गरूपी द्रुतकनककलाकोमलः पश्चिमास्यो
ज्ञानध्यानप्रकाशः प्रथमकिशलयाकाररूपः स्वयम्भुः ।
विद्युत्पूर्णेन्दुबिम्बप्रकरकरचयस्निग्धसन्तानहासी
काशीवासी विलासी विलसति सरिदावर्त्तरूपप्रकारः ॥ ८ ॥

त्रिकोणमध्ये स्वयम्भुलिङ्गस्थितिमाह तन्मध्य इति । त्रिकोणमध्ये लिङ्गरूपी स्वयम्भुः स्वयम्भुनामकशिवलिङ्गं विलसतीत्यन्वयः । द्रुतकनककलाकोमलः तप्तकाञ्चनावयव इव स्निग्धभाव इत्यर्थः । पश्चिमास्योऽधोमुखः तदुक्तं कालीकुलामृते—

तत्र स्थितो महालिङ्गः स्वयम्भुः सर्व्वदा सुखी ।
अधोमुखः क्रियावांश्च कामबीजेन चालितः ॥ इति ॥

ज्ञानध्यानप्रकाश इति ज्ञानध्यानाभ्यां प्रकाशो यस्य तादृश इत्यर्थः । तथा च ज्ञानेन निर्गुणरूपप्रकाशः ध्यानेन सगुणरूपप्रकाशो यस्य स एवायं स्वयम्भुरिति भावः ।

दृष्टान्तेन विशेषयति प्रथमकिशलयाकाररूप इति अचिरोत्पन्नपल्लवाङ्कुरवत् आकाररूपं यस्य तेन स्थूलमूलात् सूक्ष्माग्रपर्य्यन्तं चम्पककुसुममध्यस्थितशलाकावदुन्नतः श्यामवर्णश्चेत्यर्थः । तदुक्तं शाक्तानन्दतरङ्गिण्याम्—

स्वयम्भुलिङ्गं तन्मध्ये सरन्ध्रं पश्चिमाननम् ।
ध्यायेच्च परमेशानि शिवं श्यामलसुन्दरम् ॥ इति ॥

---

(८) तन्मध्ये इति । तत्कोणस्य किञ्चित् उपरि लिङ्गरूपी स्वयम्भुः भावरूपेण तिष्ठति । कीदृशः ? द्रुता या कनककला वह्निश्लथीभूता तस्या इव कोमलः । पश्चिमास्योऽधोमुखः । ज्ञानध्यानाख्ययोगाभ्यां प्रकाश उदयो यस्य । नवीनपल्लवाकारस्येव रूपं यस्य । विद्युत्पूर्णेन्दुबिम्बसमूहानां करदन्दस्निग्धसमूहस्येव हास्य इव सविशेषो यस्य । तत्स्थानमपि विलसितुं शीलं अस्य सरिदावर्त्तरूपप्रकार आकृतिर्यस्य अतिचञ्चलत्वात् एवम्भूतः सन् विलसति ॥

यत्तु—

मूलाधारे स्मरेद्दिव्यं त्रिकोणमतिसुन्दरम् ।
तस्यास्त्रिरेखामानीय अधऊर्द्धव्यवस्थिताम् ।
नीलतोयदमध्यस्थां तड़िल्कोटिसमप्रभाम् ॥

इति यामलवचने कुण्डलिन्या नीलतोयदमध्यस्थविशेषणेन स्वयम्भुलिङ्गस्य नीलवर्णत्वमायातं तन्नीलश्यामयोरेकपर्य्यायत्वान्न विरुद्धम् ।

विद्युत्पूर्णेन्दुविम्बप्रकरकरचयस्निग्धसन्तानहासीति। विद्युत्पूर्णचन्द्रविम्बयोर्यः प्रकृष्टकरः उत्तापरहितकिरणः तत्तुल्यकिरणसमूहेन मृदुप्रवाहविशिष्टप्रकाशोऽस्यास्तीत्यर्थः । काशीवासी विलासीति अत्र काशीवासतुल्यवासविशिष्टः सन् विलासीत्यर्थः तेन यथा काशीवासे सुखं भुनक्ति तद्वदत्रापीति भावः । अथवा निवास उल्लासः कामप्रफुल्लभाव इति यावत् तद्विशिष्ट इत्यर्थः । "कामवीजेन चालित" इति वचनात् अयं स्वयम्भुः काशीवासी एतेनास्य विश्वेश्वरत्वं सूचितं इति । सरिदावर्त्तरूपप्रकार इति सरिदावर्त्तो यद्रूपस्तत्प्रकारः ततश्च यथा भ्राम्यमाणनदीजले मध्यनिम्नस्तन्मध्ये किञ्चिदुन्नतं शङ्कमध्योन्नतवदिति भावः । अयं स्वयम्भुः कामवीजोपरिस्थितः तदाह कालीकुलामृते—

किञ्जल्कोपरि शृङ्गाटः सरन्ध्रः सुमनोहरः ।
तत्र स्थितो महालिङ्गः स्वयम्भुः सर्व्वदा सुखी ।
अधोमुखः क्रियावांश्च कामवीजेन चालितः ॥ इति ।

तथान्यत्र—

पूर्व्वोक्ता डाकिनी तत्र कर्णिकायां त्रिकोणकम् ।
यन्मध्ये विवरं सूक्ष्मं रक्ताभं कामवीजकम् ।
तत्र स्वयम्भुलिङ्गञ्चाधोमुखालक्तकप्रभम् ॥

इति मतान्तरम् ॥ ८ ॥

तस्योर्द्ध्वे विसतन्तुसोदरलसत्सूक्ष्मा जगन्मोहिनी
ब्रह्मद्वारमुखं मुखेन मधुरं संछादयन्ती स्वयम् ।
शङ्खावर्त्तनिभा नवीनचपलामालाविलासास्पदा
सुप्ता सर्पसमा शिवोपरि लसत्सार्द्धत्रिवृत्ताकृतिः ॥ १० ॥
कूजन्ती कुलकुण्डली च मधुरं मत्तालिमालास्फुटं
वाचः कोमलकाव्यबन्धरचनाभेदातिभेदक्रमैः ।
श्वासोच्छ्वासविभञ्जनेन जगतां जीवो यया धार्य्यते
सा मूलाम्बुजगह्वरे विलसति प्रोद्दामदीप्तावलिः ॥ ११ ॥

स्वयम्भुलिङ्गे कुण्डलिनीशक्तिस्थितिमाह तस्योर्द्ध्वे इति द्वाभ्याम् । अनयोरर्थः । यद्वा कुण्डलिन्या श्वासोच्छ्वासविभञ्जनेन प्रवर्त्तनेन जगतां जीवो जीवात्मा धार्य्यते देहावच्छेदे स्थाप्यते सा देवी मत्तालिमालास्फुटं यथा स्यात्तथाकृतिः एवं वक्ष्यमाणक्रमैर्व्वाचम् अर्थात् जनयन्ती सती अम्बुजगह्वरे मूलाधारकमलकर्णिकामध्यत्रिकोणगह्वरे तस्य स्वयम्भुलिङ्गस्योर्द्ध्वभागे विलसतीति श्लोकद्वयस्य विशिष्टान्वितार्थः । विसतन्तुसोदरलसत्सूक्ष्मा मृणालसूत्रतुल्यसूक्ष्मा इत्यर्थः । जगन्मोहिनी जगतां मायारूपिणीत्यर्थः ।

---

(१०) तस्योर्द्ध्वे इति । तस्य शिवस्य ऊर्द्ध्वेऽध इत्यर्थः । मृणालतन्तुसदृशी शरीरकला यस्याः एवम्भूता सा कूजन्ती कुलकुण्डलिनीति वक्ष्यमाणश्लोकेनान्वयः । यतः विसतन्तुसदृशी अतः सूक्ष्मा जगतां मोहिनी महामायारूपिणेत्यर्थः । ब्रह्मद्वारमुखं मुखेन मुखकमलेन स्वयमेव सञ्छादयन्ती सम्यक्प्रकारेणाच्छादयन्तीत्यर्थः । एतेन अमृतवर्त्मसञ्छादनं कृत्वा अमृतं पिवतीत्यर्थः । अतः तदमृतसंयोगेन तन्मुखं मधुरं शङ्खस्य वेष्टनाकारतुल्या । नवीनविद्युच्छ्रेणीप्रकाश एव स्थानं यस्यास्तत्सदृशीति यावत् । सुप्ता अतः सर्पतुल्या सर्पो हि सुप्ता कुण्डलाकारो भवति । शिवस्योपरि लसत् प्रकाशत् सार्द्धत्रिवृत्त आकृतिः शरीरं यस्याः ।

(११) कूजन्तीति । सा कुण्डलिनी मधुरं यथा स्यात्तथा शब्दं कुर्व्वतीत्यर्थः । एतेन लब्धध्वन्यात्मकशब्दो भवति । तत्र स एव शब्दः कण्ठताल्वाद्यभिघातेन वर्णात्मकत्वेन परिगण्यते इत्याह

ब्रह्मद्वारमुखं स्वयम्भुलिङ्गच्छिद्रं मधुरं मृदु यथा स्यात्तथा स्वमुखेन संछादयति इत्यर्थः । नवीनचपलामालाविलासास्पदेति सर्व्वेषां नवीनत्वे प्रकाशाधिक्यदर्शनादत्र नवीनोत्कीर्त्तनमधिकप्रकाशप्राप्त्यर्थम् । ततश्चातिप्रकाशितविद्युन्मालानां विलासस्य स्थिरतरकौतूहलवासस्यास्पद इत्यर्थात् स्थिरतरातिप्रकाशितविद्युत्समूहप्रकाशतुल्यप्रकाशितवतीति पर्य्यवसितम् ।

वाक्यजननक्रममाह कोमलकाव्यबन्धरचनाभेदातिभेदक्रमैरिति । कोमलकाव्यं मृदुशब्दघटितरूपगुणरसादिवर्णनात्मकवाक्यम् । बन्धः पद्मबन्धाश्वबन्धादिचित्रकाव्यम् । रचना तदतिरिक्तगद्यपद्यात्मकवाक्यम् । भेदस्तेषां विशेषः । अतिभेदस्तदितरसंस्कृतप्राकृतवाक्यसमुदायः । तयोर्यः क्रमः शास्त्रव्यवहारानुरूपरीतिः । तादृशीभीरीतिभिर्व्वाचं जनयन्तीति परिष्कृतार्थः । कुण्डलिन्याः संस्कृतप्राकृतविशेषाविशेषयावद्वाक्यजनयित्रीत्वात् । तदाह सारदायाम्—

> भिद्यमानात् पराद्बिन्दोरव्यक्तात्मा रवोऽभवत् ।
> तत्राप्य कुण्डलीरूपं प्राणिनां देहमध्यगम् ।
> वर्णात्मनाविर्भवति गद्यपद्यादिभेदतः ॥ इति ॥

गद्यपद्यादीत्यादिपदात् यावद्वाक्यं गृह्यते ।

व्यक्तमाह कादिमते—

> स्वात्मेच्छाशक्तिघातेन प्राणवायुस्वरूपतः ।
> मूलाधारे समुत्पन्नः पराख्यो नाद उत्तमः ॥
> स एव चोर्द्ध्वतां नीतः स्वाधिष्ठानविजृम्भितः ।
> पश्यन्त्याख्यामवाप्नोति तथैवोर्द्ध्वं शनैः शनैः ॥
> अनाहते बुद्धितत्त्वसमेतो मध्यमोऽभिधः ।
> तथा तयोर्द्ध्वगतो विशुद्धौ कण्ठदेशतः ॥

कोमलकाव्यबन्धग्रथनाया यो भेदो नानाप्रबन्धः गौड़ी वैदर्भी पाञ्चाली कवितारीतिक्रमः तस्य भेदस्य शृङ्गारादिवररसबन्धेन योऽतिभेदस्तत्क्रमैः । मत्तभृङ्गमालेव स्फुटं यथा स्यात्तथा वाचस्य कूजन्ती तस्य एव वैखरीत्वम् आयातमिति । यया देव्या च श्वासोच्छ्वासविभञ्जनेन जगतां जीवो धार्य्यते सा मूलाधारपद्मकुहरे प्रकाशते । प्रोद्दामदीप्तावलिर्यस्याः दीप्तमिति भावे क्तः ॥

वैखर्य्याख्यस्ततः कण्ठशीर्षताल्वोष्ठदन्तगः ।
जिह्वामूलाग्रपृष्ठस्थस्तथा नासाग्रतः क्रमात् ॥
कण्ठताल्वोष्ठकण्ठस्थः कण्ठोष्ठद्वयतस्तथा ।
समुत्पन्नान्यक्षराणि क्रमादादिक्षकावधि ॥ इति ॥

अलं विस्तरेण । कुण्डलिनीध्यानान्तरमाह अन्यत्र—

ध्यायेत् कुण्डलिनीं देवीं स्वयम्भुलिङ्गवेष्टिनीम् ।
श्यामां सूक्ष्मां सृष्टिरूपां सृष्टिस्थितिलयात्मिकाम् ।
विश्वातीतां ज्ञानरूपां चिन्तयेदूर्ध्ववाहिनीम् ॥

तथा—

ध्यायेत् कुण्डलिनीं देवीमिष्टदेवस्वरूपिणीम् ।
सदा षोड़शवर्षीयां पीनोन्नतपयोधराम् ।
नवयौवनसम्पन्नां सर्व्वाभरणभूषिताम् ।
पूर्णचन्द्रप्रभां रक्तां सदा चञ्चललोचनाम् ॥ इति ॥

रक्तामिति सुन्दरीविषये ज्ञेयमिति शाक्तानन्दतरङ्गिनीकारः । वस्तुतस्तु सर्व्वदेवताविषये एव कुण्डलिनी रक्तवर्णत्वेन ध्येया न तु श्यामवर्णत्वेन प्रायः सर्व्वतन्त्रे सर्व्वसंग्रहे च कुण्डलिन्यास्तड़िदाकारत्वकथनात् ।

श्यामामित्यनेन—

शीतकाले भवेदुष्णा चोष्णकाले च शीतला ।
प्रतप्तकाञ्चनाभासा श्यामा स्त्री परिकीर्त्तिता ॥

इत्येतद्वचनात्तत्त्वं ज्ञापितम् । न तु श्यामवर्णत्वमतः सर्व्वशास्त्रसामञ्जस्यमिति । चक्रभेदनात् पूर्व्वं ब्रह्मद्वारमध्ये कुण्डलीध्यानमाह कङ्कालमालिन्याम्—

कोटिचन्द्रप्रतीकाशां परंब्रह्मस्वरूपिणीम् ।
चतुर्भुजां त्रिनेत्राञ्च वराभयकरान्तथा ॥
तथा पुस्तकवीणाञ्च धारिणीं सिंहवाहिनीम् ।
गच्छन्तीं स्वासनं भीमां नानारूपधरात्मिकाम् ॥ इति ॥१०-११ ॥

तन्मध्ये परमा कलातिकुशला सूक्ष्मातिसूक्ष्मापरा
नित्यानन्दपरम्परातिविगलत्पीयूषधाराधरा।
ब्रह्माण्डादिकटाहमेव सकलं यद्भासया भासते
सेयं श्रीपरमेश्वरी विजयते नित्यप्रबोधोदया॥ १२॥

स्वयम्भुलिङ्गवेष्टितकुण्डलिन्यूर्द्ध्वे समसूत्रपातन्यायेन दण्डाकारेण लिङ्गाग्रपर्य्यन्तस्थितां परशक्तिमाह तन्मध्ये इति। अस्यार्थः यद्भासया यस्याः शक्त्या दीप्त्या ब्रह्माण्डादि तत्कटाहश्च भासते प्रकाशते सेयं श्रीपरमेश्वरी तन्मध्ये स्वयम्भुलिङ्गे कुण्डलिनीवेष्टनोर्द्ध्वे विजयते सर्व्वान् वशवर्त्तिनः कृत्वा तिष्ठतीत्यर्थः। सा किम्भूता? परमा अघटनघटनपटीयसी माया कलानादशक्तिरूपा कुण्डलिन्यभेदशरीरिणी। तदुक्तं शाक्तानन्दतरङ्गिण्याम्—

कला कुण्डलिनी सैव नादशक्तिः शिवोदिता।

तथान्यत्र—

तस्योपरि मनो ध्यायेत् चित्कलां ई-समाश्रिताम्।
प्रदीपकलिकाकारां कुण्डल्यभेदरूपिणीम्॥ इति॥

तथा कालिकाश्रुतौ—

तस्याः शिखाया मध्ये तु अध ऊर्द्ध्वव्यवस्थिताम्।
स ब्रह्मा स शिवः शूरः स एव परमेश्वरः॥
स एव विष्णुः स प्राणः स कालाग्निः स चन्द्रमाः।
इति कुण्डलिनीं ध्यात्वा सर्व्वपापैः प्रमुच्यते॥ इति॥

---

(१२) तन्मध्ये इति। तस्याः कुण्डलिन्या मध्ये परमा कला आस्ते परं परमात्मानं मीयते अनया इति परमा। अत्यर्थं कुशलं यतः सातिकुशला। सूक्ष्मा यतस्तस्या मध्ये परा पश्यन्ती, मध्यमा वैखरी समाधिरूपा नित्यं आनन्दपरम्परा यस्याः सा तथा। अत्यर्थविद्युन्मालेव लसत् प्रकाशत् दीधितिस्तेजो यस्याः ब्रह्माण्डस्य आदिकटाहपर्य्यन्तं यस्याः कलाया भासया सकलं भासते। यद्वा शरीरस्यापि ब्रह्माण्डसंज्ञा—"ब्रह्माण्डे ये गुणाः सन्ति ते हि सन्ति कलेवरे" इति प्रामाणिकोक्तत्वात्। सेयं श्रीपरमेश्वरी विजयते जयतीत्यर्थः। नित्यज्ञानस्योदयो यतः।

ध्यात्वैतन्मूलचक्रान्तरविवरलसत्कोटिसूर्य्यप्रकाशां
वाचामीशो नरेन्द्रः स भवति सहसा सर्व्वविद्याविनोदी ।
आरोग्यं तस्य नित्यं निरवधि च महानन्दचित्तान्तरात्मा
वाक्यैः काव्यप्रबन्धैः सकलसुरगुरून् सेवते शुद्धशीलः ॥ १३ ॥

तस्याः शिखाया मध्ये त्रिवलयस्योर्द्ध्वे व्यवस्थितां परमां कलां नादरूपामित्यर्थः। इति ललितारहस्यकारः। अतिकुशला सृष्टिसम्पादनयोग्यतारूपकौशलवतीत्यर्थः। नित्यानन्दपरम्परेति। नित्यानन्दात् परम्परा परपरक्रमसम्बन्धो यस्या इत्यर्थः। ततश्च नित्यानन्दो निर्गुणं ब्रह्म तस्मात् सगुणाविर्भावः सगुणात् शक्तिः शक्तेर्नादः नादाद्बिन्दुः बिन्दोः कुण्डलिनी कुण्डलिन्यवान्तररूपेयं चित्कलेत्येवंप्रकारेण नित्यानन्दपरम्परेति भावः। यद्वा नित्यानन्दपरम्परातिविगलत्पीयूषधाराधरेत्येकविशेषणम्। नित्यानन्दात्परम्परया नित्यानन्दात् परं बिन्दुः तत्परमाज्ञाचक्रं तत्परं विशुद्धचक्रं एवं क्रमेण मूलाधारपर्य्यन्तं अतिविगलन्ती या पीयूषधारा सा ध्रियते गृह्यते यया सेत्यर्थः स्पष्टमन्यत् ॥ १२ ॥

मूलाधारे कुण्डलिनीचिन्तनफलमाह ध्यात्वैतदिति। मूलचक्रेति "मूलमाधारषट्कानां मूलाधारं ततो विदुः" इति वचनात् मूलाधारचक्रं तस्यान्तरे मध्ये यद्विवरं गह्वरं तस्मिन् लसत्कोटिसूर्य्यप्रकाशामित्यर्थः। सकलसुरगुरूनिति। "सिंहशार्द्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः" इत्यमरोक्त्या सुरगुरुवर्त्तिनः गुरुशब्देन सुरश्रेष्ठा ब्रह्मविष्णुशिवादयः प्रतीयन्ते। ततश्च तदादिदेवान् सेवते स्तवादिवाक्यैस्तोषयतीत्यर्थः। स्पष्टमन्यत् ॥ १३ ॥ * ॥

(१३) ध्यात्वैतदिति। एतत् मूलाधारस्थं सर्व्वं ध्यात्वा नरः एवमेवं भवति तत्क्रमेणाह—वाचामीशो नराणामिन्द्रतुल्यः सहसा सर्व्वविद्याविनोदी च भवति। तस्य नित्यमेव आरोग्यं निरवधि अहर्निशमेव महानन्द ईश्वरः तच्चिन्ताविशिष्टः अन्तरात्मा यस्य एवं भवतीत्यर्थः। एतत् कीदृशं? मूलाधारमध्यप्रकाशं कोटिसूर्य्याणां प्रकाशो यस्य तत्तथा। स जनः काव्यप्रबन्धैः वाक्यैः सकलसुरगुरुं शुद्धशीलः सन् सेवते वाक्पतिसदृशो भवतीत्यर्थः। [अन्य मते गुरुमिति पाठः।]

सिन्दूरपूररुचिरारुणपद्ममन्यत्
सौषुम्नमध्यघटितं ध्वजमूलदेशे।
अङ्गच्छदैः परिवृतं तड़िदाभवर्णै-
र्व्वाद्यैः सविन्दुलसितैश्च पुरन्दरान्तैः ॥ १४ ॥

तदर्थं महावाक्यार्थनिर्णयः। मूलाधारचक्रं चतुर्द्दलं रक्तवर्णं वशषस इति स्वर्णाभचतुर्व्वर्णयुक्तदलकर्णिकायां धरामण्डलं चतुष्कोणं अष्टशूलावृतं पीतवर्णं तन्मध्याधोधरावीजं चतुर्भुजं ऐरावतारूढं पीतवर्णं वज्रहस्तं चतुर्भुजम्। धरावीजविन्दुमध्ये शिशुरूपब्रह्मा रक्तवर्णः चतुर्भुजः दण्डकमण्डल्वक्षसूत्राभयहस्तः चतुर्म्मुखः। तत्कर्णिकायां रक्तपद्मोपरि चक्राधिष्ठात्री डाकिनीशक्तिः रक्तवर्णा चतुर्भुजा शूलखट्वाङ्गखड्गचषकहस्ता। कर्णिकामध्ये विद्युदाकारत्रिकोणं तन्मध्ये कामवायुः कामवीजञ्च रक्तवर्णम्। तदुपरि स्वयम्भुलिङ्गः श्यामवर्णः। तस्योर्द्ध्वे कुण्डलिनीशक्तिः सार्द्धत्रिवलयाकारा। तदूर्द्ध्वे लिङ्गाग्रे चित्कला दण्डाकारेण स्थितेति ॥ इति प्रथमप्रकरणम् ॥ * ॥

मूलाधारचक्रं निरूप्य स्वाधिष्ठानचक्रं निरूपयति सिन्दूरपूरेत्यादि पञ्चभिः। प्रथमस्यायमर्थः। ध्वजमूलदेशे लिङ्गमूलस्थाने अन्यत् आधारचक्रभिन्नं सिन्दूरपूररुचिरारुणपद्मं सिन्दूरस्य पूरणेन यथा मनोहररक्तवर्णं तद्वद्रक्तवर्णपद्मं आस्ते इति क्रियासमाहारेणान्वयः। पद्मं विशेषयति सौषुम्नमध्यघटितमिति। सुषुम्नानाड़ीमध्ये निर्म्मितं तथा अङ्गच्छदैः परिवृतं षट्पत्रयुक्तम्। पुरन्दरान्तैरिति। पुरन्दरो लकारः तदन्तैर्वाद्यैस्तेन वभमयरलेति षड्भिः तड़िदाभवर्णैर्दलवत्परिवृतः तेन दलावच्छेदे वर्णयोगः प्रतीतः। वर्णान्

(१४) सिन्दूरेति। अन्यत् स्वाधिष्ठानाख्यं लिङ्गमूलसमदेशे आस्ते सुषुम्नामध्यघटकीभूतं सुषुम्नाशब्दात् स्वार्थे इन् इति केचित्। तद्दूष्यं वस्तुतस्तु सुषुम्नाया इदं ब्रह्मनाड्यादि तन्मध्यभूतं पद्मं तस्येदमित्यर्थे चण् कीदृशं सिन्दूररुचिरतया इव अरुणवर्णम्। पुनः कीदृशं? अङ्गच्छदैः षड्दलैरावृतम्। कीदृशैः? तड़िदिवाभा वर्णो येषां तथोक्तैः। पुरन्दरो लकारस्तदन्तैः विन्दुना परिलसितैरेवम्भूतैर्द्दलैरित्यर्थः। एतेन वर्णानां सर्व्वपद्मेषु दलमध्यवर्त्तित्वमायातम्।

तस्यान्तरे प्रविलसद्विशदप्रकाश-
मम्भोजमण्डलमथो वरुणस्य तस्य।
अर्द्धेन्दुरूपलसितं शरदिन्दुशुभ्रं
वङ्कारवीजममलं मकराधिरूढ़म्॥ १५॥

विशेषयति सविन्दुलसितैरिति। विन्दुना सह वर्त्तमानाः सविन्दवः लसिताः प्रकाशिताः। सविन्दवश्च ते लसिताश्चेति तैरित्यर्थः। ततश्चात्र विशेष्य-विशेषणभावकल्पने विशेषणीभूतविन्दौ लसितत्वकारणत्वम् प्रतीयते। "सुरापः पतती"त्यत्र कर्त्तृविशेषणसुरापाने पतनकर्त्तृत्ववदिति। यद्वा विन्दूनां लसितं विन्दुलसितं विन्दुप्रकाशः तेन सह वर्त्तमानैः वाद्यैरित्यर्थः॥ १४॥

एतत्पद्मकर्णिकायामम्भोजमण्डलस्थितिमाह तस्यान्तरे इति। तस्य पद्मस्य अन्तरे मध्ये अम्भोजमण्डलम् अम्भोजाकारमण्डलं प्रविलसत् प्रकाशमानम्। तत् किम्भूतं? विशदप्रकाशं शुक्लवर्णम्। पुनः किम्भूतम्? अर्द्धेन्दुरूपलसितम् अर्द्धचन्द्रयुक्तमित्यर्थः। इदं जलमण्डलं तदाह सारदायाम्—

अम्भोजमम्भसो भूमिश्चतुरस्रं सवज्रकम्। इत्यादि।

एतन्मण्डललक्षणमाह राघवभट्टः। अर्द्धचन्द्रं कृत्वा तदुभयभागे सरोजद्वयं कुर्य्यात् तदुक्तमाचार्य्यैः। अब्जोपेतार्द्धेन्दुमद्विम्बमिति। मण्डलमध्ये वरुणवीजस्थितिमाह अथो इति। तस्येति जलाधिष्ठातृत्वेन प्रसिद्धस्येत्यर्थः। मकराधिरूढ़मिति। पाशहस्तश्च तदाह—

---

(१५) तस्यान्तरे इति। तस्य पद्मस्य मध्ये अम्भसि जातं वरुणस्य मण्डलमास्ते। अथो शब्दः सम्भावनायाम्। कीदृशं? प्रकर्षेण विलसत् निर्म्मलप्रकाशो यस्य तत्तथा। तस्यैव वरुणस्य अर्द्धेन्दु-रूपेण लसितं मनोज्ञम् अतएव वङ्कारवीजम् अमलं निर्म्मलशरच्चन्द्र इव शुभ्रम्। मकराधि-रूढ़ं मकरो जन्तुविशेषः ओङ्कार इति ख्यातस्तदधिरूढ़ं कर्त्तरि क्तः, अतएव अम्भोजमण्डल-दर्शनात् कमपि मणिपूरे इति शङ्कराचार्य्यश्लोकस्य महीधारे इत्यत्र चानुपपत्तिः तत्तु तद्व्यव-सायिभिः प्रतिध्यातव्यम्। वयन्तु तत्र व्यस्तसमस्ततया व्याख्यां ब्रूमः॥

तस्याङ्कदेशकलितो हरिरेव पायात्
नीलप्रकाशरुचिरश्रियमादधानः ।
पीताम्बरः प्रथमयौवनगर्व्वधारी
श्रीवत्सकौस्तुभधरो धृतवेदबाहुः ॥ १६ ॥

तदन्तर्व्वारुणं वीजं श्वेतं मकरवाहनम् ।
पाशहस्तं तदङ्कञ्च हरिं श्यामं चतुर्भुजम् ॥ इति ॥

अयं वरुणवीजस्वरूपो वकारो यवर्गीयः कुलाकुलचक्रे भूतलिपिमन्त्रे च तद्वकारस्यैव यलवर्णत्वेनाभिधानात् । स्पष्टमन्यत् ॥ १५ ॥

वरुणवीजस्याङ्के विष्णुस्थितिमाह तस्याङ्क इति । अङ्के वीजमस्तकस्य विन्दुमध्ये धरावीजविन्दौ ब्रह्मणः स्थितिदर्शनादत्रापि तथा दृष्टपरिकल्पनान्यायात् एवं वक्ष्यमाणं सर्व्वत्र बोध्यम् । कलितः स्थित इत्यर्थः । नीलप्रकाशरुचिरश्रियमादधान इति । नीलज्योतिषां या मनोज्ञा शोभा तां दधानः इत्यर्थः तेन नीलतेजःपुञ्जशरीरीति यावत् । श्रीवत्सकौस्तुभधर इति, तद्ध्यानमाह गौतमीये—

कौस्तुभं हृदये रत्नं सूर्य्यायुतसमप्रभम् ।
तदधो वनमालाञ्च चन्द्रायुतसमप्रभाम् ।
कौस्तुभोर्द्ध्वे च श्रीवत्सञ्चन्द्रायुतसमप्रभम् ॥ इति ॥

हरिहस्ते अस्त्रमाह तन्त्रान्तरे—

पाशहस्तं तदङ्के च हरिं श्यामं चतुर्भुजम् ।
शङ्खचक्रगदापद्मधारिणं पीतवाससम् ॥ इति ॥

पाशहस्तं "वरुणम्" इति पूर्व्वेणान्वयः । अन्यत्र "पीताम्बरं शान्तमूर्त्तिं वनमालाविभूषितम्" इति मूलाधारे हंसपृष्ठे ब्रह्मणः स्थितिदर्शनादत्र गरुड़ोपरि विष्णुश्चिन्तनीयः ॥ १६ ॥

---

(१६) तस्याङ्क इति । तस्य वीजस्य क्रोड़देशलसितः हरिर्व्विष्णुः त्रिभुवनं पायात् । कीदृशः ? नीलप्रकाशां मनोज्ञां कान्तिम् आधत्ते । पीतवस्त्रः, प्रथमयौवनगर्व्वम् उद्रेकं धर्त्तुं शीलमस्य तथोक्तः । श्रीवत्सचिह्नं कौस्तुभञ्च दधातीत्यर्थः । धृताश्चत्वारो बाहवो येन स तथा ॥

अत्रैव भाति सततं खलु राकिणी सा
नीलाम्बुजोदरसहोदरकान्तिशोभा ।
नानायुधोद्यतकरैर्लसिताङ्गलक्ष्मी-
र्दिव्याम्बराभरणभूषितमत्तचित्ता ॥ १७ ॥

स्वाधिष्ठानाख्यमेतत् सरसिजममलं चिन्तयेद्यो मनुष्य-
स्तस्याहङ्कारदोषादिकसकलरिपुः क्षीयते तत्क्षणेन ।
योगीशः सोऽपि मोहाद्भुततिमिरचये भानुतुल्यप्रकाशो-
गद्यैः पद्यैः प्रबन्धैर्विरचयति सुधावाक्यसन्दोहलक्ष्मीः ॥ १८ ॥

एतत्पद्मे राकिणीशक्तिस्थितिमाह । अत्रैवेति स्पष्टम् । राकिणीध्यान-विशेषमाह—

श्यामां शूलाब्जहस्तां डमरुकरयुतां तीक्ष्णटङ्कं वहन्ती-
मुग्रां रक्तत्रिनेत्रां कुटिलसविलसद्दन्तदंष्ट्रप्रभाभिः ।
दीप्तां तां देवदेवीं द्वितयकमलगां रक्तधारैकनासां
शुक्लाब्जे सक्तचित्तामभिमतफलदां राकिणीं चिन्तयेत्ताम् ॥

अत्र पद्मान्तरे राकिण्याः स्थितिदर्शनात् सर्व्वत्र रक्तपद्मान्तरोपरि षट्-शक्तीनां स्थितिरिति बोध्यम् ॥ १७ ॥

स्वाधिष्ठानपद्मादिचिन्तनफलमाह स्वाधिष्ठानाख्यमिति । तदुक्तं—

स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः ॥ इति ॥

---

(१७) अत्रैवेति । अत्रैव पद्मे खलु निश्चितं सर्व्वदेवस्य प्रसिद्धा राकिणी आस्ते । नीलपद्मस्योदरतुल्यशोभा यस्याः नानास्त्रेणोद्यतकरैः प्रकाशमाना शोभा यस्याः सा तथा । दिव्याम्बरालङ्काराभ्यां भूषिता च मत्तं चित्तं यस्याः सा च इति तथा ॥

(१८) स्वाधिष्ठानेति । एतत् स्वाधिष्ठानाख्यं सरसिजं यो मुनीन्द्रश्चिन्तयेत् तस्याहङ्कारादिदोषरूपसकलरिपवः ज्ञानप्रतिबन्धकत्वात् शुद्धज्ञानपरिपन्थिनः तत्क्षणेनैव क्षीणा भवन्तीति ।

तस्योर्द्ध्वे नाभिमूले दशदललसिते पूर्णमेघप्रकाशे
नीलाम्भोजप्रकाशैरुपहितजठरे डादिफान्तैः सचन्द्रैः ।
ध्यायेद्वैश्वानरस्यारुणमिहिरसमं मण्डलं तत् त्रिकोणं
तद्वाह्ये स्वस्तिकाख्यैस्त्रिभिरभिलषितं तत्र वह्नेः स्ववीजम् ॥१९॥

अहङ्कारदोषादीत्यादिना कामक्रोधादयो गृह्यन्ते तेन कामादिषड्रिपवः क्षीयन्ते इत्यर्थः । मोहाद्भुततिमिरचये इति दुर्निवार्य्यमोहान्धकारसमूहे इत्यर्थः । ततश्च मायामोहरूपान्धकारनाशाय ज्ञानरूपसूर्य्यमाप्नोतीति भावः । स्पष्टमन्यत् ॥ १८ ॥

तदर्थं महावाक्यार्थनिर्णयः । स्वाधिष्ठानचक्रं सिन्दूरवर्णं षड्दलं तड़िदाभसविन्दु व भ म य र ल इति षड्वर्णयुक्तदलम् । तत्कर्णिकायां मध्यस्थलार्द्धचन्द्रयुक्ताष्टदलपद्माकारमम्भोजमण्डलं शुक्लवर्णम् । तन्मध्ये वं इति वरुणवीजं मकराधिरूढं पाशहस्तं तत्क्रोड़े विष्णुर्गरुड़ोपरिस्थितश्चतुर्भुजः शङ्खचक्रगदापद्मधारी पीताम्बरः वनमालाश्रीवत्सकौस्तुभधारी युवरूपः । पद्मकर्णिकायां रक्तपद्मोपरि राकिणी शक्तिः श्यामवर्णा चतुर्भुजा शूलाब्जडमरुटङ्कधरा त्रिनेत्रा कुटिलदंष्ट्रा भयङ्करी शुक्लान्नरक्तधाराभिलाषिणीति ॥ इति द्वितीयप्रकरणम्॥*॥

मणिपूरचक्रं निरूपयति तस्योर्द्ध्वे इत्यादित्रिभिः । तस्य स्वाधिष्ठान-

---

पद्मं कीदृशम् ? अमलं निर्म्मलम् । स योगीशश्च भवति । मोहाद्भुतान्धकारचये भानुतुल्यप्रकाशश्च भवति । स च गद्यैः संस्कृतया वाचा पद्यैः श्लोकप्रवन्धैः नानावर्णादिभिः अमृतायमानकाव्यसमूहं श्रिये विरचयति ॥

(१९) तस्योर्द्ध्वे इति । तस्य पद्मस्योर्द्ध्वे नाभिमूले दशदलकमले ललिते मनोज्ञे पूर्णमेघ इव प्रकाशो यस्य एवम्भूते पद्मे वैश्वानरस्य वह्नेः त्रिकोणं मण्डलं ध्यायेत् । कीदृशम् ? अरुणसूर्य्ययोस्तुल्यम् । पुनः कीदृशं ? तद्वाह्ये त्रिकोणस्य वहिः त्रिभिः स्वस्तिकाख्यैरभिलषितं, तत्रैव वह्निमण्डले वह्नेः स्ववीजम् आस्ते । सानुस्वारो रेफ इति । पद्मे किम्भूते ? नीलाम्भोजस्य प्रकाशो येषाम् एवम्भूतैः सचन्द्रैः डकारादिफकारान्तैरुपहितजठरे एतैर्वर्णैरुपशोभितजठरे उपस्थितमध्ये इत्यर्थः ॥ शङ्करमते "दशदल-ललिते" इति पाठः ।

ध्यायेन्मेषाधिरूढं नवतपननिभं वेदबाहूज्ज्वलाङ्गं
तत्क्रोडे रुद्रमूर्त्तिर्निवसति सततं शुद्धसिन्दूररागः ।
भस्मालिप्ताङ्गभूषाभरणसितवपुर्व्वृद्धरूपी त्रिनेत्रो
लोकानामिष्टदाताभयलसितकरः सृष्टिसंहारकारी ॥ २० ॥

स्येत्यर्थः । दशदललसिते इति दशदलैर्लसिते प्रकाशिते पद्मे इति शेषः । पद्मे किम्भूते ? पूर्णमेघप्रकाशे कृष्णवर्णे । तथा डादिफान्तैः ड ढ ण त थ द ध न प फेति दशवर्णैरुपहितं युक्तं जठरं मध्यं यस्य तद्रूपे इत्यर्थः । सचन्द्रैरिति । चन्द्रोऽर्द्धचन्द्रः युगलाध्ववाहित्वाद्बिन्दुश्च ताभ्यां सह वर्त्तमानैर्व्वर्णैरित्यर्थः । वैश्वानरस्य वह्नेः । अरुणमिहिरसमं बालार्कसदृशमित्यर्थः । स्वस्तिकाख्यैरिति "स्वस्तिकं नाम मध्यमूर्द्ध्वं विदिग्गतचतुर्व्वक्रं रेखाद्वयमि"ति राघवभट्टोक्तं तत्प्रकारैस्त्रिभिः स्वस्तिकैः त्रिकोणावच्छेदे अभिलषितमित्यर्थः । अत्र वह्निमण्डले वह्निवीजं रं ॥ १९ ॥

ध्यायेदिति । भस्मालिप्ताङ्गभूषाभरणसितवपुरिति । भस्मलेपनाङ्गभूषाभरणाभ्यां शुक्लीकृतदेह इत्यर्थः । ध्यायेन्मेषेति । ध्याने विशेषमाहान्यत्र—

मेषस्थं साक्षसूत्रञ्च शक्तिहस्तं स्मरेत्ततः ॥ इति ॥

विशेषानभिधानादन्यहस्तद्वये वराभयौ चिन्तनीयौ ध्यानान्तरे तथा दर्शनात् । लोकानामिष्टदाता वरदातेत्यर्थः । अभयलसितकरस्तेन वराभयधारीति भावः । अत्र वृषोपरि रुद्रो ध्येयः । स्पष्टमन्यत् ॥ २० ॥

---

(२०) ध्यायेदिति । वह्निवीजं ध्यायेदिति पूर्व्वश्लोकेनान्वयः । कीदृशम् ? मेषं अधिरूढं प्रातःकालीनसूर्यतुल्यं चतुर्भिर्व्वाहुभिरुज्ज्वलाङ्गम् । तस्य वीजकोषस्य अङ्के रुद्रमूर्त्तिर्निवसति सततमेव । कीदृशः ? शुद्धसिन्दूरस्येव रक्ताकारो यस्य । भस्मलिप्तमेवाङ्गभूषाभरणं तेन प्रकाशवपुर्य्यस्य वृद्धाकारः त्रीणि नेत्राणि यस्य स तथा । त्रिलोकवासिनामभीष्टदाता अभयलसितकरः सृष्टेः संहारकारी च ।

अत्रास्ते लाकिनी सा सकलशुभकरी वेदबाहूज्ज्वलाङ्गी
श्यामा पीताम्बराद्यैर्व्विविधविरचनालङ्कृता मत्तचित्ता ।
ध्यात्वैतन्नाभिपद्मं प्रभवति नितरां संहृतौ पालने वा
वाणी तस्याननाब्जे निवसति सततं ज्ञानसन्दोहलक्ष्मीः ॥ २१ ॥

अत्रास्ते इति। विविधरचनेति विविधेन मणिमुक्तादियोगेन चित्रविचित्रघटनेन विरचना यत्र तादृशमलङ्कृतं यस्या इत्यर्थः। यद्वा विविधविरचनया- अलङ्कृतं अलङ्कारो धार्य्यते यत्रेत्यर्थः। अत्र लाकिनीध्यानविशेषमाह—

नीलां देवीं त्रिवक्त्रां त्रिनयनलसितां दंष्ट्रिणीमुग्ररूपां
वज्रं शक्तिं दधानामभयवरकरां दक्षवामे क्रमेण ।
ध्यात्वा नाभिस्थपद्मे दशदलविलसत्कर्णिके लाकिनीं तां
मांसाशीं गौररक्तास्तकहृदयवतीं चिन्तयेत् साधकेन्द्रः ॥

नाभिपद्मचिन्तनमाह ध्यात्वैतदित्यादि। नाभिपद्मं मणिपूराख्यम्। "तत्पद्मं मणिवद्भिन्नं मणिपूरं तथोच्यते" इति गौतमीयात्। अन्यत् स्पष्टम् ॥ २१ ॥

तदयं महावाक्यार्थनिर्णयः। नाभिपद्मं मेघवर्णदशदलं तद्दलेषु नीलाभसविन्दु ड ढ ण त थ द ध न प फ इति दशवर्णयुक्तं तत्कर्णिकायां त्रिकोणाकारं त्रिकोणवह्निः स्वस्तिकायुक्तं रक्तवर्णं वह्निमण्डलम्। तन्मध्ये रं इति वह्निवीजं रक्तवर्णं मेषाधिरूढं चतुर्भुजं वज्रशक्तिवराभयधरम्। तत्क्रोड़े रुद्रः वृषारूढो रक्तवर्णो द्विभुजो वराभयधारी भस्मलेपनशुक्लाभरणाभ्यां

---

(२१) अत्रास्ते इति। अत्रैव पद्मे सा प्रसिद्धा लाकिनी आस्ते। कीदृशी? सर्व्वेषामेव शुभकरी। चतुर्भिर्व्वाहुभिरुज्ज्वलाङ्गी श्यामवर्णा पीतवस्त्राद्यैर्या नाना विरचना तया अलङ्कृता। मत्तं चित्तं यस्याः सा तथा। एतन्नाभिपद्मं मणिपूरकाख्यं ध्यात्वा इत्यर्थः। संहारपालने च प्रभवति समर्थो भवति। तस्याननाब्जे सततमेव वाणी विलसति। कीदृशी? ज्ञानसमूहसंप्राप्तिः एतेन ब्रह्मविष्णुशिवतुल्यो भवतीत्यर्थः।

तस्योर्द्ध्वे हृदि पङ्कजं सुललितं बन्धूककान्त्युज्ज्वलं
काद्यैर्द्वादशवर्णकैरुपहितं सिन्दूररागान्वितैः ।
नाम्नानाहतसंज्ञकं सुरतरुं वाञ्छातिरिक्तप्रदं
वायोर्म्मण्डलमत्र धूमसदृशं षट्कोणशोभान्वितम् ॥ २२ ॥

शुक्लीकृतदेहः हंसरूपः । पद्मकर्णिकायां रक्तपद्मोपरि लाकिनीशक्तिः नीलवर्णा त्रिवक्त्रा त्रिनेत्रा चतुर्भुजा वज्रशक्त्यभयवरकरा घोरदंष्ट्रा रक्तयुक्तखेचरान्न-मांसाभिलाषिणीति ॥ इति तृतीयप्रकरणम् ॥ ॥

हृदि पङ्कजं निरूपयति तस्योर्द्ध्वे इत्यादि षड्भिः । हृदि पङ्कजमिति । एवम्भूतं पङ्कजं हृदि ध्यायेदिति क्रियाध्याहारेणान्वयः । सुललितं सुस्निग्ध-मित्यर्थः । काद्यैरिति । क ख ग घ ङ च छ ज झ ञ ट ठ इति द्वादश-वर्णकैरिति बोध्यम् । तैरुपहितं युक्तमित्यर्थः । नाम्नानाहतसंज्ञकमिति ।

शब्दब्रह्ममयः शब्दोऽनाहतस्तत्र दृश्यते ।
अनाहताख्यं पद्मं तत् मुनिभिः परिकीर्त्तितम् ॥

इति वचनादनाहतनामपद्ममिति तात्पर्य्यम् । यतः सुरतरुं कल्पतरु-स्वरूपमतो वाञ्छातिरिक्तफलप्रदमिति हेतुगर्भविशेषणमिति भावः । तत्पद्म-कर्णिकायां वायुमण्डलस्थितिमाह वायोरिति ॥ २२ ॥

---

(२२) तस्योर्द्ध्वे इति । तस्य पद्मस्य ऊर्द्ध्वे हृदि सुललितं मनोरमं नाम्ना अनाहतसंज्ञकं पद्ममास्ते । कीदृशम् ? बन्धूककान्तिवदुज्ज्वलं सिन्दूरराग इव अञ्चितैः प्राप्तैः ककाराद्यैः ठकारान्तै-र्द्वादशसंख्यकवर्णैर्दलमध्यवर्त्तिभिरुपशोभितम् । पुनः कीदृशम् ? सुरतरुः कल्पवृक्षस्तत्तुल्यं अतो वाञ्छातिरिक्तप्रदं वाञ्छितस्याप्यतिदददातीति तत्तथा ।

अयम्भावः—कल्पवृक्षाः पूर्णवाञ्छितफलदातारः, अयन्तु तदतिरिक्तं मोक्षं फलञ्च ददाती-त्यर्थः । अत्रैव मण्डले वायोर्म्मण्डलं विद्यते । कीदृशम् ? धूमसदृशम् । पुनः कीदृशम् ? षट्कोण-कोणस्य या शोभा तया अन्वितम् । [एतन्मते "सिन्दूरागाञ्चितैः" इति पाठः ।]

तन्मध्ये पवनाक्षरञ्च मधुरं धूमावलीधूसरं
ध्यायेत्पाणिचतुष्टयेन लसितं कृष्णाधिरूढं परम् ।
तन्मध्ये करुणानिधानममलं हंसाभमीशाभिधं
पाणिभ्यामभयं वरञ्च विदधल्लोकत्रयाणामपि ॥ २३ ॥
अत्रास्ते खलु काकिनी नवतडित्पीता त्रिनेत्रा शुभा
सर्व्वालङ्करणान्विता हितकरी सम्यग् जनानां मुदा ।
हस्तैः पाशकपालशोभनवरान् संबिभ्रती चाभयं
मत्ता पूर्णसुधारसार्द्रहृदया कङ्कालमालाधरा ॥ २४ ॥

वायुमण्डलमध्ये वायुवीजमाह तन्मध्य इति । पवनाक्षरं यं इति वीजं मधुरं मनोहरम् । धूमावलीधूसरमिति । धूमश्रेण्यावृतदेहत्वात् धूमधूम्रवर्णमिति भावः । कृष्णाधिरूढमिति कृष्णसाराधिरूढमित्यर्थः । वरुणहस्ते पाशदर्शनादत्र वायुहस्तेऽङ्कुशो ध्येयः । वायुवीजमध्ये ईशस्थितिमाह तन्मध्य इति स्पष्टम् । सर्व्वत्र शिवस्य त्रिनेत्रं शिवस्य त्रिनेत्रत्वादयं त्रिनेत्रः । एवं "ग्रैवेयाङ्गदहारनूपुरयुतं क्षौमाम्बरं चिन्तयेत्" इत्यादिकर्म्मान्तरोक्तध्यानप्राप्तक्षौमाम्बरत्वमीशस्य । एवं "कान्तं कान्तशशाङ्ककोटिकिरणं प्रोद्यत्कपर्द्दोज्ज्वलम्" । इति ॥ २३ ॥

अत्र कर्णिकायां काकिनीशक्तिस्थितिमाह अत्रास्ते इति । मत्ता

---

(२३) तन्मध्ये इति । तस्य मण्डलस्य मध्ये पवनाक्षरं वायुवीजम् । अक्षरपदेन वीजमुच्यते । एतत् प्रकारं यस्य मण्डलं तस्यैव वीजमिति दृष्टत्वात् । कीदृशम् ? मधुरं हृदयङ्गमम् । पुनः कीदृशम् ? दीपकलिकाकारं जीवात्मसम्बन्धिनी या धूमावली तया धूसरम् । पाणिचतुष्टयेन लसितं कृष्णाजिनाभिरूढं परं प्रहृष्टञ्च एवम्भूतं वीजं ध्यायेत् । तत्र वायुमण्डले ईश एवाभिधा नाम यस्य एवम्भूतं शूलपाणेर्व्वपुरास्ते । कीदृशम् ? करुणावारिधिस्वरूपम् अमलं निर्म्मलं हंसाभं सूर्य्य इव शोभा यस्य । पुनः कीदृशम् ? पाणिभ्यां कराभ्यां अभयं वरञ्च लोकत्रयाणामपि विदधत् । एतेन इयं मूर्त्तिः हस्तपादादिविशिष्टेति ।

(२४) अत्रास्ते इति । अत्रैव पद्मे खलु निश्चितं काकिनी देवी आस्ते । नूतनविद्युदिव

एतन्नीरजकर्णिकान्तरलसच्छक्तिस्त्रिकोणाभिधा
विद्युत्कोटिसमानकोमलवपुः सास्ते तदन्तर्गतः ।
वाणाख्यः शिवलिङ्गकोऽपि कनकाकाराङ्गरागोज्ज्वलो-
मौलौ सूक्ष्मविभेदयुङ्मणिरिव प्रोल्लासलक्ष्म्यालयः ॥२५॥

अस्खभावस्था स्खलितभावा । पूर्णसुधारसार्द्रहृदयेति । पूर्णः सम्पूर्णः तृप्ति-जनको यः सुधारसस्तेनार्द्रं परोपकाराभिमतकोमलं हृदयं चित्तं यस्या इत्यर्थः । यद्वा पूर्णः पूर्णानन्दजनको यः सहस्रदलकमलान्तर्विगलितपरमामृतरसस्तेनार्द्रं परमानन्दोत्फुल्लशिथिलं हृदयं यस्या इत्यर्थः । अन्यत् स्पष्टम् ।

कृष्णाम्बरपरीधानां नानाभरणभूषिताम् ।
ध्यायेत् शशिमुखीं नित्यां काकिनीं मन्त्रसिद्धये ॥

इति ध्यानप्राप्तकृष्णाम्बरत्वमस्या बोध्यम् ॥ २४ ॥

एतत्पद्मकर्णिकामध्ये त्रिकोणं निरूपयति एतदिति । त्रिकोणाभिधा त्रिकोणाकारा शक्तिरित्यनेन त्रिकोणस्याधोमुखत्वं ज्ञापितम् । सा आस्ते इत्यन्वयः । एतत्त्रिकोणं वायुवीजस्याधोदेशे । तदाहान्यत्र—

तत्क्रोड़े ईशं तदधस्त्रिकोणे वाणलिङ्गकम् ॥ इति ॥

वाणाख्यलिङ्गं विशेषयति मौलौ सूक्ष्मविभेदः । शिवलिङ्गमस्तकेऽर्द्ध-

---

पीतवर्णा । त्रीणि नेत्राणि यस्याः सा । शुभाशुभदायिका, सर्व्वालङ्कारैरावृता, मुदा हर्षेण जनानां सम्यक्प्रकारेण हितकरी । चतुर्भिर्हस्तैः कपालशूलशोभनवराभयान् संबिभ्रती । मत्ता उन्मत्ता, कङ्कालमालाधरा अस्थिमाल्यधरा ।

(२५) एतन्नीरज इति । एतत्पद्मकर्णिकान्तरप्रकाशात् त्रिकोणाभिधा शक्तिरास्ते । प्रसिद्धत्वात्सेति । तदन्तर्गता सती चास्ते इति सम्बन्धः । यद्वा स एव शिवः अन्तर्गतो यस्याः सा तथा । तस्याः शक्तेः मौलावुपरि वाणाख्यः शिवलिङ्गकः समास्ते । स्वर्णाकारेणाङ्गरागेणोज्ज्वलः सूक्ष्मरूपेण विशेषभेदं युनक्तीति । एवम्भूतो मणिरिव । पुनः कीदृशः ? प्रोद्दामलक्ष्म्यालयः सूक्ष्मभेदकत्वात् तस्याः शक्तेरेव प्रकृष्टोद्दामसम्श्रियः तत्रालय इति । [अत्र मते "प्रोद्दामलक्ष्म्यालयः" पाठः] ।

ध्यायेद्यो हृदि पङ्कजं सुरतरुं शर्व्वस्य पीठालयं
देवस्यानिलहीनदीपकलिकाहंसेन संशोभितम् ।
भानोर्म्मण्डलमण्डितान्तरलसत्किञ्जल्कशोभाधरं
वाचामीश्वर ईश्वरोऽपि जगतां रक्षाविनाशे क्षमः ॥ २६ ॥

चन्द्रविन्दुयोगात् तद्विन्दुमध्ये शून्यरूपो विभेदश्छिद्रं तेन युक्त इत्यर्थः तदाह यद्वा—

त्रिकोणान्तर्व्वाणलिङ्गं कनकाभरणैर्युतम् ।
चन्द्रार्द्धमस्तकं देवं मध्ये रक्ताम्बुजं परम् ॥ इति ॥

मध्ये रक्ताम्बुजमिति हृत्पद्मस्य कर्णिकाधोदेशे ऊर्द्ध्वमुखरक्तवर्णाष्टदलपद्ममित्यर्थः । एतत्पद्मोपरि मानसपूजा कार्य्या । तदुक्तं यथा—

तन्मध्येऽष्टदलं रक्तं तत्र कल्पतरुं तथा ।
इष्टदेवासनं चारुचन्द्रातपविराजितम् ॥

तथा—

नानापुष्पफलैर्युक्तं मञ्जुवाक्पक्षिशोभितम् ।

इत्याद्यभिधाय

तत्र ध्यायेदिष्टदेवं तत्तत्कल्पोक्तमार्गतः ॥ इति ॥

अलं विस्तरेण प्रकृतमनुसरामः । वाणलिङ्गमस्तके विन्दुप्रकाशदृष्टान्तमाह मणिरिवेति । यथा सरन्ध्रमणिप्रकाशस्तथा शिवलिङ्गोपरि विन्दुप्रकाश इति भावः । प्रोल्लासलक्ष्म्यालय इति प्रोल्लासः कामोद्गमः तच्छोभायुक्त इत्यर्थः ॥ २५ ॥

हृत्पद्मचिन्तनफलमाह ध्यायेदित्यादिद्वाभ्याम् । अस्यार्थः यो जनो हृदि

---

(२६) ध्यायेदिति । य एतत् पद्मं कल्पवृक्षतुल्यं हृदि ध्यायेत् सः एवमेवम्भवति । वाचामीश्वरः वृहस्पतितुल्यः जगतामीश्वरः रक्षाविनाशक्षमश्च अर्थात् जगताम् । कीदृशं ? शर्व्वस्य देवस्य

पङ्कजं ध्यायेत् स जनो वाचामीश्वरो वृहस्पतिसमो भवति एवं सर्व्वत्र ईश्वर इत्यादिप्रथमान्तेन भवति क्रियान्वयो बोध्यः ।

अत्र पद्मकर्णिकायां हंसरूपजीवात्मस्थितिमाह अनिलहीनदीपकलिका-हंसेन संशोभितमिति । वायुरहिता या दीपकलिका तत्सदृशहंसेन संशो-भितमित्यर्थः । ततश्च पद्मकर्णिकायां वाताहतिरहितस्थिरतरदीपशिखा-कारहंसरूपः जीवात्मा वर्त्तते इति भावः ।

एतत्कर्णिकायां सूर्य्यमण्डलस्थितिं ज्ञापयति । भानोर्म्मण्डलमण्डि-तान्तरलसत्किञ्जल्कशोभाधरमिति । भानोर्म्मण्डलेन मण्डिता भूषिता ये अन्तरलसन्तः कर्णिकामध्ये प्रकाशमानाः किञ्जल्काः केशराः अथवा याः किञ्जल्कशोभास्ताधारयतीत्यर्थः । अत्र भानुमण्डलमण्डितत्वं किञ्ज-ल्कविशेषणं नत्वन्तरविशेषणं तथात्वे सर्व्वस्मिन् पद्मे किञ्जल्कशोभाधर-त्वादत्र विशेषोपादानं व्यर्थं स्यात् । भानोर्म्मण्डलमण्डितत्वविशेषण-विशिष्टत्वे तादृशविशिष्टकिञ्जल्कानामन्यत्रासत्त्वात् तदुपादानं सार्थकमिति । एवञ्च भानोर्म्मण्डलस्य कर्णिकारूपकत्वे तत्तेजसा सर्व्वेषां किञ्जल्कानां शोभाधिक्यरूपमण्डितत्वं सम्भवति न त्वेकदेशस्थितत्वे ।

ततश्च तत्कर्णिकायामादौ कर्णिकाव्यापकं वायुमण्डलं तदुपरि तथा सूर्य्यमण्डलम् । तदुपरि वायुवीजत्रिकोणादिकं ध्येयम् । युक्तञ्चैतत् मान-सार्च्चनायां "मं वह्निमण्डलाय दशकलात्मने नमः" इत्यादिना पूजायाम् उपर्य्युपरिक्रमेण वह्न्यर्कचन्द्रमण्डलस्थितिदर्शनात् दृष्टपरिकल्पनान्यायावता-रात् । अलमति विस्तरेण ।

ईश्वर इति सृष्टिकर्त्ता इत्यर्थः । रक्षाविनाशे चमः स्थितिप्रलयकर्त्ता इत्यर्थः । तेन स जनः सृष्टिस्थितिप्रलयकर्त्तेति तात्पर्य्यार्थः ॥ २६ ॥

पीठात्रयम् । पुनः कीदृशं ? अनिलहीनदीपकलिकारूपहंसेनात्मना संशोभितम् । भानोर्मण्डलेन मण्डिते अन्तरे लसत्प्रकाशमानः केशरशोभाभावो यस्य तत्तथा ।

योगीशो भवति प्रियात् प्रियतमः कान्ताकुलस्यानिशं
ज्ञानीशोऽपि कृती जितेन्द्रियगणो ध्यानावधानक्षमः।
गद्यैः पद्यपदादिभिश्च सततं काव्याम्बुधारावहो
लक्ष्मीरङ्गणदैवतः परपुरे शक्तः प्रवेष्टुं क्षणात्॥ २७॥

योगीश इति। प्रियात् प्रियतमः कान्ताकुलस्येति योषिद्वर्गस्य कर्म्म-कुशलः। जितेन्द्रियगण इति जितेन्द्रियाणां मध्ये गण्यते तुल्यत्वेन स्तूयते असावित्यर्थः। ध्यानावधानक्षमः ध्याने ब्रह्मचिन्तने अवधानाय स्थिरमनोऽभिनिवेशं कर्त्तुं क्षमः समर्थ इत्यर्थः। काव्याम्बुधारावह इति काव्यरूपाम्बूनां धारा अविच्छेदनिःसरणम् उह्यते धार्य्यते येन तादृशो भवतीति।

लक्ष्मीरङ्गणदैवतः। विष्णुसदृश इत्यर्थः। यद्वा लक्ष्मीः सम्पत्तिः रङ्गणम् आनन्दानुभवः दैवम् अदृष्टं तत्समूहो दैवता जनतावत् ततश्च लक्ष्मीभीरङ्गणाय दैवता यस्येति बहुव्रीह्यर्थे णप्रत्ययेन तत्पदं सिद्धम्। अत-एवोक्तम्।

इह भुक्त्वा वरान् भोगानन्ते मुक्तिपदं व्रजेत्॥ इति॥

परपुरे शक्तः प्रवेष्टुं क्षणादिति दुर्गद्वारपालादिना दुर्गमीकृतायामपि परपुर्य्यां प्रवेष्टुं शक्तः प्रवेशकारणभूतादर्शनाकाशगमनादियोग्यतापन्नो भवतीत्यर्थः। अत्र केचित् देवतमिति विन्दन्तं पठित्वा यद्यपि जनविशेषणतया

---

(२७) योगीश इति। एतत्पङ्कजध्यानपरोजनः एवम्भवति। योगीशः कान्ताकुलस्य सर्व्वस्त्रीणां प्रियात् स्वामिनोऽपि प्रियतमो भवति। ज्ञानीशः कृती च भवति। जितं इन्द्रियं मनो येन स तथा। ध्यानेनावधाने क्षमो भवति। गद्यैः संस्कृतवाक्यैः पद्यपदादिभिः स्लोकादिप्रबन्धैः गद्यपद्यरूपाम्बुधारावहो भवति। अत्यन्तवर्षणशीलः मेघरूपो भवति इति यावत्। लक्ष्मीतत्-कुलदैवतमिति प्रशस्तलक्ष्म्याश्रयः कुलश्रेष्ठश्च भवति इत्यर्थः। यद्वा लक्ष्मीविशिष्टा कुलदेवता यस्य सः तथा स सत्कुलीनो भवतीति यावत्। दैवतमिति स्वार्थे अण्। एवं सः क्षणादेव परपुरे अन्यशरीरे प्रवेष्टुं समर्थो भवति। कुमारीतन्त्रे परपुरप्रवेशस्याप्येतत्पद्मध्यानफलत्वेनाभिधानात्। [एतन्मते "लक्ष्मीतत्कुलदैवतम्" इति पाठः]।

विशुद्धाख्यं कण्ठे सरसिजममलं धूमधूम्रावभासं
स्वरैः सर्व्वैः शोणैर्दलपरिलसितैर्दीपितं दीप्तबुद्धेः।
समास्ते पूर्णेन्दुप्रथिततमनभोमण्डलं वृत्तरूपं
हिमच्छायानागोपरि लसिततनोः शुक्लवर्णाम्बरस्य॥ २८॥

दैवतमित्यस्य पुंस्त्वं भवितुं पार्य्यते तथाप्यजहल्लिङ्गत्वान्नपुंसकत्वमिति वदन्ति। तन्न "वृन्दारका दैवतानि पुंसि वा देवता स्त्रियाम्" इत्यमरकोषे दैवतशब्दस्य पुंनपुंसकत्वकथनात् दैवत इति विसर्गान्तपाठोऽपि साधुः। प्रदर्शितार्थे तु सुतरां तथेति। स्पष्टमन्यत्॥ २७॥ *॥

तदयं महावाक्यार्थनिर्णयः। हृत्पद्मं वन्धूकाभं सिन्दूराभसविन्दु क ख ग घ ङ च छ ज झ ञ ट ठ इति द्वादशवर्णयुक्तद्वादशदलम्। तत्कर्णिकायां षट्कोणाकारवायुमण्डलं धूमाभम्। तदुपरि सूर्य्यमण्डलम्। तन्मध्ये विद्युत्कोटिनिभत्रिकोणम्। तदूर्द्धे वायुवीजं कृष्णसाराधिरूढं धूमधूम्राभं चतुर्भुजम् अङ्कुशहस्तम्। तत्क्रोडे हंसाभ ईशः द्विभुजः वराभयकरः त्रिनेत्रः। अत्र कर्णिकायां रक्तपद्मोपरि काकिनी शक्तिः पीतवर्णा चतुर्भुजा पाशकपालवराभयकरा पीतवस्त्रा सर्व्वालङ्करणान्विता सुधार्द्रहृदया कङ्काल-मालाधरा। मध्यत्रिकोणे वाणलिङ्गशिवः अर्द्धचन्द्रविन्दुरूपमस्तकः स्वर्णवर्णः कामोद्गमोल्लसितः। तदधः स्थिरतरदीपकलिकाकारहंसरूपी जीवात्मा। एतत्कर्णिकाधोरक्तवर्णोर्द्धमुखाष्टदलपद्मम्। तत्र कल्पवृक्षरत्नवेदीचन्द्रातपपताकाद्यलङ्कृतं मानसपूजास्थानम्॥ इति चतुर्थप्रकरणम्॥ *॥

इदानीं कण्ठदेशे विशुद्धचक्रं निरूपयति विशुद्धाख्यमित्यादिचतुर्भिर्विशुद्धाख्यमिति।

(२८) विशुद्धाख्यमिति। अन्यत् निर्म्मलं विशुद्धाख्यं पद्मं कण्ठे आस्ते। किम्भूतं? धूम्रेण या धूम्राभा तस्या इव द्युतिर्य्यस्य तत्तथा। पुनः कीदृशं? सर्व्वैः षोड़शस्वरैः रक्ताकारैर्दलैः परिलसितैर्दीपितं प्रकाशितम्। दीप्तबुद्धेर्दीप्ताकारबुद्धेर्जनस्य ज्ञानविषयी भवतीत्यर्थः। तत्रैव पद्मे शुक्ल-

विशुद्धिं तनुते यस्माज्जीवस्य हंसलोकनात् ।
विशुद्धं पद्ममाख्यातम् आकाशाख्यं महत् परम् ॥ इति ॥

अस्यार्थः कण्ठे विशुद्धाख्यं विशुद्धनामकं सरसिजं समास्ते इत्यन्वयः । पद्मं विशेषयति अमलमिति तेजोमयत्वात् मलरहितमित्यर्थः । स्वरैः सर्व्वैः अकारादिविसर्गान्तैः षोड़शस्वरैर्दीप्तबुद्धेः निरन्तरयोगाभ्यासेन विषयानुरागरूपमलरहितत्वेन प्रकाशितबुद्धेः साधकस्य सम्बन्धे दीपितं प्रकाशितमित्यर्थः । स्वरैः कीदृशैः ? दलपरिलसितैरिति । एतेन स्वराणां षोड़शत्वादेतत् पद्मं षोड़शदलमिति सूचितम् । व्यक्तमाहान्यत्र—

तदूर्द्ध्वे षोड़शदलं पङ्कजं धूम्रवर्णकम् ।
युक्तं शोणैः षोड़शभिः स्वरैर्व्विन्दुविभूषितैः ।
आरक्तकिञ्जल्कयुतं व्योममण्डलमण्डितम् ॥ इति ॥

तथा पूर्णेन्दुप्रथिततमनभोमण्डलं पूर्णचन्द्रमण्डलवत् सम्पूर्णं शुक्लवर्णञ्च अतएव "तत्तद्भूतसमाभानि मण्डलानि विदुर्बुधा" इति सारदोक्तवचनेन मण्डलानां तत्तद्दैवतभूतसमानवर्णविधानात् नभसः शुक्लवर्णत्वात्तन्मण्डलस्यापि शुक्लवर्णत्वं प्रतीयते । नभोमण्डलं वृत्तरूपं समास्ते एतत्पद्मकर्णिकायामिति शेषः । शुक्लवर्णाम्बरस्येति नभोमण्डलस्य मध्ये शुक्लवर्णस्याम्बरस्याकाशस्याङ्के "सदापूर्व्वोदेवः शिव इति च समाख्यानसिद्धः" सदाशिवनाम्नाख्यातो देवः सततं निवसतीति द्वितीयश्लोकेनान्वयः । अम्बरस्य कीदृशस्य ? हिमच्छायानागोपरि लसिततनोः हिमच्छायया नागः हिमच्छायानागः इति तृतीयान्ततत्पुरुषेण हिमोपमाविशिष्टनाग इत्यर्थः । यद्वा हिमच्छायातुल्यो नाग इति शाकपार्थिवादित्वात् मध्यपदलोपे तत्पदसिद्धा शुक्लवर्णनाग इत्यर्थः । अत्र नागो हस्ती व्यक्तमाह भूतशुद्धौ—

तदन्तर्व्योमबीजञ्च शुक्लं हैमगजस्थितम् ॥ इति ॥

वर्णाम्बरधरस्य विष्णोः पूर्णेन्दुरिव प्रथिततमं ख्यातं नभोमण्डलं समास्ते । यद्वा पूर्णेन्दुना-ख्याततमम् । "वियद्विष्णुपदम्" इत्यमरः । विष्णोः किम्भूतस्य ? हिमवर्णाभकान्तिर्विभा यस्य एवम्भूतस्य नागस्योपरि लसिता तनुर्यस्य ।

भुजैः पाशाभीत्यङ्कुशवरलसितैः शोभिताङ्गस्य तस्य
मनोरङ्के नित्यं निवसति गिरिजाभिन्नदेहो हिमाभः ।
त्रिनेत्रः पञ्चास्यो ललितदशभुजो व्याघ्रचर्म्माम्बराढ्यः
सदा पूर्व्वोदेवः शिव इति च समाख्यानसिद्धः प्रसिद्धः ॥२९॥

हैमेति हिमस्यायमितीदमर्थतद्धितप्रत्ययेन हैमगजः शुक्लहस्ती इत्यर्थः । ततश्च शुक्लहस्त्युपरि परिलसिता प्रकाशमाना तनुर्य्यस्य तादृशस्येत्यर्थः ॥ २८ ॥

भुजैरिति । पुनः कीदृशस्य ? भुजैः पाशाभीत्यङ्कुशवरलसितैः शोभिताङ्गस्येति पाशाङ्कुशवराभयहस्तस्येति फलितार्थः । पुनः कीदृशस्य ? मनोरिति । हं इत्याकाशवीजं तदात्मकस्येत्यर्थः । तेनात्र कर्णिकान्तरे नभोवीजं स्थितं तत्तु उक्तरूपेण चिन्तनीयमिति तात्पर्य्यम् ।

सदाशिवं विशेषयति गिरिजाभिन्नदेह इति अर्द्धनारीश्वर इत्यर्थः । हिमाभः शुक्लवर्णः ततश्चार्द्धनारीश्वरत्वाद्वामार्द्धदेहं सुवर्णाभं दक्षिणार्द्धं शुक्लम् इति । व्यक्तमाह—

शुक्लाम्बरेण संवीतं तत्र देवं सदाशिवम् ।
गिरिजाभिन्नदेहार्द्धं रौप्यहैमशरीरकम् ॥ इति ॥

तत्र नभोवीजक्रोड़े इत्यर्थः । तथा सदा सुधास्राविचन्द्रमसः कलाधोमुखान्वितम् इति ।

---

(२९) भुजैरिति । तस्य विष्णोर्मनोरङ्के वीजाकारमूर्त्तेरङ्के पञ्चास्यः शिवो निवसति नित्यमेव । तस्य किम्भूतस्य ? पाशाभीत्यङ्कुशपरिलसितभुजैः शोभिताङ्गस्य । शिवः किम्भूतः ? गिरिजया पार्व्वत्याऽभिन्नो देहो यस्य हरगौरीमूर्त्तिरित्यर्थः । पुनः कीदृशः ? हिमस्येव शोभा यस्य । त्रिनेत्रः मनोज्ञा दशभुजा यस्य स तथा । व्याघ्रचर्म्माम्बरैर्युक्तः । यद्वा व्याघ्रचर्म्मणा साम्बरेण च युक्तः हरगौर्य्यात्मकत्वात् सदाशिव इति समाख्यानसिद्धः नित्यस्वरूपप्रसिद्धः योगिनां मनसि प्रकाशः ।

सुधासिन्धोः शुद्धा निवसति कमले शाकिनी पीतवस्त्रा
शरं चापं पाशं सृणिमपि दधती हस्तपद्मैश्चतुर्भिः ।
सुधांशोः सम्पूर्णं शशपरिरहितं मण्डलं कर्णिकायां
महामोक्षद्वारं श्रियमभिमतशीलस्य शुद्धेन्द्रियस्य ॥ ३० ॥

निर्व्वाणतन्त्रे विशुद्धचक्राधिकारे—

यन्त्रमध्ये च वृषभं महासिंहासनन्ततः ।
तस्योपरि सदा गौरी दक्षभागे सदाशिवः ॥
त्रिनेत्रः पञ्चवक्त्रश्च प्रतिवक्त्रे त्रिलोचनम् ।
विभूतिभूषिताङ्गश्च रजताचलसोदरः ।
व्याघ्रचर्म्मधरो देवो फणिमालाविभूषित ॥ इत्यादि ।

"तस्योपरि सदा गौरी" इति शिवस्यार्द्धाङ्गरूपेण स्थितेति ।

व्यक्तमाह तत्रैव—

या गौरी लोकमाता च शम्भोरर्द्धाङ्गहारिणी ॥ इति ॥

ललितदशभुज इति । लावण्येन प्रशंसितदशहस्तयुक्त इत्यर्थः । अत्र देवस्य दशभुजेष्वस्त्रविशेषानभिधानात्—

शूलं टङ्कक्रपाणवज्रदहनान्नागेन्द्रघण्टाङ्कुशान्
पाशाभीतिहरं दधानममिताकल्पोज्ज्वलाङ्गं भजे ।

इति ध्यानान्तरे यान्यस्त्राण्युक्तानि तान्यस्य भुजेषु चिन्तनीयानीति ध्येयम् । प्रसिद्ध इति प्राधान्येन ख्यात इत्यर्थः । अन्यत् सुगमम् ॥ २९ ॥

एतत्पद्मकर्णिकायां शाकिनीशक्तिस्थितिमाह सुधासिन्धोरित्यादि । कमले विशुद्धचक्रकर्णिकायां शाकिनीनाम्नी शक्तिर्निवसति इत्यन्वयः । तां विशेष-

---

(३०) सुधासिन्धोरिति । तत्र कमले पीतवर्णा शाकिनी निवसति । कीदृशी ? सुधासिन्धोश्चन्द्रात् शुद्धसम्बन्धीययाऽमृतधारया शुद्ध इति यावत् । चतुर्भिर्हस्तपद्मैः शरं चापं पाशं सृणिमपि दधती तस्य पद्मस्य कर्णिकायां सुधांशोश्चन्द्रस्य शशपरिरहितं सम्पूर्णमण्डलम् आस्ते ।

यति सुधासिन्धोः शुभ्रा इति । सुधासमुद्रसदृशशुक्लवर्णा तथाच यथा सुधासिन्धोरमृतमयसुशीतलशुक्लत्वं तथा ज्योतिःस्वरूपायाः शाकिन्या उत्तापरहितशुक्लकिरण इति भावः । ध्यानान्तरे शाकिनीं विशेषयति—

देवीं ज्योतिःस्वरूपां त्रिनयनलसितां पञ्चवक्त्राभिरामां
हस्तैः पद्मैश्च पाशं शृणिमपि दधतीं पुस्तकं ज्ञानमुद्राम् ।
ध्यायेत् कण्ठस्थपद्मे निखिलपशुजनोन्मादिनीमस्थिसंस्थां
दुग्धान्ने प्रीतियुक्तां मधुमदमुदितां शाकिनीं साधकेन्द्रः ॥ इति ॥

ज्योतिःस्वरूपां ज्योतिषां स्वभावतः शुक्लवर्णत्वेनेयं शुक्लवर्णा । अत्र ध्यानद्वये द्विविधास्त्वदर्शनादिच्छाविकल्पः । इयं देवी कर्णिकान्तश्चन्द्रमण्डले वर्त्तते । तदाह प्रेमयोगतरङ्गिण्याम्—

तत्रास्ते शाकिनी शक्तिः शुधांशोर्म्मण्डले शुभे ॥ इति ॥

एतत्कर्णिकायां शुधांशोश्चन्द्रस्य शशपरिरहितं निष्कलङ्कं सम्पूर्णं मण्डलमपि विलसतीति पूर्व्वक्रियायामन्वयः । मण्डलं विशेषणेन प्रशंसति महामोक्षेत्यादि । एतन्मण्डलं शुद्धेन्द्रियस्य जितेन्द्रियस्य महामोक्षद्वारं निर्व्वाणमुक्तिमाहुः । एतच्चिन्तनादियोगमार्गमवलम्ब्य मुक्तिमाप्नोतीति भावः । श्रियमभिमतशीलस्येति । श्रियं योगलक्ष्मीमभिमन्यते आकाङ्क्षतीति श्रियमभिमतम् । तादृशं शीलं स्वभावो यस्य तद्रूपस्य शुद्धेन्द्रियस्येति विशिष्टार्थः । अत्र कर्णिकायां चन्द्रमण्डलादिस्थितिप्रकारस्तु आदौ कर्णिकान्तर्नभोमण्डलं तन्मध्ये त्रिकोणं तदन्तश्चन्द्रमण्डलं तन्मध्ये नभोवीजादिकमिति ।

तद्यथा—

कर्णिकायां त्रिकोणस्थं पूर्णचन्द्रन्तु चिन्तयेत् ।
हैमाभं गजमारूढ़माकाशं तत्र चिन्तयेत् ॥
शुक्लाम्बरेण संवीतं तत्र देवः सदाशिवः ॥ इति ॥

शुक्लाम्बरेण संवीतमाकाशमिति ॥ ३० ॥

कीदृशम् ? मोक्षद्वारं निर्व्वाणमुक्तिद्वारम् । पुनः कीदृशम् ? उत्तमबुद्धिशीलस्य जितेन्द्रियस्य श्रियं दधानम् इत्यर्थः ।

इह स्थाने चित्तं निरवधि विनिधायात्मसम्पूर्णयोगः
कविर्व्वाग्मी ज्ञानी स भवति नितरां साधकः शान्तचेताः।
त्रिकालानां दर्शी सकलहितकरो रोगशोकप्रमुक्त-
श्चिरञ्जीवी जीवी निरवधि विपदां ध्वंसहंसप्रकाशः॥ ३१॥

विशुद्धचक्रचिन्तनफलमाह इह स्थाने इति। आत्मसम्पूर्णयोग इति आत्मनि ब्रह्मणि सम्पूर्णो सर्व्वव्यापकत्वेन परिपूर्णो योगो ज्ञानं यस्य तादृशः। आत्तसम्पूर्णयोग इति पाठे आत्तः प्राप्तः सम्पूर्णयोगो येनेत्यर्थः। अतएवोक्तं श्रीमदाचार्य्येण—"पूर्णबोधात्मना तिष्ठेत् पूर्णाचलसमुद्रवत्" इति। ततश्च यः साधक इह स्थाने निरवधि चित्तं विनिधाय आत्मसम्पूर्णयोगो भवति, स ज्ञानी उपदेशं विना सर्व्वशास्त्रार्थवेत्ता शान्तचित्तः शान्तिगुणावलम्बिचित्तः।

दया भूतेष्वलोलुप्त्वमार्द्दवं ह्रीरचापलम्।
तेजः क्षमा धृतिः शौचमद्रोहोऽनभिमानिता॥

इत्यादिगुणोपहितचित्त इति यावत्। त्रिकालानां दर्शीति। अत्र केचित् ज्ञानलक्षणात्मकाः लौकिकसन्निकर्षरूपयोगधर्म्मेण सर्व्वं पश्यन्तीति। अन्ये तु तादृशजनस्यात्मप्रत्यक्षे तत्र भासमानसर्व्वप्रमेयवस्तूनां प्रत्यक्षो भवतीति वदन्ति। रोगशोकप्रमुक्तः सिद्धमन्त्रत्वाद्रोगमुक्तश्चिरञ्जीवी छिन्नमायापाशत्वात् शोकरहित इत्यर्थः। स जीवी जनः नितरामतिशयकविर्भवति एवं सर्व्वत्र भवति क्रियान्वयः। निरवधि विपदां ध्वंस इति। अवधिः सीमा तद्रहित-विपन्निरवधिविपत् आदिना पापपुण्यरूपकर्म्मबन्धे नानाविपत्तिरिति यावत्। तेषां ध्वंसाय विपत्तिप्रागभावासमानकालीनविपत्तिनाशाय फलतो मोक्षाय

---

(३१) इह स्थाने इति। इह विशुद्धे पद्मे चित्तं यो निधायात् तस्य सम्पूर्णयोगविषये ज्ञानं भवतीत्यर्थः। अथवा तत्सर्व्वमेव सम्पूर्णयोगत्वेनोपदिष्टं तदेवाह क्रमेण। कविः स जनः कविर्वाग्मीत्यादि। निरवधि नित्यमेव विपत्प्राप्तानां त्राणे सूर्य्य इव तेजस्वी भवति।

आज्ञानामाम्बुजन्तद्धिमकरसदृशं ध्यानधामप्रकाशं
हक्षाभ्यां वै कलाभ्यां परिलसितवपुर्नेत्रपत्रं सुशुभ्रम् ।
तन्मध्ये हाकिनी सा शशिसमधवला वक्त्रषट्कं दधाना
विद्यां मुद्रां कपालं डमरुजपवटीं बिभ्रती शुद्धचित्ता ॥ ३२ ॥

हंसस्य सहस्रदलकमलकर्णिकान्तर्गतहंसरूपान्तरात्मनः प्रकाशो यस्य तादृशो भवतीति । स्पष्टमन्यत् ॥ २१ ॥ * ॥

तदयं महावाक्यार्थनिर्णयः । कण्ठमूले विशुद्धचक्रं षोडशदलं धूमधूम्ररूपम् आरक्तकेशरं रक्तवर्णसविन्दुकषोड़शस्वरयुक्तम् । कर्णिकायां नभोमण्डलं वृत्तरूपं शुक्लवर्णम् । तन्मध्ये त्रिकोणं तत्र चन्द्रमण्डलम् । तदुपरि हं इति नभोवीजं शुक्लवर्णं शुक्लाम्बरपरीधानं शुक्लगजारूढ़ं चतुर्भुजं पाशाङ्कुशवराभयधरम् । तत्क्रोड़े वृषभोपरि स्थितमहासिंहासने सदाशिवः अर्द्धनारीश्वरत्वादर्द्धाङ्गसुवर्णाभार्द्धाङ्गशुक्लाभः पञ्चवक्त्रः त्रिनेत्रः दशभुजः शूलटङ्कखड्गवज्रदहननागेन्द्रघण्टाङ्कुशपाशाभययुक्तदशहस्तः व्याघ्रचर्म्माम्बरः भस्मलिप्तसर्व्वाङ्गः नागहारशोभितः सुधास्राव्यधोमुखार्द्धचन्द्रशेखरः । एतत्कर्णिकायां चन्द्रमण्डलमध्ये अस्युपरि स्थिता शाकिनी शक्तिः शुक्लवर्णा चतुर्भुजा पाशाङ्कुशधनुःशरकरा पीताम्बरा पञ्चवक्त्रा त्रिनेत्रेति ॥ इति पञ्चमप्रकरणम् ॥*॥

इदानीं भ्रूमध्यस्थिताज्ञाचक्रं निरूपयति आज्ञानामाम्बुजमित्यादि सप्तभिः । "आज्ञासंक्रमणं तत्र भ्रुवोराज्ञेति कीर्त्तितम्" । आज्ञानामेति अत्र भ्रुवोराज्ञासंक्रमणादाज्ञानाम । ततश्च तन्नामकं तत्प्रसिद्धमम्बुजमास्ते इति क्रियाध्याहारेणान्वयः । एतत् पद्मं भ्रूमध्ये स्थितम् ।

---

(३२) आज्ञा इति । तत्प्रसिद्धं भ्रूमध्ये आज्ञानाम पद्मम् आस्ते । कीदृशम् ? हिमकरसदृशम् अतः प्रशस्तशुभ्रं ध्यानधामनि प्रकाशो यस्य तत् । हकारक्षकारोपलक्षितदलाभ्यां परिलसितं वपुर्यस्य । कलाभ्यामिति केचित् पठन्ति । तन्मते हकारक्षकाररूपकलाभ्यां स्वरविशिष्टाभ्यामिति । पुनः कीदृशम् ? नेत्रपत्रं द्विपत्रमित्यर्थः । एतत्पद्मे सा प्रसिद्धा हाकिनी निवसति । कीदृशी ? शशिसमधवलवर्णा षण्मुखी च । हस्तैः करणैरेतान् बिभ्रती विद्याज्ञानमुद्राकपाल-

तद्यथा—

तालुकण्ठं प्रविश्योर्द्धं भ्रूयुगान्ते सितं शुभम् ।
द्विदलं हक्षवर्णाभ्यां मनोऽधिष्ठितमम्बुजम् ॥ इति ॥

पद्मं विशेषयति हिमकरसदृशमिति चन्द्रवच्छुक्लवर्णमित्यर्थः । तथा ध्यानधामप्रकाशं ध्यानस्य धाम्ना तेजसा तेजोरूपशक्त्या प्रकाशो यस्येत्यर्थः । अत्र ध्यानशक्त्या धामवत् प्रकाशितावयवमित्यर्थः । वर्णानां कलावीजत्वात्तत्र कलापदप्रयोगः । नेत्रपत्रं द्विदलम् । सुशुभ्रम् इति हक्षाभ्यां सुशुभ्रमित्यर्थः । तथाच स्वभावशुभ्रं हक्षवर्णयोगेनातिशुभ्रमिति भावः । एतेन हक्षवर्णयोरपि शुक्लत्वं सूचितं शुक्लयोगेणैव शुक्लस्यातिशय्यसम्भवात् । यद्वा आज्ञाचक्रं हिमकरसदृशं चन्द्रस्यामृतमयशीतकिरणवत् शीतकिरणं तथा सुशुभ्रञ्च । हक्षाभ्यां कर्बूरवर्णाभ्यामिति बोद्धव्यम् । तदाह ईश्वरकार्त्तिकेयसम्वादे—

आज्ञाचक्रं तदूर्द्धं तु शुक्लं द्विदलमण्डितम् ।
कर्बूरहक्षलसितं मनोऽधिष्ठितरञ्जितम् ॥ इति ॥

एतत्कर्णिकायां हाकिनीशक्तिस्थितिमाह तन्मध्ये इति । सा हाकिनी नाम्नी प्रसिद्धा । विद्यां पुस्तकमुद्रां वराभयरूपां तेनास्या भुजेषु षड्विधायुधदर्शनात् षड्भुजेयम् । केचित्तु विद्यामुद्रामित्येकविभक्त्यन्तं पठित्वा विद्यायै मुद्रां विद्यामुद्रां व्याख्यामुद्रामिति व्याख्यया अस्याश्चतुर्भुजत्वं वदन्ति । किन्तु नानापुस्तके पृथग्विभक्त्यन्तपाठो दृश्यते इति सुधीभिर्व्विवेच्यम् । ध्यानान्तरेण हाकिनीं विशेषयति—

चक्रस्थां शुक्लवर्णां डमरुकरयुताम् अक्षसूत्रं कपालं
विद्यां मुद्रां दधानां त्रिनयनविलसद्वक्त्रषड्वक्त्रयुक्ताम् ।
हारिद्रान्ने प्रसक्तां मधुमदमुदितां शुक्लमब्जं सुरूढ़ां
देवीं देवेन्द्ररत्नाकरमधुमुदितां भावयेत् हाकिनीं ताम् ॥ इति ॥

स्पष्टमन्यत् ॥ ३२ ॥

डमरुजपवटीरिति । शुद्धं चित्तं यस्याः सा तथा । [एतन्मते "कलाभ्याम्" इत्यत्र "दलाभ्याम्" इति पाठः ।]

एतत्पद्मान्तराले निवसति च मनः सूक्ष्मरूपं प्रसिद्धं
योनौ तत्कर्णिकायामितरशिवपदं लिङ्गचिह्नप्रकाशम् ।
विद्युन्मालाविलासं परमकुलपदं ब्रह्मसूत्रप्रबोधं
वेदानामादिबीजं स्थिरतरहृदयश्चिन्तयेत्तत् क्रमेण ॥३३॥

एतत्पद्मे मनःस्थितिमाह एतत्पद्मान्तराले इति । सूक्ष्मरूपमतीन्द्रियमित्यर्थः । ननु मनसोऽतीन्द्रियत्वात् तत्सत्तायां किं प्रमाणमित्याह प्रसिद्धमिति । अनादिपुरुषपरम्पराप्राप्तप्रत्यक्षकरणत्वेन प्रसिद्धम् ।

तथा—

सङ्कल्पञ्च विकल्पञ्च कुर्व्वाणा तु मनो भवेत् ।

इत्यादिशास्त्रप्रमाणसिद्धञ्च । अत्र मानसस्थानं वक्ष्यमाणवेदादिबीजस्योर्द्ध्वदेशे वक्ष्यमाणवचनात् ।

अतएव शिवलिङ्गस्थितिमाह योनौ तत्कर्णिकायामिति कर्णिकान्तस्त्रिकोणे इतरशिवपदं इतरनामकशवरूपं वस्तु निवसतीति पूर्व्वक्रियान्वयः । लिङ्गचिह्नप्रकाशं लिङ्गरूपेण भासमानमित्यर्थः । इदं लिङ्गं शुक्लवर्णं तदाह भूतशुद्धौ—

तदन्तस्थेतरं लिङ्गं स्फटिकाभं त्रिलोचनम् ॥ इति ॥

लिङ्गं विशेषयति विद्युन्मालाविलासमिति ।

अत्र प्रणवस्थितिमाह परमेत्यादि । कर्णिकायां वेदादिबीजं प्रणवोऽपि वसतीत्यन्वयः । बीजं विशेषयति परमकुलपदमिति । कुलं शक्तिस्तदत्र त्रिकोणाकारपदं स्थानं परमं विद्युदाकारादिना उत्कृष्टं कुलं पदं यस्य तादृशमित्यर्थः । तथा च तद्बीजं त्रिकोणमध्यवर्त्तीति पर्य्यवस्यति ।

---

(३३) एतदिति । एतत्पद्मे सूक्ष्मरूपेण प्रसिद्धं मनो निवसति । तस्य पद्मकर्णिकायां या योनिः तस्यामितराख्यः शिव आस्ते तस्य स्थानमित्यर्थः । लिङ्गचिह्नेन प्रकाशो यस्य । पुनः

व्यक्तमाह—

कर्णिकायां त्रिकोणस्थमात्मानं प्रणवाकृतिम् ।
ज्वलद्दीपनिभञ्चोर्द्ध्वं नादरूपं मनोहरम् ।
विन्दुर्म्मकाररूपञ्च तदूर्द्ध्वं मानसालयः ॥ इति ॥

नन्वत्र परमकुलपदस्य प्रणवाधारत्वेनापृथक्त्वे—

मूलाधारं स्वाधिष्ठानं मणिपूरमनाहतम् ।
विशुद्धमाज्ञाचक्रञ्च विन्दुर्भूयः कलापदम् ।
निबोधिका तथार्द्धेन्दुर्न्नादो नादान्त एव च ।
उन्मनी विष्णुचक्रञ्च ध्रुवमण्डलिकः शिवः ।
इत्येतत् षोड़शाधारं कथितं योगिदुर्ल्लभम् ॥

इति वचने षोड़शाधारगणनायां कलापदस्य पृथगभिधानं कथं सङ्गच्छते ? इति चेन्न । तत्कलापदं नाज्ञाचक्रस्थं किन्तु वक्ष्यमाणमहानादोर्द्ध्वे शून्यदेशे स्थितमित्येतन्महानादप्रस्तावे स्फुटीकरिष्यामः ।

ब्रह्मसूत्रप्रबोधमिति । ब्रह्मसूत्रं चित्रिणी नाड़ी तस्याः प्रबोधः प्रकाशो येनेत्यर्थः । अतएव पूर्व्वमुक्तं "प्रणवविलसिता" इति । तदिति प्रदर्शित-हाकिनीमनइतरलिङ्गवेदादिवीजरूपं तत्सर्व्वं स्थिरतरहृदयः सन् क्रमेण चिन्तयेदित्यर्थः ।

क्रमोऽत्र न ग्रन्थकारोक्तपाठक्रमः किन्तु पाठक्रमाच्छाब्दक्रमस्य बलवत्त्वात् प्रदर्शितशाब्दक्रमो गृह्यते । एवञ्च पद्मकर्णिकायां हाकिनी शक्तिस्तदूर्द्ध्वे त्रिकोणे इतरलिङ्गं तदूर्द्ध्वे त्रिकोणे प्रणवस्तदूर्द्ध्वे मन इत्येवं क्रमेण चिन्तये-दिति ॥ ३२ ॥

कीदृशम् ? विद्युन्माला इव प्रकाशो यस्य तत्तथा । परमञ्च तत् कुलञ्चेति परमकुलं मूलाधारपद्मं तदेव पदं स्थानान्तरं यस्य । ब्रह्मसूत्रस्य प्रबोधो यस्मात् । तन्मनोनिवासभूतं ब्रह्मनाड़ीवर्त्मस्थि-तानां सर्व्वेषामेव तस्मादेव ज्ञानं भवतीत्यर्थः ।

ध्यानात्मा साधकेन्द्रो भवति परपुरे शीघ्रगामी मुनीन्द्रः
सर्व्वज्ञः सर्व्वदर्शी सकलहितकरः सर्व्वशास्त्रार्थवेत्ता ।
अद्वैताचारवादी विलसति परमापूर्व्वसिद्धिप्रसिद्धो
दीर्घायुः सोऽपि कर्त्ता त्रिभुवनभवने संहृतौ पालने च ॥३४॥

एतद्ध्यानस्य फलमाह ध्यानात्मेति । उक्तरूपेण ध्यानपरायणः साधकेन्द्रः परपुरे शीघ्रगामी भवतीति सर्व्वत्र क्रियान्वयः । मुनीन्द्रः मुनिर्ध्यान-योगादिसम्पन्नस्तदिन्द्रस्तत्श्रेष्ठः । सर्व्वज्ञः पूर्व्वोक्तरूपेण सर्व्वदर्शी शास्त्र-व्यवहाररीत्यनुरूपविवेकबुद्ध्या पूर्व्वापरदर्शी ।

अद्वैताचारवादीति—

पादोऽस्य विश्वा भूतानीति तदिदं सर्व्वं ब्रह्म ।

इत्यादिश्रुतिवाक्येन

अहं देवो न चान्योऽस्मि ब्रह्मैवास्मि न शोकभाक् ।

इत्यादिवाक्येन च ब्रह्मैवैकं सद्वस्तु तदन्यदसत् प्रपञ्चसमुदायस्तु ब्रह्मभास-तया भासते इत्यवधारणमद्वैतम् । तादृशज्ञानेन यथाचारः जीवात्मपरमात्मनो-रैक्यचिन्तनादिरूपयोगस्तद्वादी तत्कथनशीलः स जनः अद्वैताचारवादी भवतीति फलितार्थः । परमापूर्व्वसिद्धिर्म्महासिद्धिस्तया प्रसिद्धः प्राधान्येन ख्यात इत्यर्थः । सोऽपि कर्त्ता त्रिभुवनभवने संहृतौ पालने चेति प्रशंसापरम् । अथवा तादृशसाधकस्य देहान्ते परमात्मनि लयात् यः सृष्टिस्थितिप्रलयकर्त्ता स एवायं भवतीति तात्पर्य्यम् ॥ ३४ ॥

---

(३४) ध्यानात्मेति । एतद्ध्यानपरो जन एवं भवतीत्याह । ध्यानात्मा ध्याननिष्ठ इत्यर्थः । स साधकेन्द्रः परपुरे शीघ्रगामी भवति । तत्तद्दिव्यभावविषये परपुरप्रवेशनं पूर्व्वमेवोक्तं तत्तु उदासीनानामेव सम्भवतीति नान्येषाम् । अद्वैताचारं वक्तुं शीलमस्येति स तथा एव भवति । स साधकः कीदृशः ? प्रकृष्टासु आदिसिद्धिषु समर्थो भवति अतो दीर्घायुर्भवत्येव । त्रिभुवन-निवासिनां उत्पत्तौ संहृतौ पालने वा स कर्त्ता । अतो ब्रह्मविष्णुशिवात्मको भवतीत्यर्थः ।

तदन्तश्चक्रेऽस्मिन्निवसति सततं शुद्धबुद्धान्तरात्मा
प्रदीपाभज्योतिः प्रणवविरचनारूपवर्णप्रकाशः।
तदूर्द्ध्वे चन्द्रार्द्धस्तदुपरि विलसद्बिन्दुरूपी मकार-
स्तदूर्द्ध्वे नादोऽसौ बलधवलसुधाधारसन्तानहासी ॥ ३५ ॥

तदाज्ञाचक्रे प्रणवयोगं विवक्षुरादौ प्रणवं विशेषयति तदन्तरिति। अस्यार्थः अस्मिन् चक्रे तदन्तस्तस्य पूर्व्वोक्तत्रिकोणस्य अन्तर्म्मध्ये यः प्रणव-विरचनारूपवर्णप्रकाशः प्रणवस्य विरचनारूपेण अकारोकारयोः सन्धियोगेन यस्त्रयोदशस्वरसदृशवर्णप्रकाशः सततं निवसति स शुद्धबुद्धान्तरात्मा इत्यन्वयः। तं विशेषयति प्रदीपाभज्योतिरिति। ननु तर्हि किं त्रयोदशस्वरसदृशवर्ण-मात्रं शुद्धबुद्धान्तरात्मा ? इत्याह तदूर्द्ध्वे चन्द्रार्द्धस्तदुपरि लसद्बिन्दुरूपी मकार इति। तेन तादृशवर्णोपरि अर्द्धचन्द्रबिन्दुयोगेन प्रकृतप्रणवस्वरूपः पर्य्यवस्यति।

तदूर्द्ध्वे नादोऽसाविति प्रणवोर्द्ध्वे अवान्तरनादोऽस्तीति। स तु बलधवल-सुधाधारसन्तानहासी बलदेवस्य धवलं सुधाधारसन्तानञ्च उपहसितुं शीलं यस्येत्यर्थात् अतिशयशुक्लवर्णो नादः।

केचित्तु तदाद्ये नादोऽसाविति पठन्ति तदाद्ये बिन्दुरूपी मकारस्याद्ये इति व्याख्यायन्ति च। तदसत्। तदुपरि विलसद्बिन्दुरूपी मकार इत्यनेन मकाराद्ये नादप्राप्तौ पुनस्तदुपादानं व्यर्थं स्यात्। परन्त्वसौ नादः प्रणव-घटकीभूतनादातिरिक्तो भिद्यमानपरबिन्दोरवयवविशेषः प्रणवोर्द्ध्वे वर्त्तते। यदि तु विशिष्टप्रणवनिरूपणे तदङ्गप्रत्यङ्गमेव वक्तुमुचितं कथं तदतिरिक्तनादो-

---

(३५) तदन्तरिति। तदूर्द्ध्वं अस्मिन् चक्रे सततमेव प्रणवविरचना प्रणवं विरचयति येन ओंकारेण तद्रूपाक्षरप्रकाशो निवसति। कीदृशः ? शुद्धबुद्धीनां अन्तरात्मस्वरूपः। यद्वा शुद्धै-र्जनैरवगत अन्तरात्मा अस्य। तथा प्रदीपस्य आभा इव ज्योतिर्य्यस्य तस्य ओंकारस्योपरि चन्द्रार्द्धः तदुपरि प्रकाशद्बिन्दुरूपो मकारः। एतेन आज्ञाख्यपद्मस्योपरि प्रणवप्रकारसिद्धिः तस्योपरि असौ नादो वक्राकृतिः। कीदृशः ? जलस्य जलकणस्य धवलामृतश्रेणिरिव हासो दीप्तिर्यस्येति स तथा। [एतन्मते "जलधवलसुधाधारसन्तानहासः" इति पाठः]।

इह स्थाने लीने सुसुखसदने चेतसि पुरं
निरालम्बां बद्ध्वा परमगुरुसेवासुविदिताम् ।
तदभ्यासाद्योगी पवनसुहृदां पश्यति कणान्
ततस्तन्मध्यान्तः प्रविलसितरूपानपि सदा ॥ ३६ ॥

ऽप्रस्तुतः प्रस्तूयते इति चेत्तर्हि तदाद्ये नादोऽसाविति पाठोऽभिमन्यते । किन्तु तस्यायमर्थः । तदाद्ये बिन्दुरूपिमकाराद्ये प्रदर्शितोऽसौ नादः बलधवल-सुधाधारसन्तानहासीति पूर्व्वोक्तनादमनूद्य बलधवलेत्यादिविशेषणं विधीयते । "न तु विशिष्टस्य विधानम्" अतो न पौनरुक्तिदोषः ॥ ३५ ॥

प्रणवं निरूप्य इदानीं तद्योगं निरूपयति इह स्थाने इति । अस्यार्थः योगी जनः पुरं बद्ध्वा कुतुकेनान्तःपुरं संरुध्य तत्प्रकारेणान्तःपुररोधकावनी-भूतयोनिमुद्रां बद्ध्वा इति यावत् । तेन पुःशब्देन योनिमुद्रा लक्ष्यते । तन्मुद्रां बद्ध्वा इह स्थाने आज्ञाचक्रे तदभ्यासात् तस्य प्रणवस्य पुनः पुन-श्चिन्तनात् तत्र चेतसि प्रणवचतुर्द्दिक्षु लीने सति ततस्तदनन्तरं तन्मध्यान्तः-प्रणवाधारत्रिकोणमध्ये अन्तरन्तरीक्षे पवनसुहृदां वह्नीनां कणान् वह्निकणाव-वज्ज्योतिःस्फुलिङ्गान् पश्यति तेषां मानसप्रत्यक्षो भवति इत्यर्थः । अत्र पुरबन्धनं विना मनसः शुद्धस्थैर्य्यं न सम्भवतीत्यतः पुरं बद्ध्वेत्युक्तम् । पुरबन्धन-कारणयोनिमुद्रालक्षणमाह—

ततो गुह्ये वामपादपार्ष्णिन्तु विनिवेशयेत् ।
तस्योपरि महादेवि दक्षपार्ष्णिं निवेशयेत् ॥
ऋजुकायशिरोग्रीवङ्काकचञ्चुपुटेन च ।
आकारेण वहिर्व्वायुं जठरं परिपूरयेत् ॥

---

(३६) इह स्थाने इति । अत्यर्थसुखसदने इह स्थाने चेतसि लीने सति परमगुरुसेवा-सुविदितां निरालम्बां मुद्रां बद्ध्वा सर्व्वदाभ्यासात् योगी सन् पवनसुहृदां जीववह्नीनां कलां

अङ्गुलीभिर्दृढं बद्धा करणानि समाहितः।
अङ्गुष्ठाभ्यामुभे श्रोत्रे तर्ज्जनीभ्यां विलोचने॥
नासारन्ध्रे च मध्याभ्यामन्याभिर्व्वदनं दृढम्।
बद्धा मे प्राणमनसामैकत्वं तन्मनं स्मरन्।
धारयेन्मारुतं सम्यक् योगोऽयं योगिवल्लभः॥ इति॥

एवं मुद्रया वायुरोधे मनसः स्थैर्य्यमाह श्रुतिः। एवं हंसवशात्मनो विचर्य्यति इतस्ततो विषयेषु भ्रमति तत्संयमेन मनःसंयमो जायते इत्यर्थः।

अथवा पुरं खेचरीमुद्रां बद्धा इत्यर्थः। तयापि मनःस्थैर्य्यं भवति।

तदाह—

चित्तञ्चरति खे यस्मात् जिह्वा चरति खे यतः।
तेनेयं खेचरी मूद्रा सर्व्वसिद्धिनमस्कृता॥ इति॥

अत्र चित्तस्य खेचरत्वान्मनःसंयोगाभावेन विषयज्ञानरहितत्वादुन्मनी भवति। अतएवोक्तम्—

उन्मन्या सहितो योगी न योगी उन्मनीं विना॥ इति॥

प्रणवस्य ज्योतिःस्फुलिङ्गवेष्टितत्वं स्पष्टमाहान्यत्र—

तदूर्द्ध्वे प्रणवाकारमात्मानं दीपसन्निभम्।
स्फुलिङ्गज्योतिरिङ्गाभैर्व्वेष्टितं परितः शुभम्॥ इति॥

स्थाने कीदृशे ? सुसुखसदने निरवच्छिन्नसुखस्य सदनं यत्र तादृशे। पुरं किम्भूतां निरालम्बां निर्गतोऽवलम्बो मनसो विषयसम्बन्धो यया तादृशीमित्यर्थः। तथा परमगुरुसेवासुविदितामिति परमः गुरुपरम्पराप्राप्तयोगाभ्यासनिपुणः तादृशगुरुः तस्य सेवाभिर्ज्ज्ञातक्रपयोपदेशेन सुविदितामिति फलितार्थः। अतएवोक्तम्—

गुरूपदेशात्तद्गम्यं नान्यथा शास्त्रकोटिभिः॥ इति॥

कणान् किम्भूतान् ? प्रविलसितरूपान् प्रकृष्टरूपेण भासमानान् इति॥ ३६॥

पश्यति। अस्य स्थानस्य चेतोलीनत्वम् आश्चर्य्यं महः यदि भवति तदैव निरालम्बा मुद्रा भवति। तदनुभवो योगिभिरेव ज्ञायते। ततस्तन्मध्येऽम्बरे पदान् स्थूलान् रूपान् पश्यति।

ज्वलद्दीपाकारं तदनु च नवीनार्कबहुल-
प्रकाशं ज्योतिर्व्वा गगनधरणीमध्यमिलितम् ।
इह स्थाने साक्षाद्भवति भगवान् पूर्णविभवो-
ऽव्ययः साक्षी वह्नेः शशिमिहिरयोर्म्मण्डल इव ॥ ३७ ॥

तादृशयोगिनां वह्निकणावान्तरप्रकारदर्शनमपि भवतीत्याह ज्वल-द्दीपाकारमिति । तदनु वह्निकणादर्शनमनु दर्शनान्तरं ज्योतिः पश्यतीत्यर्थः ।

ज्योतिर्व्विशेषयति ज्वलद्दीपेत्यादि गगनधरणीमध्यमिलितमिति । गगनं "तदूर्द्ध्वे शङ्खिन्या निवसति शिखरे शून्यदेशे विकाशम्" इत्यनेन प्रदर्शितशङ्खिनी-नाड्यूर्द्ध्वशून्यरूपगगनं धरणी मूलाधारस्थधरामण्डलं तदुभयोर्म्मध्यमिलितं मूलाधारादिसहस्रारपर्य्यन्तव्याप्तं ज्योतिरिति विशिष्टार्थः । वेति वाशब्दः समुच्चयार्थः ।

आज्ञाचक्रे सहस्रारवत् परमशिवस्थितिमाह इह स्थाने इति । भगवान् परमशिवः इह स्थाने साक्षाद्भवति स्वयं वर्त्तते इत्यर्थः । भगवन्तं विशेषयति पूर्णविभव इत्यादि । पूर्णः स्वात्मनि परिपूर्णः सृष्टिकर्त्तृत्वाद्यशेषयोग्यता-रूपविभवो यस्येत्यर्थः । अथवा विभवोऽनन्तसृष्टिप्रपञ्चसमुदायः पूर्णः सर्व्वव्यापकत्वेन स्थितः तादृशविभवो यस्मादित्यर्थः । "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति" इति श्रुतेः । यद्वा विभवो विभुत्वं पूर्णः सर्व्वव्यापकत्वेन स्थितस्तादृशः विभवो यस्येत्यर्थः । यद्वा पूर्णत्वं फलानुपहितविषयितानास्पदेच्छाकत्वं तादृशो विभवो

(३७) ज्वलद्दीपाकारमिति । पदान् रूपान् किम्भूतान् ? ज्वलद्दीपस्येवाकारो येषां ते तथा । तत्रैव गगनधरणीवीजयोर्म्मध्ये स्थितं ज्योतिरास्ते । गगनधरणीमण्डलयोरन्तःस्थितं तद्वीजमिति यावत् । ज्योतिः कीदृशम् ? प्रातःकालीनसूर्य्यस्येव प्रकाशो यस्य तत् तथा । इह स्थाने अर्थात् चेतसि लीने श्रीभगवान् साक्षात् भवति । कीदृशः ? पूर्णः विभवः ज्ञानं यस्मात् । न व्ययति इत्यव्ययः । अतः सर्व्वेषां साक्षी एतेषां तत्स्थानाधिवासभूतत्वात् । वह्निशशिमिहिराणां मण्ड-लम् इव प्रकाशते अत्यर्थतेजोमयत्वात् ॥ [एतन्मते "ज्वलद्दीपाकारान्" इति पाठः] ।

यस्येति निगूढ़म्। आत्मातिरिक्तवस्तूनामनित्यत्वादाकाशादीनां विभुत्वं न सर्व्वकालव्यापकमिति विशेषः। अत्र परमशिवस्थितिं विशेषेण व्यनक्ति निर्व्वाणतन्त्रे—

एतत्पद्मस्योर्द्ध्वदेशे ज्ञानपद्मं सुदुर्लभम्।
पत्रद्वयसमायुक्तं पूर्णचन्द्रस्य मण्डलम्॥

तथा—

शम्भुवीजं हि तन्मध्ये साकारं हंसरूपकम्।

तथा—

एवं हंसो मणिद्वीपे तस्य क्रोड़े परः शिवः।
वामभागे सिद्धकाली सदानन्दस्वरूपिणी॥ इति॥

तस्य क्रोड़े हंसः इत्यस्य विन्दुद्वयरूपविसर्गमध्ये। तदाह सहस्रारमुपक्रम्य—

विन्दुद्वयन्तु तन्मध्ये विसर्गरूपमव्ययम्।
तन्मध्ये शून्यदेशे तु शिवः परमसंज्ञकः॥ इति॥

एवं सहस्रारे दर्शनादत्राप्याकाङ्क्षायां तथा इति। अत्रानयोः शिवशक्त्यो-र्मायावस्त्रनाच्छादनेन मकारात्मरूपपरंविन्दुरूपेण स्थितिर्व्वोध्या।

तदुक्तं आज्ञाचक्रमुपक्रम्य—

उत्कलादिमतेऽत्रैव चणकाकाररूपिणी।
सृष्टिं करोति भूतानि अत्र स्थित्वा सनातनी॥ इति॥

अत्र चणकाकाररूपः परमशिवः सदा वर्त्तते। उत्कलादिमते तु अत्र स्थित्वा सृष्टिं करोतीत्यर्थः। दृष्टान्तमाह वह्नेरित्यादि। यथार्केन्दुग्नि-मण्डले भगवान् वर्त्तते तथात्रापीत्यर्थः। अर्कादिमण्डले भगवतोऽवस्थानं प्रसिद्धम्। यद्वा वह्निशशिमिहिरमण्डले सहस्रकमलस्यार्केन्दुग्निमण्डले यथा चणकाकारेण भगवान् वर्त्तते तद्वदत्रापीति। सहस्रदलेऽर्केन्दुग्नि-मण्डलानि प्रदर्शयिष्यन्ते। अतएव पीठपूजायामर्केन्दुग्निमण्डलोपरि परमात्म-ज्ञानात्मनोः पूजा विधीयते। परमात्मा परमशिवः ज्ञानात्मा ज्ञानशक्ति-स्तदुभयाभिन्नशिवशक्त्यात्मकचणकाकारविन्दुरिति ध्येयम्॥ ३७॥

इह स्थाने विष्णोरतुलपरमामोदमधुरे
समारोप्य प्राणं प्रमुदितमनाः प्राणनिधने ।
परं नित्यं देवं पुरुषमजमाद्यं त्रिजगताम्
पुराणं योगीन्द्रः प्रविशति च वेदान्तविदितम् ॥ ३८ ॥

आज्ञाचक्रे योगिन प्राणत्यागफलमाह इह स्थाने इति । अस्यार्थः योगीन्द्रो जनः प्राणनिधने प्राणवियोगकाले प्रमुदितमनाः आत्मानन्देन हृष्टचित्तः सन् इह आज्ञाचक्रे विष्णोर्भगवतः स्थाने उपदर्शितविन्दुरूपे प्राणं समारोप्य अथवा तद्विन्दौ प्राणं समारोप्य प्राणनिधने सति परं पुरुषं प्रविशतीत्यन्वितार्थः । पुरुषं विशेषयति नित्यमविनाशिनम् । देवं सृष्टिस्थितिप्रलयैः क्रीड़न्तम् । अजं जन्मरहितम् । त्रिजगतामाद्यं अनेन सर्व्वेषां पूर्व्ववर्त्तित्वात् सर्व्वकारणत्वं सूचितम् । पुराणं पुराणपुरुष इति कृत्वा यो निगद्यते स एवायमिति भावः । वेदान्तो ब्रह्मनिरूपकश्रुतिवाक्यादिः तज्ज्ञानज्ञाप्यमित्यर्थः ॥ ३८ ॥ * ॥

तदयं विष्णोः स्थाने प्राणारोपणप्रकारः । प्राणवियोगकालं ज्ञात्वा ब्रह्मणि लीनो भवतीत्यानन्दितमनाः योगासनमासीनः सन् कुम्भकेन वायुं संरुध्य हृदिस्थं जीवात्मानं मूलाधारमानीय गुदमाकुञ्च्य यथोक्तविधानेन कुण्डलिनीमुत्थाप्य मूलादिब्रह्मरन्ध्रान्तं तड़िदाकारमानन्दं कुण्डलिनीमयं सूत्ररूपं नादं ध्यात्वा प्राणरूपश्वासपरमात्मकं हंसं तन्नादे विलाप्य जीवेन सह चक्रभेदक्रमेणाज्ञाचक्रमानीय तत्र स्थितायां कुण्डलिन्यां स्थूलसूक्ष्मक्रमात् पृथिव्यादिप्रपञ्चसमुदायं विलाप्य तां पुनर्जीवात्मना सह तत्र स्थितशिवशक्ति-

---

(३८) इह स्थाने इति । विष्णोरतुलपरमामोदमधुरे इह स्थाने योगी प्राणवियोगसमायोगसमये प्राणान् मनश्च समारोप्य प्रकृष्टमुदितमनाः सन् परं पुरुषमेव प्रविशति निर्व्वाणमुक्तिं प्राप्नोतीति शेषः । कीदृशं परम् ? सर्व्वेषामन्तर्भूतं नित्यं दैन्यम् । दिव्यतीति देवम् । न जायते इत्यजम् । त्रिजगतामाद्यम् । पुराणं सृष्टिस्थितिप्रलयकारणम् । वेदान्तविहितं वेदान्तमतमेतदिति । [एतन्मते "वेदान्तविहितम्" इति पाठः] ।

लयस्थानं वायोस्तदुपरि च महानादरूपं शिवाङ्कं
सिराकारं शान्तं वरदमभयं शुद्धबुद्धिप्रकाशम् ।
यदा योगी पश्येद्गुरुचरणयुगाम्भोजसेवासुशील-
स्तदा वाचां सिद्धिः करकमलतले तस्य भूयात् सदैव ॥३८॥

मयबिन्दुनैकीभावमापाद्य तिष्ठेत्। ततो ब्रह्मरन्ध्रभेदेन देहं त्यक्त्वा ब्रह्मणि लीनो भवेदिति ॥ * ॥

तदर्थं महावाक्यार्थनिर्णयः। आज्ञाचक्रं द्विदलं शुक्लवर्णं कर्बूरवर्णहक्षद्वययुक्तपत्रम्। कर्णिकायां चक्राधिष्ठात्री हाकिनी शक्तिः शुक्लवर्णा रक्तषड्वक्त्रा त्रिनेत्रा षड्भुजा वराभयाक्षमालाकपालडमरुपुस्तकधरा शुक्लपद्मोपरि स्थिता। तदूर्द्ध्वं त्रिकोणे इतरलिङ्गः शुक्लवर्णः विद्युदाकारः। तदूर्द्ध्वत्रिकोणे प्रणवाकृतिरन्तरात्मा प्रदीपाभज्योतिः। तस्य चतुर्द्दिक्षु अन्तरीक्षे ज्योतिःस्फुलिङ्गविम्बैर्व्वेष्टितः ज्वलद्दीपसदृशेन स्वतेजसा मूलादिब्रह्मरन्ध्रान्तप्रकाशकः। तदूर्द्ध्वं सूक्ष्मरूपं मनः। तदूर्द्ध्वं चन्द्रमण्डले हंसक्रोड़े परमशिवः सशक्तिक इति ॥ इति षष्ठप्रकरणम् ॥ * ॥

इदानीमाज्ञाचक्रोर्द्ध्वं सहस्रदलकमलाधःस्थानवर्त्तिकारणावान्तरशरीरं निरूपयितुमिच्छन्नाह लयस्थानं वायोरिति। अस्यार्थः यदा यस्मिन् काले योगी जनः गुरुचरणयुगाम्भोजसेवासुशीलः गुरुचरणयुगाम्भोजस्य सेवया सुशोभनं दृढ़तरैकाग्रमनोऽभिनिवेशेन सर्व्वाङ्गसुन्दरं शीलं योगानुष्ठानरूपसद्वृत्तं यस्य तादृशः सन् तदुपरि आज्ञाचक्रोर्द्ध्वं महानादरूपं महानादस्य रूपं पश्येत् तदा तस्य योगिनः करकमलतले सदा सर्व्वस्मिन् काले वाचां सिद्धिः वाक्यसिद्धिर्भूयादेवेत्यन्वितार्थः।

---

(३८) लयस्थानमिति। एतत् स्थानं वायोर्व्विरामभूतम्। तदुपरि महानादरूपं योगी जनो यदा पश्येत् तदा तस्य वाक्‌सिद्धिरपि करपद्मतले सदैव भूयात्। कीदृशम्? शिवो हकारः तदाकारं शिवदेव्योरर्द्धाङ्गस्वरूपं यस्य हरगौर्य्यात्मकत्वात्। शान्तं सौम्यमूर्त्तिम्। वरान् ददाति अभयमपि। सुबुद्धीनां प्रकाशो यस्मात्। योगी कीदृशः? गुरुचरणसेवासुशील इति गुरुचरणसेवैतदुपदेश इत्यर्थः।

नादं विशेषयति लयस्थानं वायोरिति। अत्र महानादे वायोर्लयः यस्मादुत्पत्तिः तत्र लयनियमात्। यद्यपि भूतशुद्ध्यादौ स्पर्शतत्त्वे वायोर्लयस्तस्य च व्योम्नि लयो दृश्यते तथापि कदाचित् नादेऽपि वायोर्लयो भवतीति। अत्र "पृथिवीकाराद्रसवती रसादजायत ककारात् सर्व्वाणि जलानि तीर्थानि रेफाद्वह्नितत्त्वं नादाद्वायुः सर्व्वप्राणमयः विन्दोर्गगनं सर्व्वशून्यं शब्द-मयं तेभ्यः पञ्चविंशतिगुणमयतत्त्वं सर्व्वमिदं विश्वं ब्रह्माण्डं कालिकामयम्" इति श्रुतिवाक्येन कालीमन्त्रवर्णस्य सूक्ष्मे संहरणकाले नादे वायोर्लयो भवतीति ध्येयम्। शिवार्द्धमिति। शिवस्यार्द्धनारीश्वरत्वात् तदर्द्धं शक्तिस्तद्रूपं नादमित्यर्थः। सिराकारमिति दन्त्यादिसिरोलाङ्गलस्तदाकारमित्यर्थः।

तदूर्द्ध्वे तु महानादो लाङ्गलाकृतिरुज्ज्वलः।

इति कार्त्तिकेयेश्वरसम्वादवाक्यात्। यद्यपि "कृषिको लाङ्गलं हलं गोदा-रणञ्चसीरश्च" इत्यमरकोषे लाङ्गलवाचकसीरशब्दस्य चतुर्थस्वरयोगित्वं तथाप्यत्र वचनान्तरैकवाक्यतानुरोधेन तृतीयस्वरयुक्तसिरः पदेनापि लाङ्गलः प्रतीयते इति। अथवा शिवाकारमिति तेन शिवशक्तिमयोऽयं नादः।

तदुक्तं प्रपञ्चसारे—

नादात्मना प्रबुद्धा सा निरामयपदोन्मुखी।
शिवोन्मुखी यदा शक्तिः पुंरूपा सा तदा स्मृता॥ इति॥

अतएव "तस्या एव शक्तेर्नादविन्दूपृषत्युपयोग्यरूपौ" इति राघवभट्टेना-प्युक्तम्।

अन्यत्र—

सातत्यसंज्ञा चिन्मात्रा ज्योतिषः सन्निधेस्तथा।
विचिकीर्षुर्घनीभूय क्वचिदभ्येति विन्दुताम्॥ इति॥

तथा श्रीमदाचार्य्यवाक्यम्। "नाद एव घनीभूतः क्वचिदभ्येति विन्दुताम्" इति। अत्र सकलवचनपर्य्यालोचनया शक्तिरेव नादविन्दुरूपेणावि-र्भूता सुवर्णकुण्डलमिव। नादविन्दुः पुनरेकाकारैव इति निष्कर्षः। वरदातार-मित्यर्थः॥३९॥

तदूर्द्धे शङ्खिन्या निवसति शिखरे शून्यदेशे प्रकाशं
विसर्गाधः पद्मं दशशतदलं पूर्णचन्द्रातिशुभ्रम्।
अधोवक्त्रं कान्तं तरुणरविकलाकान्तिकिञ्जल्कपुञ्जं
ललाटाद्यैर्व्वर्णैः प्रविलसितवपुः केवलानन्दरूपम् ॥४०॥

अथ समाधिरूपयोगानुशीलनसाधकानां समाधिकालात् प्रागेवं विचिन्त्यातिप्रयत्नः स्थूलसूक्ष्मक्रमात् सर्व्वं चिदात्मनि विलापयेदित्याचार्य्यवचनेन समाधेः पूर्व्वं स्थूलसूक्ष्मरूपसृष्टिप्रपञ्चसमुदायचिन्तनविधानात् तज्ज्ञानस्यावश्यकत्वादत्र वदन्ति। तत्र तावत् पृथिव्यादि पञ्च स्थूलरूपाणि मूलादिविशुद्धान्तचक्रे उक्तानि तदाश्रितत्वात् मूलाधारे भूमण्डले पादघ्राणेन्द्रियगन्धतत्त्वेति त्रिः। जलमण्डले पाणिरसनेन्द्रियरसतत्त्वेति त्रिः। वह्निमण्डले पायुचक्षुरिन्द्रियरूपतत्त्वेति त्रिः। वायुमण्डले उपस्थत्वगिन्द्रियस्पर्शतत्त्वेति त्रिः। नभोमण्डले वाक्श्रोत्रेन्द्रियशब्दतत्त्वेति त्रिरिति समुदायेन पञ्चदशतत्त्वानि वर्त्तन्ते। पृथिव्यादिना मिलित्वा विंशतितत्त्वानि स्थूलानि बोद्धव्यानि। इदानीं सूक्ष्मरूपाणि विधीयन्ते। तत्राज्ञाचक्रे सूक्ष्मरूपं मनः स्वयं प्रदर्शितम्। अपराण्याह कङ्कालमालिनीतन्त्रे आज्ञाचक्रमुपक्रम्य—

मनश्चात्र सदा भाति हाकिनीशक्तिरञ्जितम्।
बुद्धिप्रकृत्यहङ्कारालङ्कृतं तैजसं परम्॥ इति॥

अत्र बुद्धिप्रकृत्यहङ्कारात्मकसूक्ष्मरूपत्रयाणां स्थितिः प्रतीयते। तत्राहङ्कारस्य न पाठक्रमात् स्थितिः मूलाधारादि सर्व्वत्र पृथिव्यादिजनकस्य तत्तद्विलयाधारस्य च जन्यविलाप्ययोरधःस्थितिदर्शनात् पाठक्रमाच्छाब्दक्रमस्य बलवत्त्वाच्चात्रापि तथा स्थितिः कल्प्यते। तेन "अहङ्कारे हरेद्व्योम सशब्दं

---

(४०) तदूर्द्धे इति। तस्य महानादस्य ऊर्द्धे महाशङ्खिन्याश्च शिखरसमदेशे शून्यनिरालम्बे विसर्गस्याधः प्रकाशरूपं सहस्रदलपद्मं निवसति। अत्यर्थपूर्णचन्द्र इव शुभ्रं अधोवक्त्रं कान्तं तरुणरविकला इव कान्तं किञ्जल्कपुञ्जं यस्य। ललाटाद्यैर्ललाटादिविन्यस्तैरकारादिपञ्चाशद्वर्णैर्व्विंशतिप्राकारेण परिलसिततनुः केवलानन्दस्वरूपमिति।

तन्महत्यपि" इति वचनात् व्योम्नो विलयार्थं तद्विलयाधिकरणस्याहङ्कारस्य प्रथमोपस्थितं तदादावहङ्कारस्तदूर्द्ध्वं बुद्धिप्रकृत्योः स्थितिः । एतेषां जन्यजनक-भावमाह सारदायाम्—

भूलभूतात्ततोऽव्यक्तात् विकृतात् परवस्तुनः ।
आसीत् किल महत्तत्त्वं गुणान्तःकरणात्मकम् ।
अभूत्तस्मादहङ्कारस्त्रिविधः सृष्टिभेदतः ॥ इति ॥

विकृतादिति इदं परवस्तुनः प्रतिविम्बत्वेन विकृतिरूपं महत्तत्त्वादीनां प्रकृतित्वात् प्रकृतिनामकञ्च । अतएवोक्तम्—

प्रकृतिः परमा शक्तिर्व्विकृतिः प्रतिविम्बता ॥ इति ॥

तथा परंब्रह्मात्मप्रकृतिप्रतिविम्बस्वरूपिणीति प्रागुपदर्शितम् । सारदा-वचने महत्तत्त्वमिति । यदेव महत्तत्त्वं सैव बुद्धिः । तदाह ईशानशिवेन—

बोद्धव्यलक्षणा सैव प्रकृतिः शक्तिजृम्भिता ।
बुद्धितत्त्वं भवेद्व्यक्तं सात्त्विकं गुणमाश्रिता ।
सैव बुद्धिर्म्महन्नाम तत्त्वं सांख्ये प्रगीयते ॥ इति ॥

महत्तत्त्वन्तु गुणान्तःकरणात्मकम् । गुणाः सत्त्वरजस्तमोरूपाः । अन्तः-करणमाह सारदायाम् "अन्तःकरणमात्मनः मनोबुद्धिरहङ्कारश्चित्तञ्च परि-कीर्त्तितम्" इति । एतत्समुदायात्मकं महत्तत्त्वम् । ननु मनसो महत्तत्त्वान्त-र्गतत्वे तदन्तश्चक्रेऽस्मिन् प्रविलसति मनः सूक्ष्मरूपमित्यनेन पृथगभिधानं कथं सङ्गच्छते इति चेन्न तन्मनो न महत्तत्त्वान्तर्गतं किन्तु तदहङ्कार-जन्यमतिरिक्तम् । तदाह—

"यतोऽपरं मनस्तत्त्वं ससङ्कल्पविकल्पकम् ।
तैजसादेव तज्जातम्" इति राघवभट्टः ।

एवञ्चाज्ञाचक्रस्थमनःपर्य्यन्तानां क्रमेण स्थितेर्व्विहितत्वात् तदूर्द्ध्वेऽह-ङ्कारादीनां स्थितिर्बोध्या । ततश्चाज्ञाचक्रे हाकिनी इतरलिङ्गप्रणवमनो-ऽहङ्कारबुद्धिप्रकृतीनामव्यवहितोर्द्ध्वोर्द्ध्वक्रमेण स्थितिनिरूपणात् स्थानविशेषा-नभिहितस्य पूर्व्वदर्शितचन्द्रमण्डलस्य तेषामूर्द्ध्वे स्थितिरिति । ननु तेषामधः

कथं न क्षीयते इति चेन्न। "इन्दुर्ललाटदेशे च तदूर्द्धे बोधिनी स्वयम्" इति सम्मोहनतन्त्रवचनेन वक्ष्यमाणाज्ञाचक्रोर्द्धवर्त्तिन्योः समनियतयोरिन्दुबोधिन्यो-रधोभागे स्थितिबोधनात् तयोरव्यवधानाय सर्व्वोर्द्धे एव तस्य स्थितिरिति।

अथाज्ञाचक्रोर्द्धे कारणरूपमाह सम्मोहनतन्त्रे—

इन्दुर्ललाटदेशे च तदूर्द्धे बोधिनी स्वयम्।
तदूर्द्धे भाति नादोऽसावर्द्धचन्द्राकृतिः परः॥
तदूर्द्धे च महानादो लाङ्गलाकृतिरुज्ज्वलः।
तदूर्द्धे च कला प्रोक्ता आञ्जीति योगिवल्लभा।
उन्मनी तु तदूर्द्धे च यद्गत्वा न निवर्त्तते॥ इति॥

तदूर्द्धे बोधिनीत्यत्र तदूर्द्धे ललाटोर्द्धे आज्ञाचक्रोर्द्धे इति यावत्। बोधिन्यधःस्थले विन्दुस्थितिमाह भूतशुद्धितन्त्रे—

विन्दुर्म्मात्रार्द्धतो देवि तदूर्द्धं नादसंज्ञितम्।
लयस्थानं तथा वायोर्म्महानादं तदूर्द्धतः॥ इति॥

मात्रार्द्धं शक्तिः।

वालसूर्य्यप्रतीकाशमासीद्विन्दुमदक्षरम्।
तदूर्द्धे चार्द्धमात्रा तु गान्धाररागमाश्रिता॥

इति बृहत्त्रिविक्रमसंहितावचनेनार्द्धमात्रायाः शक्तिवाचकत्वप्रतीतेः। अत्र द्वयोर्व्वचनयोरेकवाक्यतया यार्द्धमात्रा सैव बोधिनीति बोध्यम्। विन्दु-बोधिनीनादेति त्रयं विन्दुमयपरशक्ते रूपविशेषः।

तदाह सारदायाम्—

सच्चिदानन्दविभवात् सकलात् परमेश्वरात्।
आसीच्छक्तिस्ततो नादो नादाद्विन्दुसमुद्भवः॥
परशक्तिमयः साक्षात्त्रिधासौ भिद्यते पुनः।
विन्दुर्नादो वीजमिति तस्य भेदाः समीरिताः॥
विन्दुर्नादात्मको वीजं शक्तिर्नादस्तयोर्म्मिथः।
समवायः समाख्यातः सर्व्वागमविशारदैः॥ इति।

परशक्तिमय: पर: शिवस्तेन शिवशक्तिमयो विन्दु: । अयं ललाटोर्द्धे स्थितो विन्दुर्नादात्मक: शिवात्मक: ।

वीजं शक्तिर्बोधिनीरूपमित्यर्थ: । नादस्तयो: समवाय: सम्बन्ध: चोभ्यचोभकरूपस्तेनायं क्रियाशक्तिरूप: एतत्त्रयोर्द्धे महानाद: पूर्व्वोपदर्शित: ।

तदूर्द्धे च कला प्रोक्ता इति । कला पंक्ति: । आञ्जीति तिर्य्यक् रेखारूपमालाकारा इत्यर्थ: । इयं शक्ति: सृष्ट्यादौ आविर्भूता । तदुक्तं पञ्चरात्रे—

एवमालोक्य सर्गादौ सच्चिदानन्दरूपिणीम् ।
समस्ततत्त्वसंघातां सृष्ट्यधिष्ठातृरूपिणीम् ।
व्यक्तां करोति नित्यां तां प्रकृतिं परम: पुमान् ॥ इति ॥

अन्यत्र—

शिवशक्तिसमायोगादव्यक्तात् परमेश्वरात् ।
आद्या भगवती देवी सैव त्रिपुरसुन्दरी ।
आसीच्छक्तिस्ततो नादो नादाद्विन्दुसमुद्भव: ॥ इति ॥

उन्मनी तु तदूर्द्धे चेति । तल्लक्षणमाह—

यत्र गत्वा तु मनसो मनस्त्वं नैव विद्यते ।
उन्मनी सा समाख्याता सर्व्वतन्त्रेषु गोपिता ॥ इति ॥

ततश्च मनोवृत्तिमद्विषयावलम्बनचेष्टाकालीनविषयावलम्बनसामान्याभावसम्पादनं तत्त्वमुन्मनीत्वमिति । सा च द्विविधा सहस्राराधारा निर्वाणकुलारूपा एतत्स्थानस्थिता वर्णावलीरूपा ।

तथा च कङ्कालमालिनीतन्त्रे—

सहस्रारकर्णिकायां चन्द्रमण्डलमध्यगा ।
सर्व्वसङ्कल्परहिता कला सप्तदशी भवेत् ।
उन्मनी नाम तस्या हि भवपाशनिकृन्तनी ॥ इति ॥

तथा—

उन्मनीञ्च मालावर्णं स्मरणात् मोक्षदायिनी ॥ इति ।

मालावर्णं वर्णावलीरूपमित्यर्थ: ।

उन्मन्यधः समनीमाह भूतशुद्धौ—

तते हि व्यापिका शक्तिराज्ञीति यां विदुर्ज्जनाः ।

समनीमूर्द्धतस्तस्या उन्मनीन्तु तदूर्द्ध्वतः ॥ इति ॥

इदमपि परशक्तेरवान्तररूपम् । ततश्चाज्ञाचक्रोर्द्ध्वे द्वितीयविन्दुः शिवस्वरूपः। तदूर्द्ध्वे अर्द्धमात्राकारा बोधिनीशक्तिस्तदूर्द्ध्वे शिवशक्तिसमवायरूपाऽर्द्धचन्द्राकृतिर्नादस्तदूर्द्ध्वे लाङ्गलाकृतिर्म्महानादस्तदूर्द्ध्वे आज्ञीरूपा व्यापिकाशक्तिः तदूर्द्ध्वे समनी तदूर्द्ध्वे उन्मनीति क्रमेण सप्तकारणरूपाणि वर्त्तन्ते ।

अलमतिविस्तरेण प्रकृतमनुसरामः । सहस्रदलपद्मं निरूपयन्नाह तदूर्द्ध्व इति दशभिः । तदूर्द्ध्वे प्रागुपदर्शितसर्व्वेषामूर्द्ध्वे पूर्व्वोपदर्शितशङ्खिनीनाड्याः शिखरे मस्तके शून्यदेशे नाड्यनावृतस्थाने तेन सुषुम्नाया अपि ऊर्द्ध्वे इति सूचितम् । विसर्गस्याधः दशशतदलं सहस्रदलं पद्मं निवसति इत्यन्वयः ।

विसर्गन्तु ब्रह्मरन्ध्रस्योर्द्ध्वभागे—

तस्मिन् रन्ध्रे विसर्गञ्च नित्यानन्दं निरञ्जनम् ॥

इत्यादि वक्ष्यमाणवचनात् ।

पद्मं विशेषयति पूर्णचन्द्रेत्यादि । ल-काराद्यैर्व्वर्णैः प्रविलसितवपुरिति । अत्र ल-कारग्रहणं न विलोमेन वर्णचिन्तनार्थं किन्तु ल-कारग्रहणं क्ष-कारपरित्यागार्थम् । तत्त्यागवीजं हि वर्णानां सहस्रदले स्थितिरावर्त्तनेनैव घटते । एवञ्च क्ष-कारसहितैकपञ्चाशद्वर्णानां विंशत्यावर्त्तने विंशत्यधिकसहस्रसंख्या भवन्ति । ऊनविंशत्यावर्त्तने तु एकत्रिंशन्न्यूनसहस्रसंख्या भवन्ति । अतः क्ष-कारपरित्यागेन तत् समाधीयते । तेन अ-कारादिल-कारान्तपञ्चाशद्वर्णा अनुलोमेन विंशत्यावर्त्तनेन सहस्रदले चिन्तनीया इति ध्येयम् । अनुलोमेन वर्णचिन्तनं व्यक्तमाह कङ्कालमालिनीतन्त्रे—

सहस्रारं महापद्मं शुक्लवर्णमधोमुखम् ।

अ-कारादि क्ष-कारान्तैः स्फुरद्वर्णैर्व्विराजितम् ॥ इति ॥

अत्र क्ष-कारान्तैरित्यत्रान्तशब्दस्यावसानार्थकत्वात् क्ष-कारोऽन्तेऽवसाने यस्येति बहुव्रीहिणा क्ष-कारं विहाय ल-कारान्तपञ्चाशद्वर्णयोगः । अथवा ल कारा-

समास्ते तस्यान्तः शशपरिरहितः शुद्धसम्पूर्णचन्द्रः
स्फुरज्ज्योत्स्नाजालः परमरसचयस्निग्धसन्तानहासी।
त्रिकोणं तस्यान्तः स्फुरति च सततं विद्युदाकाररूपं
तदन्तःशून्यं तत् सकलसुरगणैः सेवितं चातिगुप्तम्॥ ४१॥

द्यैरिति लकार-त्तकारान्तपञ्चाशद्वर्णानामकथादिलिरेखावद्वामावर्त्तेन यथा-योग्यावर्त्तनेन विन्यासः। कङ्कालमालिनीवचनन्तु दक्षिणावर्त्तेन वर्णविन्यास-विधायकम् इति वचनद्वयोरविरोधः। अत्र पञ्चाशद्वर्णानां रूपविशेषा-नभिधानात्तद्वर्णमय्या मातृकायाः शुक्लवर्णत्वदर्शनात्तेऽप्यत्र शुक्लत्वेनैव चिन्तनीया इति ध्येयम्। ललाटाद्यैर्व्वर्णैरिति पाठे तु ललाटशब्देन मातृका-न्यासोक्तललाटवर्णः अकारस्तदाद्यैर्व्वर्णैरित्यर्थः। एतत्पक्षे लकारं विहाय अकारादिक्षकारान्तं पञ्चाशद्वर्णयोगो बोध्यः। सर्व्वत्र पञ्चाशद्वर्णग्रहणे अन्त्यलकारत्यागदर्शनात्।

अत्र केचित् प्रविलसिततनुरिति पठन्ति। तत्र "वा पुंसि पद्मम्" इति दर्शनात् पुंसि विशिष्टस्य पद्ममित्यस्य विशेषणतया तनुरित्यस्यापि पुंस्त्व-मिति व्याख्यायन्ति च। तन्न एतत्श्लोकस्थनिवसतिक्रियायाः कर्त्तृत्वेन पद्ममिति विन्दन्तनिर्द्देशात् क्लीवलिङ्गप्रयोग एव प्रतीयते न तु पुंलिङ्गप्रयोग-स्तथात्वे विसर्गान्तो भवितुमर्हति अतस्तद्विशेषणस्य तनुशब्दस्य क्लीवत्वमवश्यं वाच्यं तथात्वे विन्दन्तता न भवति निर्व्विन्दुत्वे छन्दःपातस्तस्माद्वपुरित्येव पाठः। स्पष्टमन्यत्॥ ४०॥

सहस्रदलकमलकर्णिकायां चन्द्रमण्डलस्थितिमाह समास्ते इति।

---

(४१) समास्ते इति। तस्य पद्मस्यान्तर्मध्ये शशरहितः अत्यर्थदीप्तिमान् सम्पूर्णचन्द्रः समास्ते। कीदृशः? स्फुरन्ति ज्योत्स्नाजालानि यस्य स तथा। परमरसचयेन शिवसम्बन्धाय

तस्यान्त: तत्र पद्मे अन्तर्म्मध्ये शुद्ध: निर्म्मलोदयविशिष्ट:। चन्द्रं विशेषयति स्फुरदित्यादि परमरसचयस्निग्धसन्तानहासी इति। स्निग्ध: आर्द्रसदृशभावस्तस्य सन्तानो विस्तारो यत्र इत्यर्थ:। ततश्च परमामृतरसचयेन उत्तापहीनतया स्निग्धसन्तानयुक्तो हासवदानन्दमयकिरणविशिष्ट इत्यर्थ:। अथ चन्द्रमण्डलस्याध ऊर्द्ध्वे अन्तरात्मादीनां स्थितिमाह कङ्कालमालिनीतन्त्रे सहस्रारमुपक्रम्य—

तत्कर्णिकायां देवेशि अन्तरात्मा ततो गुरु:।
सूर्य्यस्य मण्डलञ्चैव चन्द्रमण्डलमेव च॥
ततो वायुर्म्महानामा ब्रह्मरन्ध्रं तत: स्मृतम्।
तस्मिन् रन्ध्रे विसर्गञ्च नित्यानन्दं निरञ्जनम्।
तदूर्द्ध्वे शङ्खिनी देवी सृष्टिस्थित्यन्तकारिणी॥ इति॥

तत्रान्त: चन्द्रमण्डलमध्ये सततं निरन्तरं विद्युदाकाररूपं त्रिकोणं स्फुरतीति। तदन्त:शून्यमिति। अन्तर्म्मध्ये शून्यं यस्य तदन्त:शून्यं परं विन्दुशरीरं तस्मिन् त्रिकोणे अन्त:शून्यं तदन्त:शून्यं त्रिकोणमध्यवर्त्ति परंविन्दुरूपं शून्यं स्फुरतीति क्रियान्वय:। यद्वा तदन्तस्त्रिकोणमध्ये शून्ये परं विन्दुरूपं स्फुरति। अतएवोक्तं तोड़लतन्त्रे षष्ठोल्लासे—

निराकारं परं ज्योतिर्व्विन्दुश्चाव्ययसंज्ञकम्।
विन्दुशब्देन शून्यं स्यात् तथा च गुणसूचकम्॥ इति।

अत्र "आहारनिर्हारविहारयोगा: सुसंवृता: धर्म्मविदा तु कार्य्या" इति वचनात् योगस्य गोपनेनानुष्ठानविधानात् तदन्त:शून्यमतिगुप्तं यथा स्यात्तथा सकलसुरगणै: सेवितम् आराधितमित्यर्थ:॥ ४१॥

परमामृतसमूहेन अत्यर्थस्निग्धहासो दीप्तिर्यस्य तस्य चन्द्रस्य मध्ये त्रिकोणं सर्व्वदैव स्फुरति विद्युदाकार इव रूपं यस्य त्रिकोणान्तर्म्मध्ये तत् शून्याकारं विलसति। सकलसुरगणै: सेवितम्। शून्यत्वादतिगुह्यम्।

सुगुप्तं तद्यत्नादतिशयपरमामोदसन्तानराशेः
परं कन्दं सूक्ष्मं सकलशशिकलाशुद्धरूपप्रकाशम्।
इह स्थाने देवः परमशिवसमाख्यानसिद्धः प्रसिद्धः
स्वरूपी सर्व्वात्मा रसविरसमितो ज्ञानमोहान्धहंसः ॥४२॥

सुगुप्तमिति। अस्यायमर्थः वक्ष्यमाणकेशाग्रकोटिभागैकरूपत्वादतिगुप्तं तत् शून्यं यत्नात् चिरनिरन्तरध्यानाद्यनुष्ठानात् सकलशशिकलाशुद्धरूपप्रकाशं कला निर्व्वाणकला तया सह वर्त्तमाना या शशिनश्चन्द्रस्य षोड़शी कला तया निर्म्मलरूपप्रकाशो यस्य तदित्यर्थः। तथा चातिसूक्ष्ममपि त्रिकोणान्तर्व्वर्त्त्यमाकलानिर्व्वाणकलासहितपरविन्दुरूपान्तःशून्यं ध्यानेन प्रकाशितं भवतीति भावः। परमामोदसन्तानराशेर्म्मोक्षस्य परं कन्दं प्रधानमूलमित्यर्थः। सुगुप्तमित्यत्र सुगोप्यमिति पाठे यत्नादित्यस्य उभयत्रान्वय इति ध्येयम्।

केचित्तु त्रिकोणान्तःशून्यं शून्यस्थानं तत्तु कीदृशम्? सकलशशिकलाशुद्धरूपप्रकाशम्। शशिनश्चन्द्रस्य सकलकलाः समस्तकलाः षोड़शकलाः तत् शुद्धं शुक्लं यद्रूपं तदेव प्रकाशो यस्य तादृशपूर्णचन्द्रप्रकाशमित्यर्थः इति व्याख्यायन्ति तच्चिन्त्यम्। तत्त्रिकोणस्य पूर्णचन्द्रमण्डलमध्यवर्त्तित्वकथनेनैव त्रिकोणमध्यस्थानस्य पूर्णचन्द्रतुल्यप्रकाशप्राप्तौ पुनस्तत्कथनं व्यर्थं स्यात्। किञ्च सकलसुरगणैः सेवितमित्यनेन शून्यस्थानस्य सेवनं न युज्यते किन्तु त्रिकोणान्तर्व्विन्दोरेव सेव्यत्वमिति। यदि तु तत् शून्यस्थानस्य परं विन्दोरधिष्ठानात् सेव्यत्वमित्युच्यते तदा तु तत्शून्यस्थानस्य परं विन्दोरधि-

---

(४२) सुगुप्तमिति। सुगोप्यं तत् शून्याकारशिवलिङ्गं यत्नात् गोप्यं गोपनीयं कस्मैचित् यावत्तावन्न कथनीयम्। कीदृशम्? अतिशयपरमामोदसन्तानजनकामृतराशेः प्रकृष्टमूलं तस्मादेव परमामृतं क्षरति। सूक्ष्मम् अलक्ष्यं शशिनः सकलकलैवांशरूपं प्रकाशो यस्य। इह स्थान एव परमशिवत्वेन सिद्धः सर्व्वैर्व्विदितः प्रसिद्धः योगिनां हृदये प्रकाशनस्वरूपी शून्याकारः सर्व्वेषाम् आत्मा रसविरसमितः परमरसेनाच्छादितः अज्ञानेन यो मोहान्धकारः तत्र हंसः सूर्य्यसदृशः।

सुधाधारासारं निरवधि विमुञ्चन्नतितरां
यतेः स्वात्मज्ञानं दिशति भगवान् निर्म्मलमतेः ।
समास्ते सर्व्वेशः सकलसुखसन्तानलहरी-
परीवाहो हंसः परम इति नाम्ना परिचितः ॥ ४३ ॥

ष्ठानात् सेव्यत्वमित्युच्यते तदा तत् शून्यस्थानमेव नो भवतीति सुधीभिर्भाव्यम् ।

सहस्रदलकर्णिकायां परमशिवस्थितिमाह इह स्थाने इति । इह स्थाने कर्णिकायामित्यर्थः । परमशिवसमाख्यानसिद्धः परमशिवनाम्ना ख्यातो देवो वर्त्तते इति शेषः । देवं विशेषयति स्वरूपीति ब्रह्मरूपी ब्रह्ममयमिति यावत् । सर्व्वात्मा सर्व्वेषां जीवानाम् आत्मा जीवात्मस्वरूपः जीवात्मपरमात्मनोर्व्वस्तुतो भेदाभावात् य आत्मा स एव जीवः अतएवोक्तमध्यात्मरामायणे—

जीवात्मा परमात्मा च पर्य्यायो नात्र भेदधीः ।
आचार्य्यशास्त्रोपदेशादैक्यज्ञानं यदा भवेत् ।
आत्मनोर्जीवपरयोर्म्मूला विद्या तदैव तु ॥

इत्युक्तम् । श्रुतिरपि "तत्त्वमसि" इति वाक्येन तत्त्वंपदयोरेकार्थत्वं दर्शयति । रसविरसमित इति रसः परमानन्दरसः विरसस्तद्वैलक्षण्येन शिवशक्तियोगजन्यसामरस्यानन्दरूपः । तदुभयरसमितः प्राप्तः इत्यर्थः । अथवा रसः प्रथमोपस्थितत्वेन विषयरसस्तस्मिन् विरसा हेयताबुद्धिर्येन रसेन स परमानन्दरसस्तन्मित इत्यर्थः । अज्ञानमोहान्धहंसः अज्ञानमोहान्धकारनाशकत्वात् हंसः सूर्य्यरूप इत्यर्थः ॥ ४२ ॥

सुधाधारासारं निरवधि विमुञ्चन्नतितरामिति । निरवधि निरन्तरम्

---

(४३) सुधाधारासारमिति । स भगवान् शिवः निर्म्मलमतेर्योगिनो जनस्य आत्मविषयस्य परमात्मनि ज्ञानं दिशति । कीदृशम् ? सुधाधारासारम् अमृतधाराया आसारमिव । यद्वा

अतितरामतिशयं यथा स्यात्तथा सुधाधारारूपसारं वस्तु विमुञ्च-न्नित्यर्थः ।

अथवा सुधाया आधारश्चन्द्रस्तस्मादासियते निःस्रियते यत् तत् सुधा-धारासारं शुक्लवर्णामृतकिरणं विमुञ्चन् प्रकाशयन्नित्यर्थः । एतद्विशेषणेन विशिष्यस्य चन्द्रवत् शुक्लवर्णत्वं सूचितम् ।

यद्वा आसार्य्यते निःसार्य्यते उच्चार्य्यते इति यावत् तद्वाक्यं सुधाधारया सह आसारं सुधाधारासारं सुधामयवाक्यमित्यर्थः । ततश्च निरवधि सर्व्वस्मिन् काले अतितरां मोहनाशायातिप्रबलतरां सुधामयवाक्यं विमुञ्चन् उच्चरन् सन् यतेरुपास्यदेवतायां नियतमनसः स्वात्मज्ञानं स्वज्जीवात्मा तेन सह आत्मा परमात्मा ज्ञायतेऽनेनेति । अत्रापृथक्साहित्येन जीवात्माभेदेन परमात्मज्ञान-कारणं तारकब्रह्ममन्त्रम् उपदिशतीति समुदायार्थः ।

अथवा सुधा कृपामृतं तद्धारया युक्तं सारं ब्रह्ममन्त्रात्मकसारवाक्यमुच्चरन् स्वात्मज्ञानं दिशतीत्यर्थः । एतद्विशेषणेन तारकमन्त्रोपदेशकत्वज्ञापनात्तु विशेष्यगुरुत्वं सूचितम् । एवञ्चैतद्विशेषणं पूर्व्वश्लोकोक्तपरमशिवस्यैव गुरुत्वात् । अतएव ललितारहस्ये गुरुतत्त्वनिरूपणे—

ख्यातोऽयं पुरुषश्रेष्ठः सर्व्वदात्मरतिप्रिय ।

इत्यादिना गुरुं वर्णयित्वा

तेजोरूपा प्रिया तस्य ब्रह्मवर्त्मसुदुर्लभा ।
परमं ब्रह्म यत्पादपङ्कजद्युतिवैभवम् ॥

इत्युक्त्या शोभाधिक्येन पदपङ्कजयोः परब्रह्मरूपपरमशिवस्य हृत्पद्मादिति व्याख्यातम् । तेजोरूपगुरुप्रियायाः पादद्वयारोहणं गुरुहृदय एव न त्वन्य-पुरुषस्येति । अतो यः परमशिवः स एव गुरुरिति तात्पर्य्यम् ।

अमृतधारासारं निरवधि अतितराम् अत्यर्थं विमुञ्चन् इति भगवतो विशेषणम् एवंभूतः सर्व्वेशः शिवः सर्व्वेषां सुखसमूहलहरीवहिर्भूतः सन् समास्ते । कीदृशः ? नाम्ना परमहंस इति परिचितः ।

निर्व्वाणतन्त्रेऽपि—

शिरःपद्मे महादेवस्तथैव परमो गुरुः ।
तत्समो नास्ति देवेशि पूज्यो हि भुवनत्रये ।
तदंशं चिन्तयेद्देवि वाग्भवे गुरुचतुष्टयम् ॥ इति ॥

अयं परमशिवः कर्णिकान्तस्त्रिकोणस्य वहिरधः कथ्यमानहंसः इत्यस्योपरि वर्त्तते । पूर्व्वोक्तकङ्कालमालिनीतन्त्रवचने—

तत्कर्णिकायां देवेशि अन्तरात्मा ततो गुरुः ।
सूर्य्यस्य मण्डलं तत्र चन्द्रमण्डलमेव च ॥

इत्यादिना क्रमेण महाशङ्खिनीशक्तिपर्य्यन्तस्थितिमभिधाय

तस्याधस्ताच्च देवेशि चन्द्रमण्डलमध्यगम् ।
त्रिकोणं तत्र सञ्चिन्त्य चयहीनात्मिका कला ।
तन्मध्ये कुटिला निर्व्वाणाख्यसप्तदशी कला ॥

इति वचनेन चन्द्रमण्डलान्तस्त्रिकोणेऽमाकलादीनामेव स्थितिरुक्तत्वात् । गुरोस्तु तदधोऽन्तरात्मन उपरि स्थितिरुवाच । ननु कङ्कालमालिनीवचनेऽन्तरात्मन उपरि गुरोः स्थितिरुक्ता तत्कथं हंसस्य ऊर्द्ध्वं गुरोः स्थितिरुच्यते इति चेन्न हंसान्तरात्मनोरेकार्थत्वात् ।

तथा हि कङ्कालमालिनीतन्त्रे गुरुध्यानं यथा—

सहस्रदलमध्यस्थमन्तरात्मानमुत्तमम् ।
तस्योपरि नादविन्दोर्म्मध्ये सिंहासनोज्ज्वलम् ॥
तस्मिन् निजगुरुं नित्यमित्यादि ।

तथाऽन्यत्र—

हंसपीठे मन्त्रमये स्वगुरुं शिवरूपिणम् ।
अमुकानन्दनाथान्तं स्मरेत्तन्नामपूर्व्वकम् ॥ इति ॥

तथाऽन्नदाकल्पे—

शिरः पद्मे शुक्ले दशशतदले केशरगते
पतत्त्रीणां तल्पे परमशिवरूपं निजगुरुम् ॥ इति ॥

एतेषां वचनानां पर्य्यालोचनया हंसान्तरात्मनोरभेदः प्रतीयते । एवं परमशिवरूपं निजगुरुमित्यनेन परमशिव एव गुरुरिति भाव्यम् ।
यत्तु सहस्रदलमुपक्रम्य—

तन्मध्ये तु त्रिकोणं स्याद्विद्युदाकाररूपकम् ।
विन्दुद्वयञ्च तन्मध्ये विसर्गरूपमव्ययम् ।
तन्मध्ये शून्यदेशे तु शिवः परमसंज्ञकः ॥

इति वचनं परमशिवस्य त्रिकोणमध्ये स्थितिबोधकम् तन्मतभेदेन सहस्रदलकमलाभिन्नतत्कर्णिकाधोवर्त्त्यूर्द्ध्वमुखद्वादशदलकर्णिकान्तस्त्रिकोणे गुरुस्थितिबोधकम् एतत्पादुकापञ्चकस्तोत्रे स्पष्टीकृतम् । न तूर्द्ध्वसहस्रदलकर्णिकात्रिकोणे गुरुस्थितिबोधकम् । मध्यत्रिकोणस्याधस्तनत्रिकोणान्तरे तद्रूपेण स्थितः । अन्यथा कङ्कालमालिनीतन्त्रवचनविरोधात् ।

समास्ते सर्व्वेश इति । अत्र कर्णिकायां सर्व्वेषामीश्वरः समास्ते इत्यर्थः । नन्वत्र परमशिवस्थितिकथनेनैव ईश्वरस्थितिरुक्ता तत्कथं पुनः सर्व्वेशस्थितिरुच्यते इत्यतः सर्व्वेशं विशेषयति हंस इति । अयं सर्व्वेशो हंसः हंस इत्यानुपूर्व्विकमन्त्राकारः । तदुक्तं प्रपञ्चसारे—

सा तत्त्वसंज्ञा चिन्मात्रा ज्योतिषः सन्निधेस्ततः ।
विचिकीर्षुर्घनीभूय क्वचिदभ्येति विन्दुताम् ॥
कालेन भिद्यमानस्तु स विन्दुर्भवति द्विधा ।
विन्दुर्दक्षिणभागश्च वामभागो विसर्गकः ॥
तेन दक्षिणवामाख्यौ भागौ पुं-स्त्रीविशेषितौ ।
हकारो विन्दुरित्युक्तो विसर्गः स इति स्मृतः ॥
विन्दुः पुरुष इत्युक्तो विसर्गः प्रकृतिः स्मृतः ।
पुं-प्रकृत्यात्मको हंसस्तदात्मकमिदं जगत् ॥ इति ॥

सुव्यक्तमाह महाकालीतन्त्रे प्रथमपटले—

सहस्रारान्तरे शून्ये दिव्यतोरणशोभिते ।
चन्द्रमण्डलमध्ये तु हंसवर्णद्वयोपरि ।

शिवस्थानं शैवाः परमपुरुषं वैष्णवगणा
लपन्तीति प्रायो हरिहरपदं केचिदपरे।
परं देव्या देवीचरणयुगलाम्भोजरसिका
मुनीन्द्रा अप्यन्ये प्रकृतिपुरुषस्थानममलम् ॥४४॥

शुद्धस्फटिकसङ्काशं शुद्धक्षौमविराजितम् ॥ इत्यादि ॥
हंसवर्णद्वयोपरीति सुव्यक्तम्। अथवा हंसः परम इति नाम्ना
हंस इति नाम्ना परम इति नाम्ना च परिचितो विख्यात इत्यर्थः।
ग्रन्थकारेण अनपञ्चाशच्छ्लोके केचिद्धंसाख्यमेतदित्यनेन हंसनामकत्वं
[। यद्वा हंसोऽन्ते यस्य स हंसोऽन्तः हंसोऽन्तश्चासौ परमश्चेति कर्म्म-
शाकपार्थिवादित्वात् मध्यपदलोपे हंसःपरम इति सिद्धम्। तेन
इति नाम्ना परिचित इत्यर्थः। अतएवोक्तम् आगमकल्पद्रुमे—
असौ परमहंसाख्यो युक्तस्थावरजङ्गमः ॥ इति ॥
लसुखसन्तानलहरीपरीवाह इति। सर्व्वप्रकारसुखं सकलसुखं तस्य
विस्तारः स एव लहरी श्रेणी परि सर्व्वतोभावेनोह्यते उत्तरोत्तर-
येत्वेन प्रकाश्यते यस्मिन् इत्यर्थः। ततश्च श्रेण्याकारेण सर्व्व-
र्व्वप्रकारसुखविशिष्ट इति यावत्। अयं हंसः परमशिवस्याधोवर्त्तीत्युक्तं
३२ ॥
त् कर्णिकायां सर्व्वदेवतामयहंसादीनामधिष्ठानात् शैवशाक्तादि-
ासकानामुपास्यदेवतास्थानमित्याह। शिवस्थानमिति। शैवाः शिवो-

शिवस्थानं इति। एतत् परमशिवस्थानं शैवा जनाः शिवस्थानमिति लपन्ति।
मपुरुषं परा प्रकृष्टा मा लक्ष्मीर्यस्य एवम्भूतपुरुषं वदन्ति। अपरे केचित् प्रायो हरि-
र लपन्ति। अन्ये देवीचरणयुगलानन्दरसिका देव्याः पदं लपन्ति। वस्तुतस्तु
भावनायां एको निरञ्जन एवं निर्व्वाच्यः अतएव "ऋजुकुटिलनानापथजुषां त्वया-
' इति पुष्पदन्तोक्तं साधु संगच्छते ॥

इदं स्थानं ज्ञात्वा नियतनिजचित्तो नरवरो
न भूयात् संसारे पुनरपि न बद्धस्त्रिभुवने।
समग्रा शक्तिः स्यान्नियममनसस्तस्य कृतिनः
सदा कर्त्तुं हर्त्तुं खगतिरपि वाणी सुविमला॥ ४५॥

पासका एतत्पद्मं शिवस्थानं लपन्ति वदन्तीत्यर्थः। परमपुरुषं परमपुरुषस्य विष्णोः स्थानं इदमर्थतद्धितप्रत्ययेन सिद्धम्। केचिदिति ये हरिहरोपासकास्ते शैवा वैष्णवाश्च ते केचित् अपरे केवलशिवविष्णूपासकेतरा हरिहरपदं लपन्ति। अतः सर्व्वे शैवा वैष्णवाः केवलशिवस्थानं केवलविष्णुस्थानं न वदन्ति इत्यभिप्रायेण इत्युक्तम्। अन्ये युगलभजनशीलाः यद्वा अन्ये हंसमन्त्रोपासकामुनीन्द्राः प्रकृतिपुरुषस्थानं हंसस्य प्रकृतिपुरुषोभयरूपत्वात् तदधिष्ठितस्थानं लपन्तीत्यर्थः। एतत्प्रदर्शनमात्रं तत्स्थाने सर्व्वदेवतामयपरबिन्दोरधिष्ठानात् यो यद्देवतोपासकः स तद्देवतास्थानं वदतीति बोध्यम्॥ ४४॥

सहस्रारज्ञानफलमाह इदं स्थानमिति। साङ्गोपाङ्गरूपेणैतत्स्थानज्ञानं भवतीति भावः। नियतनिजचित्त इति नियतं तत्र नियुक्तं निजचित्तं येन इत्यर्थः। न भूयात् संसारे मुक्तो भवतीति भावः यतः क्वचिदपि न बद्धस्त्रिभुवने इति हेतुगर्भविशेषणम्। बद्धः पुण्यपापरूपमायापाशबद्धः। तदुक्तं भागवते—

कर्म्मणि क्रियमाणे तु गुणैरात्मनि मन्यते।
तदस्य संसृतिर्ब्बन्धः पारतन्त्र्यञ्च तत् स्मृतम्॥ इति॥

भगवद्गीतायामपि—

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्म्मणा॥ इति॥

---

(४५) इदंस्थानमिति। इह एवं शास्त्रे एतत्स्थानं ज्ञात्वा नियतं संयतं निजचित्तं येन सः परमात्मचिन्तापरो नरवरः संसारे न भूयात् क्वचिदपि त्रिभुवने बद्धो न भवति। संयतमनस-

ततश्च पुण्यपापभोगार्थं शरीरधारणात् बन्धः। स च स्वर्गे पुण्यभोगार्थं पाताले पापभोगार्थं मर्त्ये उभयभोगार्थं भवतीति। तत्त्वज्ञानिनान्तु बन्धहेतुभूतपुण्यपापानुदयात् सञ्चितपुण्यपापक्षयाच्च क्वचिदपि कस्मिन् कालेऽपि त्रिभुवने स्वर्गमर्त्त्यपाताले न बद्धः न शरीरी भवति। सोऽयं प्रारब्धकर्म्मभोगपर्य्यन्तं जीवन्मुक्तः सन् तिष्ठति देहान्ते मुक्तो भवतीति भावः। तस्य पुण्यपापानुदयमाह कुलार्णवे—

अश्वमेधशतेनापि ब्रह्महत्याशतेन च।
पुण्यपापैर्न लिप्यन्ते येषां ब्रह्म हृदि स्थितम्॥ इति॥

तथा भगवद्गीतायाम्—

नैव तस्य कृते नार्थो नाकृते नेह कश्चन।
न चास्य सर्व्वभूतेषु कश्चिदर्थव्यपाश्रयः॥ इति॥

तस्य प्रक्रान्ततत्त्वज्ञानिनः कृतेन कर्म्मणा पुण्यं नास्ति न चाकृतेन नित्यकर्म्मणा कश्चन प्रत्यवायोऽस्तीति सुबोधिनीव्याख्यानम्।

सञ्चितपुण्यपापक्षयमाह श्रुतिः—

तस्मिन् मनसि लीने गते सङ्कल्पविकल्पे दग्धे पुण्यपापे सदाशिवः शक्त्यात्मा शान्त इति।

भगवद्गीतायामपि—

ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुते तथा॥ इति॥

तस्य समग्रा सर्व्वकार्य्यसाधिका शक्तिः स्यात्। शक्तिकार्य्यं दर्शयति सदा कर्त्तुमिति अभीष्टकार्य्यं कर्त्तुं तथा हर्त्तुम् अनिष्टं कर्त्तुं संहर्त्तुं च शक्तिः खगतिराकाशपथगमनं सुविमला मधुरगद्यपद्यमयी वाणी स्यादिति सर्व्वत्रान्वयः॥ ४५॥

तस्य कृतिनः समस्ता शक्तिः स्यात्। तदेवाह सर्व्वदैव कर्त्तुं हर्त्तुं सक्षमो भवति। खगतिराकाशगतिरपि भवति। अपि वाणी सर्व्वाह्लादिनी सुविमलशक्तिरूपा भवतीति।

अत्रास्ते शिशुसूर्य्यसोदरकला चन्द्रस्य सा षोडशी
शुद्धा नीरजसूक्ष्मतन्तुशतधाभागैकरूपा परा।
विद्युत्कोटिसमानकोमलतनूर्विद्योतिताऽधोमुखी
पूर्णानन्दपरम्परातिविगलत्पीयूषधाराधरा ॥ ४६ ॥

अथात्र पूर्व्वं तदन्तःशून्यन्तदित्यनेन सकलशशिकलाशुद्धरूपप्रकाशमित्यनेन च सहस्रारकर्णिकान्तस्त्रिकोणे अमाकलानिर्व्वाणकलापरंविन्दूनामधिष्ठानं छलेनाभिहितम्। इदानीं तेषां स्वरूपेण इतरभेदकविशेषणेन च स्पष्टयितुमिच्छन्नादावमाकलास्वरूपमाह अत्रास्ते इति। शिशुसूर्य्यसोदरमित्यनेन कलाया रक्तवर्णत्वं ज्ञापितम्। चन्द्रस्य या षोड़शीत्यनेनेयममा कलेति ज्ञापितम्। नीरजतन्तुर्मृणालसूत्रं तस्य शतभागो दीर्घकालेनेति बोध्यम्। शुद्धा कलङ्करहिता परा चिच्छक्तिरूपा चिच्छक्तेरेवेदं रूपम्। अतएवोक्तं प्रभासखण्डे—

संस्थिता परमा माया देहिनां देहधारिणी ॥

इति अमाविशेषणम्। नित्यानन्दपरम्परेति ब्रह्मपरम्परोत्पन्ना इत्यर्थः। अतिविगलत् पीयूषधाराधरा अतिशयामृतस्राविणीत्यर्थः। यद्वा नित्यानन्दपरम्परातिविगलत्पीयूषधाराधरेत्येकविशेषणम्। अस्यार्थः परं विन्दुरूपं शिवः परा प्रकृतिः शक्तिः आनन्देन समरसानन्देन परम्पराभ्यां शिवशक्तिभ्यामतिविगलन्ती या पीयूषधारा परामृतधारा नित्यं निरन्तरं तादृशधारामिव धारां धारयतीत्यर्थः। स्पष्टमन्यत् ॥ ४६ ॥

---

(४६) अत्रास्ते इति। अत्रैव पद्मे चन्द्रस्य सा प्रसिद्धा अमानाम्नी षोड़शी कला आस्ते। कीदृशी ? प्रातःकालीनसूर्य्यस्येव कला दीप्तिर्यस्याः सा तथा। शुद्धा निर्व्विकारत्वात्। मृणालतन्तोः सूक्ष्मशतभागस्येव एकरूपं यस्याः परा प्रकृष्टा अथवा पश्यन्तीमध्यमावैखरीसमष्टिरूपा। पुनः कीदृशी ? विद्युद्दामसमानकोमला तनुर्यस्याः। नित्योदिता क्षयोदयरहितत्वात्। अधोमुखी पूर्णानन्दपरम्परा अति प्रकाशमाना या पीयूषधारा तदाश्रया परम्पराक्रमेण शिवसम्बन्धिपीयूषधाराधरेत्यर्थः॥ [एतन्मते "नित्योदिता" इति पाठः]।

निर्व्वाणाख्यकला परा परतरा सास्ते तदन्तर्गता
केशाग्रस्य सहस्रधा विभजितस्यैकांशरूपा सती ।
भूतानामधिदैवतं भगवती नित्यप्रबोधोदया
चन्द्रार्द्धाङ्गसमानभङ्गुरवती सर्व्वार्कतुल्यप्रभा ॥ ४७ ॥
एतस्या मध्यदेशे विलसति परमापूर्व्वनिर्व्वाणशक्तिः
कोट्यादित्यप्रकाशा त्रिभुवनजननी कोटिभागैकरूपा ।
केशाग्रस्यातिसूक्ष्मा निरवधि विगलत्प्रेमधाराधरा सा
सर्व्वेषां जीवभूता मुनिमनसि मुदा तत्त्वबोधं वहन्ती ॥४८॥

निर्व्वाणकलास्वरूपमाह निर्व्वाणाख्यकलेति । सा परा परतरा परमा कला अस्या अपि परतरा श्रेष्ठा । परादिति पाठे सर्व्वश्रेष्ठा इत्यर्थः । सा तदन्तर्गता अमाकलायाः क्रोड़े स्थिता । "तन्मध्ये कुटिला निर्व्वाणाख्यसप्तदशी कला" इति पूर्व्वोक्तवचनात् । केशाग्रस्येत्यादि केशाग्रस्य सहस्रभागैकभागरूपसूक्ष्मा सती आस्ते इत्यन्वयः । भूतानां सर्व्वप्राणिनामधिदैवतं हार्द्दचैतन्यस्वरूपा इत्यर्थः । नित्यप्रबोधोदया तत्त्वज्ञानसम्पादयित्री । चन्द्रार्द्धाङ्गसमानभङ्गुरवती चन्द्रार्द्धाङ्गरूपामाकलावत् कुटिलाकारेत्यर्थः । सर्व्वार्कतुल्यप्रभा एकदा द्वादशसूर्य्योदये यादृक्प्रकाशः तादृशप्रकाशमाना रक्तवर्णा च ॥४७॥

परं विन्दुस्वरूपमाह एतस्या इति । एतस्या निर्व्वाणकलायाः मध्यदेशे क्रोड़े अपूर्व्वा सृष्टेरादावाविर्भूतत्वात् किञ्चिदपि नास्ति पूर्व्वं यस्यास्तादृशी ।

---

(४७) निर्व्वाणाख्येति । सा निर्व्वाणनाम्नी कला अमाकलान्तर्गता सती आस्ते । कीदृशी ? परा प्रकृष्टादपि प्रकृष्टतरा । सहस्रप्रकारेण विभजितस्य केशाग्रस्य एकांशरूपा सती शोभना । पुनः कीदृशी ? भूतानामधिदेवतास्वरूपा भगवतीस्वरूपा च । नित्यः प्रबोधोदयो यस्याः सा तथा । चन्द्रलेखेव भङ्गुरं वक्राकारं वपुर्यस्याः सा तथा द्वादशादित्यप्रभा इत्यर्थः ।

(४८) एतस्या इति । एतस्याः कलाया मध्यदेशे परमापूर्व्वनिर्व्वाणशक्तिर्व्विलसति । कीदृशी ? कोट्यादित्य इव प्रकाशो यस्याः । त्रिभुवनजननी सर्व्वेषां आधारभूतत्वात् । केशाग्र-

परमा परंब्रह्मशक्तिरूपा निर्व्वाणशक्तिर्व्विलसतीत्यर्थः । निर्व्वाणशक्तिं विशेषयति कोट्यादित्यप्रकाशेति । त्रिभुवनजननी स्वर्गमर्त्त्यपातालादि-प्रपञ्चसमुदायस्योत्पत्तिस्थानरूपेत्यर्थः । यतः केशाग्रस्य कोटिभागैकभागरूपा अतोऽतिसूक्ष्मा । निरवधिविगलत्प्रेमधाराधरेति प्रेम आनन्दार्द्रभावप्रफुल्लता । सामरस्यानन्दार्द्रभावप्रफुल्लताजनिता या परामृतधारा निरवधि निरन्तरं विगलन्तीं तादृशधारां धारयतीत्यर्थः । सर्व्वेषां जीवभूतेति ।

एतस्य अंश एव जीवः तदुक्तं यथा—

ज्वलदग्नेर्यथा देवि स्फुरन्ति विस्फुलिङ्गकाः ।
तस्याश्शतं परं विन्दुर्यदा भूमौ पतत्यपि ।
तदैव सहसा देवि संज्ञायुक्तो भवत्यपि ॥ इति ॥

तस्याः शिवशक्त्यात्मकपरविन्दन्तर्गतशक्त्याः संज्ञायुक्तो जीवनामा भवतीत्यर्थः । स्पष्टमन्यत् । इयं निर्व्वाणशक्तिः निर्व्वाणकलाधःस्थाने नादरूप-निबोधिकोपरि वर्त्तते । तद् यथा—

निर्व्वाणाभ्यन्तरगता वह्निरूपा निबोधिका ।
नादाव्यक्ता तदुपरि कोट्यादित्यसमप्रभा ।
निर्व्वाणशक्तिः परमा सर्व्वेषां योनिरूपिणी ॥
तस्यां शक्तौ शिवं ज्ञेयं निर्व्विकारं निरञ्जनम् ।
अत्रैव कुण्डली शक्तिर्व्विहरेत् परमात्मना ॥ इति ॥

निबोधिकाऽव्यक्तनादात्मिका वह्निरूपा । तथा हि नादस्य त्रिविधावस्था "तमोगुणाधिक्येन केवलध्वन्यात्मकोऽव्यक्तनादः । रज आधिक्येन किञ्चिद्वर्ण-वद्ध्वन्यासात्मकः । सत्त्वाधिक्येन विन्दुरूप" इति राघवभट्टः । ततश्च नादविन्दु-निबोधिकाः अर्केन्दुवह्निरूपाः "ते ज्ञानेच्छाक्रियात्मानो वह्नीन्द्वर्कस्वरूपिणः" इति सारदावचनात् । तस्मादत्र वह्निरूपनिबोधिकोपरि स्थितिकथनात्

स्यापि कोटिभागैकभागरूपा अतिसूक्ष्मत्वात् अतो गुह्या । निरवधि विलसत्प्रेमधारा सा शक्तिः सर्व्वेषां जीवभूता सतो सदा हर्षेण मुनिमनसि तत्त्वज्ञानं वहन्तीति ।

तस्या मध्यान्तराले शिवपदममलं शाश्वतं योगिगम्यं
नित्यानन्दाभिधानं सकलसुखमयं शुद्धबोधस्वरूपम् ।
केचिद्ब्रह्माभिधानं पदमिति सुधियो वैष्णवं तल्लपन्ति
केचिद्धंसाख्यमेतत् किमपि सुकृतिनो मोक्षमात्मप्रबोधम् ॥४९॥

सूर्य्यचन्द्रवह्निमण्डलोपरि निर्व्वाणशक्तेः स्थितिरिति सुधीभिर्भाव्यम्। व्यक्त-माह कुलार्णवोक्तपरंब्रह्मध्याने—

विन्दुरूपं परं ब्रह्म सहस्रदलसंस्थितम् ।

इत्युपक्रम्य—

कर्णिकान्तस्त्रिकोणान्तर्म्मण्डलत्रयमण्डितम् ॥ इति ॥

मण्डलत्रयेण सूर्य्यचन्द्रवह्निमण्डलेन मण्डितमित्यर्थः। इयं निर्व्वाण-शक्तिः परविन्दुरूपेति स्फुटीकरिष्यामः ॥ ४८ ॥

निर्व्वाणशक्तिमध्ये परब्रह्मस्थानमाह तस्या मध्यान्तराले इति । तस्याः परंविन्दुरूपनिर्व्वाणशक्त्याः मध्यान्तराले मध्यस्थशून्ये अमलं मायामलरहितं शिवपदं ब्रह्मस्थानं लपन्ति तत्त्वज्ञा इति शेषः। योगिगम्यं सूक्ष्मातिसूक्ष्म-तमत्वात् वाङ्मनसोरगोचरत्वाच्च योगिनां ज्ञानमात्रगम्यमिति भावः।

---

(४९) अस्या इति। अस्याः शक्तेर्मध्यदेशान्तराले निर्म्मलं शिवपदमास्ते। नित्यानन्दं शाश्वतम् अत्यन्तासक्तत्वात्। योगं प्राप्य अत्यन्तज्ञानसाध्यत्वात् सकलानां सुखमयं अथवा सकलं कलया सह वर्त्तमानं तत् सुखमयञ्चेति तत् तथा। शुद्धबुद्धीनां प्रबोधो ज्ञानं यस्मात्। एतत् पदं केचित् परंब्रह्माभिधानमिति वदन्ति। अन्ये सुधियो वैष्णवं पदं लपन्ति। केचित् सुधियो मोक्षं मोक्षस्वरूपं हंसाख्यमिति वदन्ति। एतेन ब्रह्मविष्णुशिवशक्तिस्वरूपं तत्पदमित्यायातं हंसाख्यत्वात्। तथाच ज्ञानार्णवे—

हकारे विन्दुरूपेण ब्रह्माणं विद्धि पार्व्वति।
सकारे सर्गविन्दुभ्यां हरिश्चाहं महेश्वरि।
अविनाभावसम्बन्धात् लोके हरिहराविति॥

केचित् वैदान्तिका ब्रह्माभिधानं ब्रह्मेति नाम्ना लपन्ति अथवा हंसाख्यं हंसनामकमिति यथाश्रुतार्थः। अन्ये सुकृतिनः किमपि अनिर्व्वचनीयम् आत्मप्रबोधम् आत्मसाक्षात्कारस्थानं लपन्तीत्यर्थः। मोक्षमिति मुच्यते मायाप्रपञ्चाद्वहिर्भूयते यत्र तन्मोक्षरूपमित्यर्थः। अत्रेदमवधीयताम्। सहस्रदलकर्णिकान्तस्त्रिकोणे मायाबन्धनच्छादितप्रकृतिपुरुषात्मकपरविन्दुः। तदुक्तम्—

सत्यलोके निराकारा महाज्योतिःस्वरूपिणी।
माययाच्छादितात्मानं चणकाकाररूपिणी॥
हस्तपादादिरहिता चन्द्रसूर्य्याग्निरूपिणी।
मायाबन्धनमुत्सृज्य द्विधा भित्वा यदोन्मुखी।
शिवशक्तिविभागेन जायते सृष्टिकल्पना॥ इति॥

सत्यलोके सहस्रारे इत्यर्थः।

तथा—

निर्गुणो विन्दुरूपश्च सिद्धिकारणमेव हि।
केचिद्वदन्ति स ब्रह्मा केचित् विष्णुः प्रकथ्यते॥
केचित् रुद्रो महापूर्ण एको देवो निरञ्जनः।
आद्या शक्तिर्यतो देवश्चणकाकाररूपकः॥ इति॥

अस्य विन्दोः केशाग्रकोटिभागैकभागरूपसूक्ष्मतेजोऽंशो निर्व्वाणशक्तिर्मध्यशून्यभागो ब्रह्मपदमिति ग्रन्थकारमतम्।

तथान्यत्र—

तन्मध्ये परविन्दुश्च सृष्टिस्थितिलयात्मकम्।
शून्यरूपं शिवः साक्षात् विन्दुः परमकुण्डली॥

स्वरं विना उच्चारितमशक्यत्वात् शक्तिरपि तत्र स्फुटा। कीदृशम्? आत्मनः परमात्मनः प्रबोधो यस्मात्तत्त्वेति।

तथा—

वृत्तः कुण्डलिनीशक्तिर्गुणत्रयसमन्वितः।

शून्यभागं महेशानि शिवशक्त्यात्मकं प्रिये॥ इति॥

अयं विन्दुः सर्व्वकारणरूप ईश्वर इति केचित्। पौराणिकास्तु महाविष्णुरूपोऽयमिति वदन्ति। अन्ये तु ब्रह्मपुरुषोऽयम्।

तदाह—

नाहो न रात्रिर्न वियन्न पृथ्वी

नासीत्तमो ज्योतिरभून्नवान्यत्।

श्रोत्रादिबुद्ध्यानुपलभ्यमेकं

प्राधानिकं ब्रह्म पुमांस्तदासीत्॥ इति॥

निर्गुणः सगुणश्चेति शिवो ज्ञेयः सनातनः।

निर्गुणः प्रकृतेरन्यः सगुणः सकलः स्मृतः॥

इति सारदावचनात्तन्मध्येऽयं सगुणब्रह्मरूपः। वस्तुतस्त्वेकमेव मतभेदान्नानाविधनाम्ना गायन्तीत्यलं विस्तरेण॥ ४८॥ *॥

तदयं महावाक्यार्थनिर्णयः। सुषुम्नानाड्यूर्द्धे सहस्रदलपद्मं शुक्लवर्णमधोमुखं रक्तकिञ्जल्कशोभितम् अकारादिलकारान्तपञ्चाशद्वर्णैः शुक्लाभैर्व्विंशत्यावर्त्तनेन सहस्रसंख्यकैर्युक्तसहस्रदलम्। एतत्कर्णिकायां हंसः ततः परमशिवरूपगुरुः। ततः सूर्य्यमण्डलं चन्द्रमण्डलं ततो महावायुः। ततो ब्रह्मरन्ध्रम्। ततो महाशङ्खिनी चन्द्रमण्डले विद्युदाकारत्रिकोणम्। तन्मध्ये मृणालसूत्रशतभागैकभागरूपसूक्ष्मा चन्द्रस्य षोड़शी कलाऽधोमुखी रक्तवर्णा। तत्क्रोड़े केशाग्रसहस्रभागैकभागरूपसूक्ष्मा निर्व्वाणकला रक्तवर्णाऽधोमुखी। तदधस्तात् अव्यक्तनादात्मकनिबोधिकाख्यवह्निः। तदुपरि निर्व्वाणकलाक्रोड़े परंविन्दुः शिवशक्त्यात्मकः। अस्य केशाग्रकोटिभागैकभागरूपसूक्ष्मतेजोहंसरूपा निर्व्वाणशक्तिः अस्या हंसो जीवः विन्दोर्म्मध्ये शून्यं ब्रह्मपदमिति। आगमकल्पद्रुमपञ्चशाखादिमते सहस्रदलपद्मकर्णिकामध्ये चन्द्रमण्डले अकथादित्रिकोणं तन्मध्ये त्रिकोणसमीपे त्रिविन्दुः तस्याधो विन्दु-

हकारः पुरुषात्मकः । ऊर्द्धविन्दुद्वयरूपविसर्गः सकारः प्रकृतिरूपः । एतदुभयात्मको हंसस्त्रिविन्दुरूपेण प्रकाशते । तन्मध्ये अमाकला तत्क्रोड़े निर्व्वाणशक्तिः तस्या मध्यशून्यं परंब्रह्म इति ।

तद्‌यथा—

अथ शुभ्रसहस्रारे पूर्णेन्दुमध्यविस्फुरत् ।
त्रिकोणं तड़िदाभासमकथादिहलत्रयुक् ॥
तदन्तरे परं शून्यं विसर्गाधो व्यवस्थितम् ।
बालादित्यप्रभा तत्र कला षोड़श्यधोमुखी ॥
स्रवन्ती सौधधारां वै चन्द्रार्द्धाङ्गविभङ्गुरा ।
तदन्तरे परा शक्तिः कोट्यादित्यप्रभामयी ॥
विसतन्तुसहस्रांशभागरूपा चिदात्मिका ।
तदन्तः सच्चिदानन्दो वेदातीतो निरञ्जनः ॥
विन्दुः पुरुष इत्युक्तो विसर्गः प्रकृतिर्म्मतः ।
पुं-प्रकृत्यात्मको हंसः स्वप्रकाशेन भासते ॥ इति ॥

एतन्मतमाश्रित्य परंविन्दोरूर्द्ध्वं हंसषट्कविसर्गोपरि गुरुस्थितिरिति वदन्ति । तन्न समीचीनम् । निर्व्वाणतन्त्रे परंविन्दुरूपशक्तिसमीपे तस्याः पूजाध्यानपरायणस्य निजगुरोः स्थितिकथनात् । पूजार्थोपवेशनन्तु अधःस्थले सम्मुख एव युज्यते न तूर्द्ध्वस्थले पश्चाद्देशे ।

तद्‌यथा । निर्व्वाणे—

सत्यलोके वीजकोषे चिन्तामणिगृहे शुभे ।
ध्यायेन्निरञ्जनां देवीं रत्नसिंहासनोपरि ।
तस्यान्तिके निजगुरुं पूजाध्यानपरायणम् ॥ इत्यादि ॥

किञ्च पूर्व्वप्रदर्शिते महाकालीतन्त्रवचने हंसवर्णद्वयोपरि गुरुस्थितिः सुव्यक्ता । अत्र मूलादिसहस्रदलपर्य्यन्तोक्तप्रकारविपरीतप्रकारबोधकानि तथा तदतिरिक्तबोधकानि च यानि वचनानि दृश्यन्ते तानि मतभेदेन प्रकारान्तरविधायकानि इति बोध्यम् ॥ इति सप्तमप्रकरणम् ॥ * ॥

हुङ्कारेणैव देवीं यमनियमसमभ्यासशीलः सुशीलो
ज्ञात्वा श्रीनाथवक्त्रात् क्रममिति च महामोक्षवर्त्मप्रकाशम् ।
ब्रह्मद्वारस्य मध्ये विरचयति स तां शुद्धबुद्धिस्वभावो
भित्त्वा तल्लिङ्गरूपं पवनदहनयोराक्रमेणैव गुप्तम् ॥ ५० ॥

अथेदानीं सहस्रदलपर्य्यन्तं चक्रं निरूप्य तत्र कुण्डलिनीयोगं कथयिष्यन्नादौ कुण्डलिन्युत्थापनप्रकारमाह हुङ्कारेणेति । अस्यायमर्थः । स योगित्वेन प्रसिद्धो जनः गुरुवक्त्रात् क्रमं ज्ञात्वा येन क्रमेण प्रकारेण हृदाद्याकुञ्चनादिपवनदहनयोराक्रमणं कुण्डलिन्युत्थापनादिकं भवति तत्प्रकारक्रमं श्रीनाथस्य गुरोर्व्वक्त्रात् ज्ञात्वा पवनदहनयोराक्रमेण हुमिति कूर्च्चवीजोच्चारणेन च कुण्डलिनीमुत्थाप्य तल्लिङ्गरूपं भित्त्वा स्वयम्भुलिङ्गच्छिद्रं प्रस्फोटयित्वा तां देवीं कुण्डलिनीं ब्रह्मद्वारस्य मध्ये चित्रिणीनाड़ीमुखमध्ये विरचयति प्रापयतीत्यर्थः । हुङ्कारेणेति ।

तती हंसमुपस्मृत्य शनैराकुञ्चयेत् गुदम् ।

इत्याद्यागमकल्पद्रुमवचने हंसमन्त्रस्योच्चारणेन कुण्डलिनीचालनविधानात् ।

---

(५०) हुङ्कारेणेति । इदानीं भूतशुद्धिः कथ्यते । तां देवीं कुण्डलिनीं यमनियमसमभ्यासशीलः स जनः श्रीनाथवक्त्रात् गुरुमुखात् महामोक्षपथप्रकाशं क्रमञ्च ज्ञात्वा हुङ्कारेण तत् स्वयम्भूलिङ्गं भित्त्वा ब्रह्मद्वारस्य मध्ये विरचयति । जनः कीदृशः ? शोभनं शीलं यस्य स तथा । शुद्धबुद्धेर्हेतुः प्रभावो यस्य स तथा । नन्वत्र सुप्तां तां कीदृक्प्रकारेणाक्रम्य नयति ? इत्याह पवनदहनयोरिति तयोराक्रमणेन अर्थात् पवनयोगेन दहनस्य ऊर्द्धगतिस्ततः प्रबुद्धा सर्पाकृतिः सा ऊर्द्धगतिर्भवत्येव ।

तथाच—

मूलाधारे स्मरेद्दिव्यं त्रिकोणं तेजसो निधिम् ।
तस्याग्निरेखामानीय अध ऊर्द्धव्यवस्थिताम् ॥

इत्यूर्द्धाम्नायवचनात् ।

प्रज्वलद्भुजगाकारा पद्मतन्तुनिभा शुभा ।
सर्व्वेषां जननी प्रोक्ता सूर्य्यकोटिसमप्रभा ।
प्रबुध्य वह्नियोगेन मनसामरुता हता ।
सूचीव गुणमादाय व्रजत्यूर्द्धं सुषुम्नया ।

हूं हंस इति मन्त्रः कुण्डलिनीचालने विनियुक्त इति ललितारहस्यकारः। किन्तु हंसस्मरणपूर्व्वकतदाकुञ्चनविधानात् हंस इति मनुमनुस्मृत्य जीवात्मानं हृदयस्थं दीपकलिकाकारं मूलाधारमानीय तेन सार्द्धं कुण्डलिनीं चालयेदित्यभिप्रायः।

अतएवागमकल्पद्रुमे—

आरोप्यारोप्य शक्तिं कमलजनिलयादात्मना साधकेन्द्रः।

इति परवचने आत्मना जीवात्मना सार्द्धं चालनमुक्तम्।

कालीकुलामृतेऽपि—

हृदयाद्धंसमनुना नीत्वा जीवं सुखाम्बुजे।

हुङ्कारेण समुत्थाप्य कुण्डलीं परदेवताम् ॥ इति ॥

कङ्कालमालिनीतन्त्रे—

आकृष्य प्रणवेनैव जीवात्मानं नगेन्द्रजे।

कुण्डलिन्या सह प्राणं गन्धमादाय साधकः।

सोऽहन्तु मनुना देवीं स्वाधिष्ठाने प्रवेशयेत् ॥ इति ॥

ततश्च हंसेन प्रणवेन वा हृदयाज्जीवं मूलाधारमानीय केवलकूर्च्चवीजेन कुण्डलिनीमुत्थापयेत् इति सुधीभिर्भाव्यत्।

स जनः कीदृशः? यमनियमसमभ्यासशीलः यमनियम इति योगप्रतिबन्धककामक्रोधादिनाशकतदनुकूलशरीरान्तर्वायुरेचनमनःस्थैर्य्यादिसाधकाङ्गयोगप्रदर्शकं तेरेव प्रकृतयोगनिष्पत्तेः न तु केवलयमनियममात्रेण। अतएव ग्रन्थकृता चतुःपञ्चाशच्छ्लोके 'योगी यमाद्यैर्युत' इत्यत्र यमाद्यैरिति बहुवचनान्तत्वेन प्रयुक्तम्। अयन्तु यमाद्यभ्यासः कामाद्याकुलितचित्तानामेव। यदि तु जन्मान्तरीयादृष्टवशात् स्वभावतो वा क्रोधकामादिरहितः तदा तद्योगाभ्यासं विनापि प्रकृतयोगे शक्तो भवतीति बोध्यम्।

उद्घाटयेत् कवाटन्तु यथा कुञ्चिकया हठात्।

कुण्डलिन्या तथा योगी मोक्षद्वारं प्रभेदयेत् ॥

इति गोरक्षसंहितोक्तत्वाच्च ॥ [एतन्मते "युक्तबुद्धिप्रभावः" इति पाठः]।

सुशील इति यतः यमाद्यभ्यासशीलः अतएव सुशील इति । श्रीनाथवक्त्रादिति । गुरूपदेशं विना क्रमज्ञानं न भवतीति भावः ।

अतएवोक्तम्—

गुरूपदेशतो ज्ञेयं न तु शास्त्रार्थकोटिभिः ॥ इति ॥

क्रमं विशेषयति महामोक्षवर्त्मप्रकाशमिति । मोक्षवर्त्म चित्रिणीनाड़ीमध्यच्छिद्ररूपवर्त्म तस्य प्रकाशः प्रस्फोटनं येन क्रमेणेत्यर्थः । शुद्धबुद्धिस्वभाव इति शुद्धबुद्धौ ब्रह्मणि स्वभावो यस्य अथवा शुद्धबुद्ध्या स्वस्मिन् आत्मनि भावो यस्येत्यर्थः । सुगुप्तं यथा स्यात्तथेति क्रियाविशेषणम् । अथवा तल्लिङ्गरूपं सुगुप्तं मुद्रितमुखत्वेनाव्यक्तम् अप्रकाशितमुखमिति यावत् । अथात्र कुण्डलिन्युत्थापनप्रकारं विशेषेणाह ।

आगमकल्पद्रुमपञ्चमशाखायाम्—

पद्मासने निवेश्याङ्के ततः पाणिद्वयं न्यसेत् ।
ततो हंसमुपस्मृत्य शनैः सङ्कोचयेद्गुदम् ॥
वायुमुत्तोलयेत्तेन वर्त्मना स पुनः पुनः ।
उत्तोल्य भेदयेच्चक्रं तस्यानुष्ठानमुच्यते ॥
मूलाधारसरोजे तु त्रिकोणमतिसुन्दरम् ।
कामो भवति तन्मध्ये बालार्ककोटिसन्निभम् ।
तदूर्द्ध्वे कुण्डलीशक्तिं स्वयम्भूलिङ्गवेष्टिनीम् ॥

तथा—

कामाग्निना कूर्च्चयोगात् परं हंसाभिलाषिणीम् ॥ इति ॥

तथा भूतशुद्धौ—

हृदिस्थां कुञ्चिकां कृत्वा गत्वा तदुदरे शिवे ।
कण्ठाद्यं समनुप्राप्य द्वारं कुञ्चिकया हठात् ॥
उद्घाट्य परमेशानि पवनेन प्रदीपयेत् ।
हुताशनप्रतप्तां तु तापेन भृशमूर्द्धृताम् ॥

भित्त्वा लिङ्गत्रयं तत्परमरसशिवे सूक्ष्मधाम्नि प्रदीपे
सा देवी शुद्धसत्त्वा तड़िदिव विलसत्तन्तुरूपस्वरूपा ।
ब्रह्माख्यायाः शिरायाः सकलसरसिजं प्राप्य देदीप्यते त-
न्मोक्षाख्यानन्दरूपं घटयति सहसा सूक्ष्मतालक्षणेन ॥ ५१ ॥

प्रसुप्तां नागिनीं लिङ्गे योनिवक्त्रे प्रबोधयेत् ।
ततः प्रचालयेद्वायुं यावन्नाड्यन्तरेषु च ॥
गुरूद्दिष्टेन मार्गेण स कृत्वा कुम्भकेन वै ।
आकृष्यैवं ततो जीवं सुगुप्तेन पथा भृशम् ॥
ऊर्द्धोच्छ्वासैरूर्द्धमुखान् कारयेत् पङ्कजान् शिवे ।
प्रबोधयन् शनैर्भानुं मेरुशृङ्गं नयेत् सुधीः ॥ इति ॥

तदयं सकलवचनपर्य्यालोचनसिद्धः क्रमोऽवधीयताम् । योगी जनः विहितासने उपविश्य स्वाङ्के उत्तानौ करौ कृत्वा खेचरीमुद्रया स्थिरचित्तः सन् देहान्तर्वायुमापूर्य्य कुम्भकं कृत्वा हृदयमाकुञ्चयेत् । तेन ऊर्द्धोच्छ्वासोत्सरणनिवृत्तिः । ततो देहान्तरस्थवायोरुदरकण्ठादिव्यापकतया नाड़ीच्छिद्रप्रस्फोटनेनाधोगमनमनुभूय गुदमाकुञ्च्यापानं संरुध्य वायुमुत्तोल्य मूलाधारकमलकर्णिकान्तस्त्रिकोणस्थकामं वाममावर्त्तयेत् । तेनोद्दीप्तेन तत्र स्थितेन कामाग्निनोत्तप्तां कुण्डलिनीं हुङ्कारेण चेतयित्वा परमशिवसामरस्याभिलाषिणीं तां स्वयम्भूलिङ्गमुखं स्फोटयित्वा तच्छिद्रेण चित्रिणीनाड़ीमुखमध्यं प्रापयेदिति समुदितार्थः ॥ ५० ॥

इदानीं कुण्डलिनीयोगप्रकारमाह भित्त्वेति । संरुद्धवर्त्मनि वर्त्मकरणं भेदः । अस्यार्थः सा देवी कुण्डलिनी तल्लिङ्गत्रयं स्वयम्भूवाणेतराख्यलिङ्गत्रयं

---

(५१) भित्त्वेति । इदानीं तस्या गतिप्रकारमाह सा देवी तल्लिङ्गत्रयं स्वयम्भूवाणेतराख्यलिङ्गानि भित्त्वा ब्रह्माख्यनाड्याः सकलसरसिजानि प्राप्य परमरसशिवे देदीप्यते भृशं दीप्तिं कुर्व्वती सहसा सूक्ष्मतालक्षणेन मोक्षानन्दरसं घटयति च अर्थात् शिवलिङ्गस्य । सा कीदृशी ?

भित्त्वा तैर्लिङ्गैः संरुद्धवर्त्मनि वर्त्म कृत्वा ब्रह्माख्यायाः शिरायाः चित्रिणीनाड़ी-सम्बन्धि तद्ग्रथितमिति यावत्। ग्रथितं तत् सकलसरसिजं प्राप्य तत्र देदीप्यते ततः सूक्ष्मतालक्षणेन सूक्ष्मभावस्वरूपेण सूक्ष्मभावेनेति यावत्। तेन भावेन बिलसत्तन्तुरूपस्वरूपा सती परमरसशिवे परमरसः परमानन्दः तन्मये शिवे सहस्रदलकर्णिकास्थपरबिन्दुरूपशिवसमीपे अर्थाद्गत्वा मोक्षाख्यानन्दरूपम् अर्थात् साधकस्य नित्यानन्दरूपमुक्तिं सहसा घटयतीत्यर्थः। लिङ्गत्रयमिति तत्पूर्व्वोक्तं षट्चक्रं पञ्चशिवञ्चेति चतुर्द्दशग्रन्थीन् भित्त्वेति बोध्यम्।

तदुक्तं शाक्तानन्दतरङ्गिण्याम्—

> गच्छन्तीं ब्रह्मरन्ध्रेण भित्त्वा ग्रन्थींश्चतुर्द्दश॥ इति॥

तत्र लिङ्गशिवयोर्भेदप्रकारमाह स्वतन्त्रतन्त्रे—

> षट्चक्रस्थान् शिवान् भित्त्वा देवी गच्छति निष्कलम्।
> चक्राधिष्ठानतो रूपं धृत्वा तत्तन्मनोहरम्॥
> मोहयित्वा महेशानमानन्दाप्लुतविग्रहम्।
> रमित्वा तत्र तत्रैव यावत् प्राप्नोति शाश्वतम्।
> मोहितः परया यस्मात्तस्माल्लिङ्गत्र उदाहृतः॥ इति॥

तथा मायातन्त्रे—

> भित्त्वा लिङ्गत्रयं देवी शक्तिमार्गेण गच्छति।
> तत्तद्रूपेण चक्रेषु निष्कलं प्राप्य निर्वृता॥ इति॥

तत्तद्रूपेणेति वैखरी मध्यमा पश्यन्तीभावेन।

तदुक्तम्—

> प्रथमे वैखरीभावो मध्यमा हृदये स्थिता।
> भ्रूमध्ये पश्यन्तीभावः पराभावस्तद्बिन्दुनि॥

अस्यार्थः परा पश्यन्ती मध्यमा वैखरीति चतस्रः शब्दोत्पादिकाः शक्तयः कुण्डलिन्यभेदरूपाः। ततः सहस्रारे कुण्डलिनीगमनकाले प्रथमे स्वयम्भू-

---

शुद्धसत्त्वा चतुर्व्विंशतितत्त्वसम्बन्धा। पुनः कीदृशी? विद्युदिव प्रकाशतन्तुरूपमिव स्वरूपं यस्याः सा तथा। शिवे किम्भूते? सूक्ष्मधाम्नि सूक्ष्मं धाम यस्य। प्रदीप्ते प्रकृष्टदीप्तिं कुर्व्वति।

लिङ्गसमीपे वैखरीभावेन तं मोहयित्वा एवं हृदये वाणलिङ्गं मध्यमाभावेन भ्रूमध्ये इतरलिङ्गं पश्यन्तीभावेन मोहयित्वा परंविन्दुनिकटे पराभावमाप्नोतीत्यर्थः ।

चक्रभेदप्रकारमाह—

चित्रिणीविवरे रक्तभेदपङ्कसमुद्भवान् ।
सव्यदक्षपार्श्वयोश्च नालस्थान् वाहयेच्च तान् ॥
पद्मान्नाड़ीमध्यवर्त्मरोधितान् परमेश्वरि ।
नालं वामश्विशेत् पद्मन्तेन भेदः प्रजायते ॥
यथा शिल्पवतीं रश्मिवाहीं लाययति प्रभुः ।
भेदयित्वा तथा चक्रं षड्जीवेन नयेच्च ताम् ॥ इति ॥

तथा—

षट्चक्रसन्धिमार्गेण सुषुम्नावर्त्मना तथा ।
हंसेन मनुना देवीं सहस्रारं समानयेत् ॥ इति ॥

परमरसशिवं विशिषयति । सूक्ष्मधाम्नि प्रदीपे इति । सूक्ष्मधाम निर्व्वाणशक्त्यात्मकपरंविन्दोस्तेजो हंसः तन्मध्ये दीप्यमाने इत्यर्थः ।

देवीं विशिषयति । शुद्धसत्त्वेति । सत्त्वातिसत्त्वपरमसत्त्वशुद्धसत्त्वविशुद्धसत्त्वेति पञ्चविधं शरीरावच्छिन्नचैतन्यमुत्तरोत्तरप्रकृष्टं तत्रेयं शुद्धसत्त्वा तुरीयेति यावत् ।

केन प्रकारेण मोक्षाख्यानन्दं घटयतीत्याकाङ्क्षायामुच्यते । तत्र परंविन्दौ तां कुण्डलिनीं विलाप्य केषाञ्चित् साधकानां शिवात्मनोरभेदेन तद्विन्दुचिन्तनेन केषाञ्चित् तथा शक्त्यात्मकचिन्तनेन केषाञ्चित् परमपुरुषमयचिन्तनेन तथा केषाञ्चित् केवलशिवशक्तिसामरस्यचिन्तनेन सा देवी मोक्षं घटयतीति ।

तदुक्तं मायातन्त्रे—

ऐक्यं जीवात्मनोराहुर्योगं योगविशारदाः ।
शिवात्मनोरभेदेन प्रतिपत्तिं परे विदुः ॥

शक्त्यात्मकं तथा ज्ञानं जगुरागमवादिनः।
पुराणपुरुषस्यान्ये ज्ञानमाहुर्व्विशारदाः॥
शिवशक्त्योः सामरस्यात्मकं प्रकृतिनोऽपरे॥ इति॥

ऐक्यं जीवात्मनोरिति समाधिविषयम्। योगमिति युज्यते परमात्मना एकीभूयते अनेनासौ योगः। तं योगमित्यर्थः। समाधिमुक्त्वा ध्याने योगभेदमाह। शिवात्मनोरित्यादि। सामरस्यात्मकमिति।

स्त्रीपुंयोगे तु यत् सौख्यं सामरस्यं प्रकीर्त्तितम्।

तच्चिन्तनप्रकारमाह बृहच्छ्रीक्रमे—

कलां कलङ्करहितां चिदानन्दमुपेयुषीम्।
विश्वरूपनिदानञ्च शुद्धस्फटिकसन्निभम्॥
पराविराजिवामोरुमदालसवपुःस्त्रियम्।
नादोपरि महादेवं पश्यन्ति ज्ञानचक्षुषा॥ इति॥

कलां कुण्डलिनीम्। चिदानन्दं विन्दुरूपशिवमुपेयुषीं प्राप्तवतीमित्यर्थः। विश्वरूपनिदानं परशिवम्।

तथान्यत्र—

शून्यरूपं परशिवं प्रापयित्वा तु कुण्डलीम्।
ततः सामरसीभूतां पाययित्वा परामृतम्।
पुनस्तेन पथा देवीं प्रापयेत् कुलगह्वरम्॥ इति॥

यथा—

साङ्गत्यन्तु तयोः कृत्वा सामरस्यं विभाव्य च।
तदुद्भूतरसेनैव तर्पयेद्देहदेवताम्॥ इति॥

प्रकारान्तरमाह गन्धर्व्वमालिकायाम्—

सहस्रारं शिवपुरं रम्यं दुःखविवर्ज्जितम्।
सर्व्वतोऽलङ्कृतैर्द्दिव्यं नित्यपुष्पफलद्रुमैः॥
सदाशिवपुरं रम्यं कल्पवृक्षसुशोभितम्।
पञ्चभूतात्मकं वृक्षं गुणत्रयसमन्वितम्॥

चतुर्व्वेदचतुःशाखानित्यपुष्पसमन्वितम् ।
पीतं श्वेतं तथा कृष्णं रक्तपुष्पञ्च पार्व्वति ॥
हरितञ्च विचित्रञ्च नानापुष्पमनोहरम् ।
एवं कल्पद्रुमं ध्यात्वा तदधो रत्नवेदिकम् ॥
तत्रोपरि सुपर्य्यङ्कं नानावस्त्रोपशोभितम् ।
मन्दारपुष्पसहितं नानागन्धानुमोदितम् ॥
तत्रोपरि महादेवः सदा तिष्ठति सुन्दरि ।
ध्यायेत् सदाशिवं देवं शुद्धस्फटिकसन्निभम् ॥
वज्ररत्नसमाकीर्णं दीर्घबाहुं मनोहरम् ।
सुखप्रसन्नवदनं स्मेरास्यं सततं प्रिये ॥
श्रवणे कुण्डलोपेतं रत्नहारेण शोभितम् ।
गले पद्मसहस्रेण मालया शोभितं वपुः ॥
अष्टबाहुं त्रिनयनं शिवं पद्मदलेक्षणम् ।
पादयोर्नूपुरं रम्यं शब्दब्रह्ममयं वपुः ॥
एवं स्थूलवपुस्तस्य भावयेत् कमलेक्षणे ।
पद्ममध्ये स्थितं देवं निरीक्षे शवरूपवत् ।
शवरूपो महादेवः कृत्यं नास्ति कदाचन ॥

तथा—

ध्यायेत् कुण्डलिनीं देवीं स्वयम्भूलिङ्गवेष्टिनीम् ।
हंसेन मनुना देवीं सहस्रारं समानयेत् ॥
सदाशिवो महादेवो यत्रास्ते परमेश्वरि ।
देवीं रूपवतीं कामसमुल्लासविहारिणीम् ॥
मुखारविन्दगन्धेन मोदितं परमं शिवम् ।
प्रबोध्य परमेशानि तत्रैवोपविशेत् प्रिये ॥
शिवस्य मुखपद्मं हि चुचुम्बे कुण्डली शिवे ।
सदाशिवेन देवेशि क्षणमात्रं रमेत् प्रिये ॥

नीत्वा तां कुलकुण्डलीं लयवशात् जीवेन सार्द्धं सुधी-
र्मोक्षे धामनि शुद्धपद्मसदने शैवे परे स्वामिनि।
ध्यायेदिष्टफलप्रदां भगवतीं चैतन्यरूपां परां
योगीन्द्रो गुरुपादपद्मयुगलालम्बी समाधौ यतः॥ ५२॥

अमृतं जायते देवि तत्क्षणात् परमेश्वरि।
तदुद्भवामृतं देवि लाक्षारससमायुतम्॥
तेनामृतेन देवेशि तर्पयेत् परदेवताम्।
षट्चक्रदेवतास्तत्र सन्तर्प्यामृतधारया॥
आनयेत्तेन मार्गेण मूलाधारं पुनः सुधीः।
यातायातक्रमेणैव तत्र कुर्य्यान्मनोलयम्॥
एवमभ्यस्यमानस्तु अहन्यहनि पार्व्वति।
जरामरणदुःखाद्यैर्मुच्यते भवबन्धनात्॥
एवम्प्रकारान्तरस्तन्त्रान्तरे अनुसन्धेयः॥ ५१॥

कुण्डलिनीध्यानयोगमुक्त्वा समाधियोगमाह नीत्वेति। अस्यायमर्थः। समाधौ यतः योगीन्द्रः सुधीः तां पूर्व्वोक्तोत्थापनक्रमेण ब्रह्मद्वारं प्राप्तवतीं भगवतीं कुण्डलिनीं जीवेन सार्द्धं लयवशात् लयक्रमेण शुद्धपद्मसदने सहस्रार-मध्ये परे परंविन्दुरूपे शिवे शिवपदे स्वामिनि स्वामिनिकटे नीत्वा इष्टफल-प्रदाम् इष्टदेवतारूपां तां स्वामिरूपपरंविन्दुना सहैकीभावं प्रापयित्वा परां

---

(५२) नीत्वेति। तस्यास्तु साधकाय ओमित्याह नीत्वेति। सुधीः जनः तां कुलकुण्डलिनीं जीवेन जीवात्मना सार्द्धं लयवशात् लीनां कृत्वा शैवे शिवसम्बन्धीयमोक्षे धामनि नीत्वा ध्याये-दिति। "अपानः कर्षति प्राणं प्राणोऽपानञ्च कर्षति" इत्येतत्क्रमेण यदा प्राणो जीवम् आकर्ष-यति तदैव जीवात्मना सार्द्धं तस्या आनयनम्। कीदृशे? शुक्लपद्मे सहस्रारपद्मे सदनं स्थानं

परबिन्दुस्वरूपां ध्यायेत्। चैतन्यरूपामिति। तदनन्तरं परबिन्दुमपि तन्मध्यशून्यमध्ये चिदात्मनि विलाप्य शुद्धचैतन्यरूपां ध्यायेदिति समुदायार्थः। ततः सोऽहम्भावेन जीवात्मनोरैक्यं ज्ञात्वा तत्र चित्तं विलाप्य सर्व्वव्यापकसम्पूर्णज्ञानात्मना स्थिरचित्तः सन् तिष्ठेदिति शेषः।

तदुक्तं श्रीमदाचार्य्यस्वामिना—

मकारं कारणं प्राज्ञश्चिदात्मनि विलापयेत्।
चिदात्माहं नित्यशुद्धबुद्धमुक्तसदद्वयः॥
परमानन्दसन्दोहं वासुदेवोऽहमोमिति।
ज्ञात्वा विवेचकं चित्तं तत्साक्षिणि विलापयेत्॥
चिदात्मनि विलीनञ्चेत्तच्चित्तं नैव चालयेत्।
पूर्णबोधात्मना तिष्ठेत् पूर्णाचलसमुद्रवत्॥ इति॥

मकारमिति प्रणवपक्षे। अत्र कारणं परबिन्दुः। वासुदेवोऽहमिति "वैष्णवं तन्त्रपन्ति" इत्यनेनैकवाक्यतया वैष्णवपक्षे। तेन यो यद्देवतोपासकः, स सोऽहमिति ज्ञात्वा। ॐ इति प्रणवोपासनायाम्। अन्यत्र तत्तन्मन्त्रमयकुण्डलिनीस्वरूपं ज्ञात्वा इति बोध्यम्।

तन्त्रान्तरे—

किरणस्थं तदग्निस्थं चन्द्रभास्करमध्यगम्।
महामूल्यमयं कृत्वा पूर्णस्तिष्ठति योगिराट्॥ इति॥

जीवेन सार्द्धं नीत्वेति पूर्व्वप्रदर्शितवचनात् हंस इति जीवात्मानं हृदयस्थं दीपकलिकाकारं हंस इति मन्त्रेण मूलाधारमानीय तेन सार्द्धं कुण्डलिनीं नयेत्।

यस्य। परे उत्कृष्टे अथवा परे स्थानस्वामिनि सर्व्वेषामधिकारिणि संहारकारणत्वात्। तां कीदृशीम्? इष्टफलं प्रददाति इति इष्टफलप्रदां भगवतीं श्रीकाममाहात्म्यवतीं चैतन्यरूपां चेतनास्वरूपां परां प्रकृष्टां गुरोः पादपद्मयुगलालम्बी योगीशः एवंक्रमेण भावयेदिति सम्बन्धः। समाधौ ध्यानधारणादौ यतः। [एतन्मते "शुक्लपद्मसदने" इति पाठः]।

लयवशादिति । लयक्रममाह—

त्रिकोणाख्ये तु देवेशि लङ्कारं चिन्तयेत्ततः ।
ब्रह्माणन्तत्र सञ्चिन्त्य कामदेवञ्च चिन्तयेत् ॥
जीवं तत्रैव निश्चित्य प्रणवोच्चारणेन च ।
पदे च गमनं पत्यौ विसर्गनाशकामिनी ॥
घ्राणं सञ्चिन्त्य देवेशि महेशि प्राणवल्लभे ।
डाकिनीं परमाराध्यां शक्तिञ्च भावयेत्ततः ॥
एतानि गिरिजे मातः पृथ्वीं नीत्वा गणेश्वरि ॥

तथा—

ततश्च पृथिवीं धन्यां गन्धं नीत्वा महेश्वरि ।
आकृष्य प्रणवेनैव जीवात्मानं नगेन्द्रजे ॥
कुण्डलिन्या सह प्राणं गन्धमादाय साधकः ।
सोऽहं तु मनुना देवि स्वाधिष्ठाने प्रवेशयेत् ॥

तथा—

तत्कर्णिकायां वरुणं तत्रापि भावयेत् हरिम् ।
पुराणकारिणीं शक्तिं चिन्तयित्वा वरानने ॥
एतानि गन्धञ्च शिवे रसं नीत्वा वरानने ।
जीवात्मानं कुण्डलिनीं रसञ्च मणिपूरके ॥

तथा—

तत्कर्णिकायां सुश्रोणि वह्निं सञ्चिन्त्य साधकः ।
तत्र रुद्रः स्वयं कर्त्ता संहारे सकलस्य च ॥
लाकिनीशक्तिसंयुक्तं भावयेत्तं मनोहरम् ।
ततश्चक्षुरिन्द्रियञ्च ध्यात्वा तेजोमयं शिवे ॥
एतद्रसानि सुभगे रूपं नीत्वा महाभगे ।
जीवात्मानं कुण्डलिनीं रूपञ्चानाहते नयेत् ॥

तथा —

तत्कर्णिकायां वायुञ्च जीवस्थाननिवासिनम् ।
तत्र योनिमण्डलञ्च वाणलिङ्गविराजितम् ॥
राकिणीशक्तिसंयुक्तं तत्र वायुत्वगिन्द्रियम् ।
एतानि रूपं संयुज्य स्पर्शे त्वमलकारिणि ।
जीवं कुण्डलिनीं स्पर्शं विशुद्धे स्थापयेत्ततः ॥

तथा—

तत्कर्णिकायामाकाशं शिवञ्च शाकिनीयुतम् ।
वाचः श्रोत्रञ्च आकाशे संस्थाप्य नगनन्दिनि ॥
एतानि स्पर्शं शब्दे वै नीत्वा शङ्करि मत्प्रिये ।
जीवं कुण्डलिनीं शब्दञ्चाज्ञाचक्रे निधापयेत् ॥

इत्यन्तं कङ्कालमालिन्याम् । त्रिकोणाख्ये प्रक्रान्तमूलाधारत्रिकोणे । तन्मध्ये लङ्कारचिन्तनमिति । एवं प्रणवोच्चारणेन जीवानयनमिति मतान्तरम् । विसर्गनाशकामिनीति । विसर्ग उपसर्गः कामोद्वेग इति यावत् । तन्नाशयितुं शीलं यस्याः सा कुण्डलिनी पत्यौ परे सहस्रदलकमलस्थविन्दुमयशिवे गमनं साधकेन कार्य्येति शेषः । एतानि लङ्कारब्रह्मकामदेवडाकिनीशक्तिघ्राणेन्द्रियाणि पृथ्वीं नीत्वा पृथ्व्यां विलाप्य पृथिवीं गन्धतत्त्वे विलाप्य जीवात्मानं कुण्डलिनीं गन्धतत्त्वं प्रणवेनाकृष्य सोऽहंमन्त्रेण स्वाधिष्ठाने समानयेत् इति शेषः । एवं सर्व्वत्र बोध्यम् । जीवं कुण्डलिनीं शब्दतत्त्वमाज्ञाचक्रे नीत्वा शब्दतत्त्वं तत्रस्थाहङ्कारे अहङ्कारं महत्तत्त्वे महत्तत्त्वं हिरण्यगर्भाख्यसूक्ष्मप्रकृतौ प्रकृतिं परविन्दौ विलापयेत् ।

तदुक्तं मन्त्रतन्त्रप्रकाशे—

अहङ्कारे हरेद्व्योम सशब्दं तन्महत्यपि ।
महच्च सर्व्वशक्तीनामव्यक्ते कारणे परे ॥
सच्चिदानन्दरूपं यत् वैष्णवं कारणं परम् ।
पृथिव्यादिक्रमात् सर्व्वं तत्र लीनं विचिन्तयेत् ॥ इति ॥

सर्व्वशक्तिमव्यक्ते हिरण्यगर्भाख्यसूक्ष्मप्रकृतौ महद्धरेत् प्रकृतिञ्च परे परविन्दुरूपकारणे हरेदित्यर्थः। अत्र—

समाधिकालात् प्रागेवं विचिन्त्यातिप्रयत्नतः।
स्थूलसूक्ष्मक्रमात् सर्व्वं चिदात्मनि विलापयेत्॥

इत्याचार्य्यविधानात् स्थूलानां सूक्ष्मे लयः। पृथिव्यादिकमनाहतपर्य्यन्तं तेषामुक्तक्रमेण लये पृथिव्याश्रितत्वेन पादघ्राणेन्द्रिययोः पृथिवीप्रपञ्चसमुदायस्य च पृथिवीस्थाने विलापनम्। एवं जलस्थाने पाणिरसनेन्द्रियजलप्रपञ्चानां वह्निस्थाने पायुचक्षुरिन्द्रियवह्निप्रपञ्चानां वायुस्थाने उपस्थत्वगिन्द्रियवायुप्रपञ्चानाम् आकाशस्थाने वाक्श्रोत्रेन्द्रियाकाशप्रपञ्चानां लयः। आज्ञाचक्रे सूक्ष्ममहदहङ्कारादिकं तेषामुक्तक्रमेण कारणे लयः। ततः चकाराद्यकारान्तवर्णान् विलोमेन विलाप्य स्थूलसूक्ष्मक्रमात् सर्व्वमित्यत्र सर्व्वमित्युपादानात् ब्रह्ममात्रावस्थितये आज्ञाचक्रोर्द्ध्वस्थितपूर्व्वोपदर्शितविन्दुबोधिन्यादिसकलकारणशरीरमपि विलोमेनादिकारणे परंविन्दौ विलापयेदिति।

तत्प्रकारमाह—

सङ्कल्पैवं ततो न्यासस्थानाद्वर्णांश्च संहरेत्।
प्रतिलोमे लचलयो लकारस्य हकारके॥
हलयश्च सकारे च सलयश्च षकारके।
क्रमेणैवमपर्य्यन्तं लयमुत्पाद्य यत्नतः॥ इति॥

तथा—

तद्वर्णौ संहरेद्विन्दौ कलायान्तं नियोजयेत्।
तां नादेनान्तरं नादं नादान्ते संहरेत् पुनः॥
तमुन्मन्यां समायोज्य विष्णुवक्त्रे नयेच्च ताम्।
तं पुनर्गुरुवक्त्रे तु योजयेत् साधकोत्तमः।
ततश्च योजयेद्वर्णान्विलयेत् परमे शिवे॥ इति॥

विष्णुवक्त्रे पुंविन्दौ।

सूर्य्यविन्दुर्मुखं प्रोक्तमधस्तादिन्दुपावकौ। इत्यादि।

बिन्दुः पुरुष इत्युक्तो विसर्गः प्रकृतिः स्मृतः ।

इत्यादिवचनयोरेकवाक्यतया तस्यैव वक्तृत्वात् ।

नीत्वा तां पुंसि बिन्द्वात्मनि तमथ परात्मन्यथो कालतत्त्वे
तद्वै शक्तौ चिदात्मन्यपि च नयतु तां केवले धाम्नि शान्ते ।

इति केशवाचार्य्यवचनैकवाक्यत्वाच्च । अत्र स्वस्वकारणे संहरणदर्शनात् नादान्तस्य व्यापकशक्तौ तामुन्मन्यां तां समन्यां तां विष्णुवक्त्रे इति बोध्यम् । एवंप्रकारेण वर्णानां संहरणे षट्चक्राणां संहारः पद्मदलानां वर्णमयत्वात् ।

तदुक्तं विश्वसारे—

आदिवर्णात्मकं पत्रं पद्मानां परिकीर्त्तितम् ॥ इति ॥

अथ वर्णपद्मोभयसंहरणप्रकारमाह सम्मोहनतन्त्रे—

वादिसान्तान् दलस्थार्णान् संहरेत् कमलासने ।
तं षट्पत्रमये पद्मे बादिलान्ताक्षरान्विते ।
स्वाधिष्ठाने समायोज्य बोधयेदाज्ञया गुरोः ॥ इत्यादि ॥
द्विपत्रे हक्षलसिते योजयित्वा ततः सुधीः ।
तद्वर्णौ संहरेद्बिन्दौ तं कलायां नियोजयेत् ॥ इत्यन्तवचनम् ।

ततश्च मूलकमले चतुर्व्वर्णं संहृत्य तत्पद्मं स्वाधिष्ठाने संहरेत् । एवं-क्रमेणाज्ञाचक्रस्थहक्षपर्य्यन्तं संहृत्य तत्पद्मं बिन्दौ बिन्दुं बोधिन्याम् एवं पूर्व्ववत् सर्व्वं परंबिन्दौ विलापयेदिति । एवञ्चाज्ञाचक्रसंहरणे तत्कर्णिकास्थ-हाकिनीतरलिङ्गप्रणवादीनां निराधारस्थित्यसम्भवात् प्रकृतिपर्य्यन्तसंहरणा-नन्तरं तानपि परंबिन्दौ संहरेत् । शुद्धपद्मसदने किम्भूते ? मोक्षे धामनि मुक्तिसम्पादकस्थाने इत्यर्थः । योगीन्द्रं विशेषयति गुरुपादपद्मयुगलालम्बीति । गुरूपदेशेनैव सर्व्वसिद्धिरित्यतस्तत्पदाश्रितः सन्निति भावः ।

समाधौ यत इति । समाधिलक्षणमाह कुलार्णवे—

यदत्र नात्र निर्भासः स्तिमितोदधिवत् स्मृतम् ।
स्वरूपशून्यं यद्ध्यानं तत् समाधिर्व्विधीयते ॥

लाक्षाभं परमामृतं परशिवात् पीत्वा पुनः कुण्डली
नित्यानन्दमहोदयात् कुलपथान्मूले विशेत् सुन्दरी।
तद्दिव्यामृतधारया स्थिरमतिः सन्तर्पयेद्दैवतं
योगी योगपरम्पराविदितया ब्रह्माण्डभाण्डस्थितम्॥ ५३॥

तथान्यत्र—

समत्वभावना नित्यं जीवात्मपरमात्मनोः।
समाधिमाहुर्मुनयः प्रोक्तमष्टाङ्गलक्षणम्॥ इति॥

"योगश्चित्तवृत्तिनिरोधः" इति पातञ्जलसूत्रम्। तस्मिन् यतः तदभ्यासयुक्त इत्यर्थः॥ ५२॥

उक्तप्रकारसकलयोगचिन्तनानन्तरं यत्कर्त्तव्यं तदाह लाक्षाभमिति। अस्यार्थः। कुण्डलिनी सुन्दरी परशिवात् परमामृतं पीत्वा नित्यानन्दमहोदयान्निःसृत्य कुलपथात् चित्रिणीनाड़ीमध्यस्थब्रह्मपथं प्राप्य मूले मूलाधारे पुनः प्रविशेदित्यन्वयः। पीत्वेति पूर्व्वोक्ततत्तद्ग्रासानन्तरं शिवशक्त्योः सामरस्यं विभाव्य सामरस्यानन्देन परशिवादुत्पन्नपरमामृतेन कुण्डलिनीं तर्पयेत्। तत्तर्पणामृतं पीत्वेत्यर्थः।

साङ्गत्यन्तु तयोः कृत्वा पाययित्वा परामृतम्॥

इति पूर्व्वोक्तवचने पाययित्वेत्यनेन पानकार्य्यप्रेरणबोधनात्।

अमृतं विशेषयति लाक्षाभमिति। अलक्तरसवद्रक्ताभमित्यर्थः। नित्यानन्दमहोदयादिति नित्यानन्दस्य महोदयो महाप्रकाशो यत्र तस्मादित्यर्थः। मूले विशेदिति। येन प्रकारेणोत्तानन्नं पुनस्तेन प्रकारेण मूलाधारे आनयनम्। तेन यदा लिङ्गादिभेदक्रमेणोर्द्धं गच्छति तदा तद्रूपेणैव पुनराधारमायाति।

---

(५३) लाक्षाभमिति। इदानीमस्या आगमनं स्वस्थाने इति तदाह सा कुण्डलिनी पूर्णानन्दस्य महान् उदयो यस्मात्तस्मात् परमशिवात् सदाशिवात् परमामृतं पीत्वा तेनैव कुलपथेन

तदुक्तं श्रीमदाचार्य्यस्वामिना—

सुधाधारासारैश्चरणयुगलान्तर्व्विगलितैः
प्रपञ्चं सिञ्चन्ती पुनरपि रसाम्नायमहसा।
अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं
स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणी॥ इति॥

अत्र श्लोके रसाम्नायमहसेति। आम्नायते कथ्यते विधीयत इति यावत्। तेनाम्नायो विधानम्। महः प्रकाशः पुनरित्यनेन पूर्व्वरूपरसविधानप्रकाशेन स्वां भूमिं मूलाधारमवाप्य इत्यर्थात्तथा प्रतीयते। लयक्रमेण गमने तु पुनः सृष्टिक्रमेणागमनम्। तदुक्तं यथा—

ततः सा कुण्डली शक्तिर्मुद्राकारा सुरेश्वरी।
पुनस्तेन प्रकारेण गच्छत्याधारपङ्कजे॥ इति॥

तथा भूतशुद्धिप्रकरणे—

परात्मनः पृथिव्यादितत्तत्तत्त्वानि च क्रमात्।
जीवं कुण्डलिनीं चापि स्वस्थानं प्रापयेत् क्रमात्॥ इति॥

विशेषस्तु—

प्रकाशमाना प्रथमप्रयाणे
प्रतिप्रयाणेऽप्यमृतायमाना॥ इति॥

तदनन्तरं तद्दिव्यामृतधारया पूर्व्वदर्शितशिवशक्तिसामरस्योत्पन्नपरमामृतस्य ब्रह्मरन्ध्रान्मूलाधारपर्य्यन्तगलितधारया। अतएवोक्तं तृतीयश्लोके—"ब्रह्मद्वारं तदास्ये प्रविलसति सुधाधारगम्यप्रदेशम्" इति। स्थिरमतिः स योगी दैवतम् इष्टदैवतं षट्चक्रस्थडाकिन्यादिदैवतञ्च सन्तर्पयेदित्यर्थः।

तेनामृतेन देवेशि तर्पयेत् परदेवताम्।
षट्चक्रदेवतास्तत्र सन्तर्प्यामृतधारया॥

मूले मूलाधारपद्मे। सा कीदृशी? सुन्दरी। अमृतं कीदृशम्? लाक्षाभं रजःसम्बन्धात् ईदृशी भावनैव कर्त्तव्या महाग्रन्थोक्तत्वात्। अतो योगी ध्यानपरम्पराक्रमेण ज्ञातया तद्दिव्यामृतधारया स्थिरमतिः सन् ब्रह्माण्डभाण्डस्थितं सर्व्वदैवतं सन्तर्पयेत्॥ ५२॥

ज्ञात्वैतत् क्रममुत्तमं यतमना योगी यमाद्यैर्युतः
श्रीदीक्षागुरुपादपद्मयुगलामोदप्रवाहोदयात्।
संसारे न हि जन्यते न हि कदा संक्षीयते संक्षये
नित्यानन्दपरम्पराप्रमुदितः शान्तः सतामग्रणीः ॥ ५४ ॥

इति पूर्व्वोक्तवचनात्। अमृतधारां विशेषयति। योगपरम्पराविदितयेति। योगस्य गुरूपदेशपरम्पराप्राप्तत्वात् योगपरम्परेत्युक्तिरिति भावः। तेन गुरूपदेशपरम्पराविदितयेति फलितार्थः। अमृतं विशेषयति ब्रह्माण्ड-भाण्डस्थितमिति ब्रह्माण्डस्य भाण्डं आधारपात्रं कुण्डलिनी तस्याः सर्व्वेषां योनिरूपत्वात्। तत्र स्थितं कुण्डलिनीपात्रस्थितमित्यर्थः॥ ५३ ॥

उक्तयोगक्रमज्ञानफलमाह ज्ञात्वैतदिति। श्रीदीक्षागुरुपादपद्मयुगला-मोदप्रवाहोदयादिति। आमोद आनन्दः तस्य प्रवाहोऽविच्छिन्नोत्तरो-त्तरसम्बन्धस्तेन नित्यानन्द इति यावत् तस्योदयो यस्मात्ताहशपादपद्म-युगलाज्ज्ञात्वेत्यर्थः। दीक्षागुरुरिति प्रथमोपस्थितत्वेन गौरवातिशयेन च तद्ग्रहणम्। तदभावे अन्यगुरोरपि ज्ञातव्यम्।

अतएवोक्तम्—

मधुलुब्धो यथा भृङ्गः पुष्पात् पुष्पान्तरं व्रजेत्।
ज्ञानलुब्धस्तथा शिष्यो गुरोर्गुर्व्वन्तरं व्रजेत्॥ इति॥

नित्यानन्दपरम्पराप्रमुदित इति। नित्यानन्दधारारूपहर्षयुक्त इत्यर्थः। सतां योगिरूपप्रशस्तजनानामग्रगण्य इत्यर्थः॥ ५४ ॥

---

(५४) ज्ञात्वैतत्। एतत् उत्तमं क्रमं ज्ञात्वा संयतमनाः सन् योगी जनः यमाद्यभ्यासेषु श्रीदीक्षागुरुपादपद्मयुगलामोदप्रवाहोदयात् संसारे न हि जन्यते। न हि कदा संक्षये संक्षीयते। प्रलयेऽपि तस्य क्षयो नास्तीत्यर्थः। सः कीदृशः? पूर्णानन्दपरम्परया प्रमुदितं स्वान्तं यस्य सः तथा। सतामग्रणीरपि भवति। [अत्र मते "पूर्णानन्दपरम्पराप्रमुदितस्वान्तः" इति पाठः।]

योऽधीते निशि सन्ध्ययोरथ दिवा योगी स्वभावस्थितो
मोक्षज्ञाननिदानमेतदमलं शुद्धञ्च गुप्तं परम् ।
श्रीमत् श्रीगुरुपादपद्मयुगलालम्बी यतान्तर्मना-
स्तस्यावश्यमभीष्टदैवतपदे चेतो नरीनृत्यते ॥ ५५ ॥

षट्चक्रश्लोकाध्ययनफलमाह । योऽधीत इति । स्वभावे स्थित आत्मभावे नियुक्त इत्यर्थः । यतान्तर्मना इति यतं योगाभ्यासेन स्थिरीकृतम् अन्तरात्मनि मनो येन तादृश इत्यर्थः । स्पष्टमन्यत् ॥ ५५ ॥ * ॥

इति श्रीपूर्णानन्दयतिविरचितश्रीतत्त्वचिन्तामण्यन्तर्गत-
षट्चक्रविवरणश्लोकार्थपरिष्कारिण्याम्
अष्टमं प्रकरणं समाप्तम् ॥ * ॥

---

(५५) योऽधीते इति । अथैतत् सुगुप्तक्रमं यः स्वीयभावस्थितः सन् निशि सन्ध्ययोः दिवा अधीते तस्यावश्यमेव अभीष्टदैवतपदे चित्तं सुष्ठुनृत्यति । यतं निश्चलम् अन्तर्मनो यस्य स तथेति ।

इति षट्चक्रभेदटिप्पनी समाप्ता ।

पादुकापञ्चकम् ।

शिवोक्तम् ।

ब्रह्मरन्ध्रसरसीरुहोदरे
नित्यलग्नमवदातमद्भुतम् ।
कुण्डलीविवरकाण्डमण्डितं
द्वादशार्णसरसीरुहं भजे ॥ १ ॥

पञ्चवक्त्रकृतपञ्चपादुकास्तोत्रमंहसमुदायनाशकम् ।
तस्य रोचिरमलाख्यटीकया कोऽपि कालीचरणः प्रकाशयेत् ॥

अथ त्रिलोकोद्धारकर्त्ता सदाशिवः स्तोत्ररूपेण श्रीगुरुध्यानयोगं कथयिष्यन् तदर्थं प्रथमतो गुरोरधिवासस्थानं निरूपयति ब्रह्मरन्ध्रेति। अस्यार्थः ब्रह्मरन्ध्रसरसीरुहस्य ब्रह्मरन्ध्रविशिष्टं यत् सरसीरुहं सहस्रदलकमलं तस्योदरे तन्मध्ये तत्कर्णिकायामिति यावत्। द्वादशार्णसरसीरुहं द्वादशवर्णविशिष्टं पद्मं भजे सेवे इत्यर्थः। अत्र भजे इति क्रियया अस्मत्कर्त्तृत्वोपस्थितेः शिववाक्यात् शिवेन स्वीयभजनीयत्वं दर्शयता सर्व्वेषां शिवोक्तमन्त्रोपासकानां भजनीयत्वं सूचितम्। एवं सर्व्वत्र बोध्यम्।

ब्रह्मरन्ध्रस्थानमाह कङ्कालमालिनीतन्त्रे सहस्रदलपद्ममुपक्रम्य—

तत्कर्णिकायां देवेशि अन्तरात्मा ततो गुरुः ।
सूर्य्यस्य मण्डलं तत्र चन्द्रमण्डलमेव च ।
ततो वायुर्म्महानादो ब्रह्मरन्ध्रं ततः स्मृतम् ॥ इति ॥

केचित्तु तादृशपद्मोदरे तत्कर्णिकास्थत्रिकोणोदरे इति वदन्ति। तन्न अत्रोदरशब्दस्य मध्यवाचकत्वात् पद्ममध्यं कर्णिकैव प्रतीयते न तु कर्णिका-मध्यत्रिकोणमध्यम् अनुपस्थितेः। व्यक्तमाह श्यामासपर्य्याधृतवचनम्—

शिरःपद्मे सहस्रारे शुक्लवर्णे त्वधोमुखे।
तरुणारुणकिञ्जल्के सर्व्ववर्णविभूषिते।
कर्णिकान्तःपुटे तत्र द्वादशार्णसरोरुहे॥ इत्यादि॥

अत्र कर्णिकान्तःपुटे इति सुव्यक्तम्। द्वादशार्णेति द्वादशवर्णाः सह-ख्फ्रें हसक्षमलवरयम् इति गुरुमन्त्रात्मकद्वादशवर्णाः तद्विशिष्टपद्ममिति तत्त्वज्ञाः। केचित्तु द्वादशवर्णो वाग्भववीजं तद्युक्तपद्ममिति वदन्ति। तन्न तथात्वे—

कर्णिकान्तःपुटे तत्र द्वादशार्णसरोरुहे।
तेजोमये कर्णिकान्तश्चन्द्रमण्डलमध्यगे॥
अकथादित्रिरेखीये हलक्षत्रयभूषिते।
हंसपीठे मन्त्रमये स्वगुरुं शिवरूपिणम्॥

इति वचने मन्त्रमये वाग्भववीजरूपगुरुमन्त्रमये इत्यनेन द्वादशार्णेत्यस्य पौनरुक्त्यापत्तेः। द्वादशार्णेति द्वादश अर्णाः वर्णाः यत्र तदिति व्युत्पत्त्या सरोरुहे द्वादशवर्णयोगः प्रतीयते। यद्यप्यत्र द्वादशवर्णानां विशेषाभिधानं तद्योगस्थानञ्च नाभिहितं तथापि—

हंसाभ्यां परिवृत्तपत्रकमले दिव्यैर्ज्जगत्कारणै-
र्विश्वोत्तीर्णमनेकदेहनिलयं स्वच्छन्दमात्मेच्छया।

इति गुरुगीतायां हंसाभ्यां परिवृत्तपत्रेत्यनेन तादृशसरोरुहस्य हंसयुक्तपत्त्रं प्रतीयते। तयोरेव षड़ावृत्त्या द्वादशवर्णा भवन्ति तद्युक्तं पत्रम्। अत्र पत्रावच्छेदे वर्णयोगकथनात् पत्रस्यापि द्वादशसंख्यकत्वं व्यक्तीभूतमिति सुधीभिर्भाव्यम्। द्वादशार्णसरोरुहं विशेषयति नित्येति। नित्यलग्नमविना-भावसम्बन्धेन सहस्रदलपद्मेन मिलितम् अवदातं शुक्लवर्णमद्भुतं ब्रह्मतेजो-मयत्वादिनात्याश्चर्य्यम्। कुण्डलीविवरकाण्डमण्डितमिति। कुण्डल्या विवरं

तस्य कन्दलितकर्णिकापुटे
कॢप्तरेखमकथादिरेखया ।
कोणलक्षितहलक्षमण्डली-
भावलक्ष्यमबलालयं भजे ॥ २ ॥

सहस्रदलकमलकर्णिकास्थशिवसमीपे कुण्डलीगमनपथरूपं छिद्रम् । तदधिकरणभूतकाण्डं नालं चित्रिणी नाड़ी तेन भूषितम् । यथा मृणालोपरि पद्मस्थितिस्तद्वत् चित्रिणीनाड़ीरूपमृणालभूषितमित्यर्थः ॥ १ ॥

उक्तपद्मकर्णिकायामकथादित्रिकोणमध्ये गुरुश्चिन्तनीयः अतस्तज्ज्ञानार्थं त्रिकोणं निरूपयिष्यन्नाह तस्येति । अस्यार्थः कन्दलितकर्णिकापुटे इति । कन्दलं परस्पराक्रमणपूर्व्वकं वाग्विवादः । अत्र लक्षितलक्षणया परस्पराक्रमणमात्रं गृह्यते । पुटम् आधारभूतस्थानम् । ततश्च तस्य पूर्व्वोक्तसहस्रदलकमलद्वादशदलकमलोभयस्य कन्दलिते परस्पराक्रान्ते कर्णिकापुटे कर्णिकात्मकाधारस्थाने अबलालयं भजे सेवे इत्यन्वयः । केचित्तु तस्य द्वादशदलस्येति व्याख्यायन्ति । तन्न तथात्वे श्रीनाथस्य सहस्रदलकमलद्वादशदलकमलोभयस्थले स्थितिविधायकवक्ष्यमाणवचनानामसङ्गत्यापत्तेः ।

अबला शक्तिः सा चात्र बिन्दुत्रयाङ्कुरभूतरामाज्येष्ठारौद्रीनामकत्रिशक्तिरूपरेखात्रयमिलितत्रिकोणरूपा कामकला तद्रूपालयमित्यर्थः । कामकलायास्तद्रूपत्वमाह यामले—

अथ कामकलां वक्ष्ये तद्देवतात्मरूपकम् ।

इत्युपक्रम्य—

त्रिबिन्दुः सा त्रिशक्तिः सा त्रिमूर्त्तिः सा सनातनी ।

इत्याद्युक्तम् ।

सा कामकला पूर्व्वदर्शितत्रिशक्तिरूपा इत्यर्थः ।

अवलालयं विशेषयति क्लृप्तरेखमकथादिरेखयेति । अकारादिषोड़शस्वरै रामा रेखा ककारादिषोड़शवर्णैर्ज्येष्ठा रेखा थकारादिषोड़शभी रौद्री रेखा इति रेखात्रयेण क्लृप्ता चिह्निता रेखा यत्र तादृशावलालयमित्यर्थः ।

तदुक्तं बृहच्छ्रीक्रमे कामकलाप्रकरणे—

विन्दोरङ्कुरभावेन वर्णावयवरूपिणी ॥ इति ॥

पुनः किम्भूतम् ? कोणलक्षितहलक्षमण्डलीभावलक्ष्यमिति । कोणेषु उक्तत्रिकोणस्यान्तरालेषु सम्मुखदक्षिणवामकोणेषु लक्षितैः प्रकाशितैः हलक्ष-वर्णैः मण्डलीभावेन तत्तद्वर्णाङ्कितस्थानरूपेण लक्ष्यते ज्ञायते असौ तादृश-मित्यर्थः । अत्र त्रिकोणस्य विशेषज्ञानं विना सम्यग्ध्यानं न भवतीत्यतः प्रमाणान्तरेण त्रिकोणं विशेषयति । अत्र त्रिकोणं वामावर्त्तेन लेख-नीयम् ।

तदुक्तं शाक्तानन्दतरङ्गिण्याम्—

वामावर्त्तेन विलिखेदकथादित्रिकोणकम् ॥ इति ॥

कालपूर्वाम्नाये—

त्रिविन्दुं परमं तत्त्वं ब्रह्मविष्णुशिवात्मकम् ।
वर्णमयं त्रिकोणन्तु जायते विन्दुतत्त्वतः ॥ इति ॥

तथा—

अकारादिविसर्गान्ता ब्रह्मरेखा प्रजापतिः ।
ककारादितकारान्ता विष्णुरेखा परात्परा ।
थकारादिसकारान्ता शिवरेखा त्रिविन्दुतः ॥

तन्त्रजीवने—

रजःसत्त्वतमोरेखा योनिमण्डलमण्डिता ॥

तथा—

उपरिष्टात् सत्त्वरेखा रजोरेखा स्ववामतः ।
तमोरेखा दक्षभागे रेखात्रयमुदाहृतम् ॥

एतद्वचनपर्य्यालोचनयापि अकथादीनां वामावर्त्तत्वमायातम् ।

तत्पुटे पटुतड़ित्कड़ारिम-
स्पर्द्धमानमणिपाटलप्रभम्।
चिन्तयामि हृदि चिन्मयं वपु-
र्नादविन्दुमणिपीठमण्डलम् ॥ ३ ॥

स्वतन्त्रतन्त्रे—

अकथादित्रिपंक्त्या तु हलक्षमध्यमण्डितम् ॥ इति ॥

एतेन हलक्षवर्णानां त्रिकोणमध्ये स्थितिरित्युक्तम्। अलं विस्तरेण ॥ २ ॥

उक्तत्रिकोणमध्ये मणिपीठोपरि गुरुस्थितिरित्यतस्तत्र मणिपीठं वर्णयति तत्पुट इति। अयमर्थः। तत्पुटे उक्तत्रिकोणमध्ये नादविन्दुमणिपीठमण्डलं हृदि मनसि चिन्तयामीत्यन्वयः। नादविन्दुमणिपीठमण्डलमिति। नादविन्दुभ्यां सह मणिपीठमण्डलम् अथवा नादश्च विन्दुश्च मणिपीठमण्डलञ्च तदित्यर्थः। केचित्तु नादविन्दुरूपमणिपीठमण्डलमिति वदन्ति। तन्न तथात्वे नादस्य शुक्लवर्णत्वात् विन्दो रक्तवर्णत्वात् पटुतड़ित्कड़ारिमेत्यादिविशेषणस्यासंलग्नापत्तेः।

तथाहि—

परशक्तिमयः साक्षात्त्रिधासौ भिद्यते पुनः।
विन्दुर्नादो वीजमिति तस्य भेदाः समीरिताः ॥

इति सारदावचनस्य परशक्तिमयो विन्दुः ते वीजनादविन्दवः वह्नीन्द्वर्कस्वरूपिणः इत्यर्थकत्वे नादस्य चन्द्रस्वरूपत्वात् शुक्लत्वं विन्दोः सूर्य्यस्वरूपत्वात् रक्तत्वमायातम्। व्यक्तमाह षट्चक्रवर्णने पूर्णानन्दः—

तदूर्द्ध्वे नादोऽसौ वलधवलसुधाधारसन्तानहासी ॥ इति ॥

वृहच्छ्रीक्रमे—

वालसूर्य्यप्रतीकाशमासीद्विन्दुमदक्षरम् ॥ इति ॥

ऊर्द्धमस्य हुतभुक्शिखात्रयं
तद्विलासपरिबृंहणास्पदम् ।
विश्वघस्मरमहोच्चिदोत्कटं
व्यामृषामि युगमादिहंसयोः ॥ ४ ॥

एवञ्च तयोः शुक्लरक्तत्वे मणिपाटलप्रभत्वं सर्व्वथाऽसम्भवम् । अतः प्रदर्शितार्थ एव साधीयान् । एवञ्चाधो नादः ऊर्द्धं विन्दुः मध्ये मणिपीठमण्डलं चिन्तनीयमिति व्यवस्था ।

व्यक्तमाह कङ्कालमालिनीतन्त्रे गुरुध्याने—

सहस्रदलपद्मस्थमन्तरात्मानमुत्तमम् ।
तस्योपरि नादविन्दोर्म्मध्ये सिंहासनोज्ज्वलम् ॥
तस्मिन्निजगुरुं नित्यं रजताचलसन्निभम् ॥ इत्यादि ॥

मणिपीठमण्डलं विशेषयति पटुतड़िल्कड़ारिमस्पर्द्धमानमणिपाटलप्रभमिति । स्वकार्य्यसुसम्पादनयोग्यत्वं पटुत्वम् । ततश्च स्वप्रकाशरूपस्वकार्य्यसुसम्पादनविरोधिदोषराहित्येन सर्व्वव्यापकातिप्रकाशमानानां तड़ितां कड़ारिम्ना सदृशकड़ारिम्ना पिङ्गलवर्णेन स्पर्द्धमानैर्म्मणिभिः पाटलप्रभमित्यर्थः मणिपीठस्य मणिमयसर्व्वाङ्गत्वात् । अस्य नादविन्दुमणिपीठमण्डलस्य वपुश्चिन्मयं ज्ञानमयमित्यर्थः । अन्ये तु चिन्मयं वपुः द्वादशस्वरस्वरूपं वाग्भववीजं गुरुमन्त्रं वपुश्चिन्तयामीति वदन्ति । तन्मन्दम् गुरोः शुक्लवर्णत्वात् तद्वीजस्यापि शुक्लत्वेन मणिपाटलप्रभत्वविशेषणं न सङ्गच्छते ॥ ३ ॥

हंसपीठोपरि नादविन्दुमध्यस्थमणिपीठोर्द्धत्रिकोणे गुरोरधिवासः । अतस्तयोर्ज्ञानार्थं हंसत्रिकोणयोः स्वरूपं ज्ञापयिष्यन्नाह ऊर्द्धमिति । अस्यार्थः । अहम् आदिहंसयोर्युगं व्यामृषामि । एवमस्य मणिपीठस्योर्द्धं हुतभुक्शिखात्रयं व्यामृषामि । तद्विलासेन हुतभुक्शिखात्रयस्य सुप्रकाशेन परिबृंहणास्पदम् उद्दिश्यमानमणिपीठरूपास्पदं व्यामृषामीति तत्प्रति-

बन्धकविषयचिन्तादित्यागेन स्वस्वस्थाने स्थिरतरं भावयामीति प्रत्येकं क्रियान्वयः।

हुतभुक्शिखात्रयमिति। हुतभुक्शिखादित्रयं हुतभुक्शिखात्रयम्। शाकपार्थिवादित्वात् मध्यपदलोपे तत्पदसिद्धिः। हुतभुक् वह्निस्तच्छिखा वह्निविन्दोरङ्कुरभूतदक्षिणादीशपर्य्यन्तगता रामा रेखा। आदिना ईशानकोणस्थचन्द्रविन्दोरङ्कुरभूतेशानादिमरुत्कोणपर्य्यन्तगता ज्येष्ठा रेखा। मरुत्कोणस्थसूर्य्यविन्दोरङ्कुरभूततदादिवह्निविन्दुसङ्गता रौद्री रेखा। एवं त्रिविन्दुत्रिरेखामिलितत्रिकोणं कामकलारूपम्।

तदुक्तं बृहच्छ्रीक्रमे—

विन्दोरङ्कुरभावेन वर्णावयवरूपिणी।
विन्द्वग्रे कुटिलीभूता यस्मादीशानमागता॥
मनोरमा शक्तिरूपा सा शिखा चित्कला परा।
शक्तीशानगता रेखा प्रत्यगाग्नेयमात्रगा॥
ज्येष्ठा सा परमेशानी त्रिपुरा परमेश्वरि।
व्यक्तीभूय पुनर्व्वामे प्रथमाङ्कुरमागता।
इच्छया नादसंलग्ना रौद्री शृङ्गाटमागता॥ इति॥

सा शिखेति आग्नेयमात्रगा वह्निसम्बन्धिनी मात्रा सा शिखा वह्निशिखेत्यर्थः।

माहेश्वरीसंहितायाम्—

सूर्य्यश्चन्द्रस्तथा वह्निरिति विन्दुत्रयं भवेत्।
ब्रह्मा विष्णुस्तथा शम्भुरिति रेखात्रयं मतम्॥ इति॥

एतत्त्रिकोणमध्ये गुरुस्थितिं स्पष्टमाह प्रेमयोगतरङ्गिणीधृतवचनम् सहस्रदलमुपक्रम्य—

तन्मध्ये तु त्रिकोणन्तु विद्युदाकारमुत्तमम्।
विन्दुद्वयञ्च तन्मध्ये विसर्गरूपमव्ययम्।
तन्मध्ये शून्यदेशे च शिवः परमसंज्ञकः॥ इति॥

अतएव शङ्कराचार्य्येणापि आनन्दलहर्य्याम् इदं सुव्यक्तमभिहितम् । श्रीनाथस्य विसर्गारूढ़त्वात् इति ललितारहस्यकारेणोक्तञ्च । विसर्गस्तु त्रिकोणोर्द्ध्ववर्त्तिचन्द्रसूर्य्यरूपविन्दुद्वयमिति ।

आदिहंसयोर्युगमित्यत्रादिनान्तरात्मसंज्ञकपरमहंस एव गृह्यते न तु दीपकलिकाकारजीवात्महंसः । अयं हंसः प्रकृतिपुरुषरूपः ।

तदुक्तमागमकल्पद्रुमे पञ्चशाखायाम्—

हङ्कारो विन्दुरित्युक्तो विसर्गः स इति स्मृतः ।
विन्दुः पुरुष इत्युक्तो विसर्गः प्रकृतिः स्मृतः ॥
पुंप्रकृत्यात्मको हंसस्तदात्मकमिदं जगत् ॥ इति ॥

केचित्तु अस्य मणिपीठस्योर्द्ध्वम् आदिहंसयोर्युगं व्यामृषामीति व्याख्यायन्ति । तन्मन्दं पूर्व्वोक्तकङ्कालमालिनीवचनबोधितहंसोर्द्ध्वं नादविन्दुमध्यस्थमणिपीठे नादविन्दोरधःस्थहंसस्थितिः सर्व्वत्रासम्भवात् । एतेन हुतभुक्शिखासखमिति केषाञ्चित् कल्पितपाठो निरस्तः । तथात्वे ऊर्द्ध्वमस्येत्यस्य वैयर्थ्यापत्तेः । यद्वा अस्य मणिपीठमण्डलस्योर्द्ध्वं आदिहंसयोर्युगं व्यामृषामि । कङ्कालमालिनीवचने नादविन्दुमध्यस्थितमणिपीठाधःस्थले हंसस्थितिः प्राप्ता । अत्र मणिपीठोर्द्ध्वस्थितिकथने महान् विरोधः अतस्तयोरविवादाय हंसं विशेषयति हुतभुक्शिखात्रयमिति । ततश्चाधःस्थले हंस इत्यानुपूर्व्विकस्य स्थितिः । ऊर्द्ध्वं पूर्व्वोक्तत्रिकोणाकारकामकलारूपेण परिणतस्य तस्य स्थितिरित्यविरोधः कामकलाया हंसरचितमूर्त्तिकत्वात् ।

पुनर्व्विशेषयति विश्वघस्मरमहोच्चिदोत्कटमिति ।

ङ्भक्षेल्घसौ चाथ घसिङ्च्चरणे व्युसक् ।

तथाच—

देञ्याचे चिदिह्लादे दीप्तौ च्युदकनुदिच्छिदि वा ।

इति धातुपाठात् घसधातोर्भक्षणार्थत्वम् । चिदोदीप्त्यर्थत्वम् । ततश्च

तत्र नाथचरणारविन्दयोः
कुङ्कुमासवपरीमरन्दयोः ।
द्वन्द्वमिन्दुमकरन्दशीतलं
मानसं स्मरति मङ्गलास्पदम् ॥ ५ ॥

विश्वानां घस्मरा भक्षिका अर्थात् संहारिका या महोचित् महाप्रकाशस्तया उत्कटं दूरतरं सर्व्वाधिकबलवदित्यर्थः ॥ ४ ॥

श्रीनाथचरणारविन्दचिन्तनाधिकरणपीठं निरूप्येदानीं तद्ध्यानयोगं सूचयंस्तौति तत्रेति द्वाभ्याम् । अस्यार्थः तत्र मणिपीठस्थत्रिकोणमध्ये नाथचरणारविन्दयोर्द्वन्द्वं मानसं स्मरति ध्यायते इत्यन्वयः ।

चरणद्वन्द्वं विशेषयति कुङ्कुमासवपरीमरन्दयोरिति ।

वीप्सेत्थम्भावचिह्नेषु तेषु भागे परिप्रती ॥

इति वोपदेवीयात् परेर्भागार्थत्वम् । ततश्च कुङ्कुमासवानां लाक्षारसाभपरमामृतानां यः परिभागः स एव मरन्दो मकरन्दो ययोस्तादृशयोरित्यर्थः । "झरीमरन्दयोः" इति पाठे झरी झरणं निःसरणमिति यावत् । ततश्च "कृदभिहितभावो द्रव्यवत् प्रकाशते" इत्युक्तेः कुङ्कुमासवानां झरी अर्थात् झरणाश्रयकुङ्कुमासवो मरन्दो ययोरित्यर्थः ।

द्वन्द्वं कीदृशम् ? इन्दुमकरन्दशीतलम् इन्दोश्चन्द्रस्य यो मकरन्दः अमृतकिरणरूपः तद्वत् शीतलम् । यथा चन्द्रामृतकिरणेन उत्तापनिवृत्तिस्तथा पदद्वन्द्वसेवनेन दुःखतापशान्तिरिति भावः ।

मङ्गलास्पदम् अभिप्रेतार्थसिद्धिस्थानम् । तच्चरणस्थाने मनोऽभिनिवेशे सर्व्वाभीष्टसिद्धिरिति तात्पर्य्यम् ॥ ५ ॥

निशक्तमणिपादुकानियमिताघकोलाहलं
स्फुरत्किशलयारुणं नखसमुल्लसच्चन्द्रकम् ।
परामृतसरोवरोदितसरोजसद्रोचिषं
भजामि शिरसि स्थितं गुरुपदारविन्दद्वयम् ॥ ६ ॥

निशक्तेति। अस्यार्थः अहं शिरसि स्थितं पूर्व्वोक्तपीठोपरिस्थितं गुरुपदारविन्दद्वयं भजामि ध्याये इत्यन्वयः। पदारविन्दद्वयं विशेषयति।

निशक्तमणिपादुकानियमिताघकोलाहलमिति। निशक्तमणिपादुकया सेवितमणिपादुकाद्वारा नियमितः निरस्तीकृतः अघकोलाहलः पापानां प्रादुर्भावो येन तादृशमित्यर्थः। यद्वा निशक्तो निबद्धो मणिर्यत्र पादुकायां सा मणिपीठमण्डलरूपपादुका तया नियमितः अघकोलाहलः येनेत्यर्थः तत्पादुकोपरि गुरुचरणचिन्तनेन पापनाशात्। अथवा निशक्त आरूढो मणिर्गुरुचरणरूपचिन्तामणिर्यासु पञ्चपादुकासु ताभिर्नियमिताघकोलाहलमित्यर्थः। ततश्च पञ्चपादुकाध्यानपूर्व्वकं तदुपरि गुरुचरणचिन्तनेनैव पापनाशात् पापनाशे पञ्चपादुकानां ध्यानरूपव्यापारसाध्यत्वेन द्वारत्वमिति।

स्फुरत्किशलयारुणम्। स्फुरतां किशलयानां पल्लवानामरुणतुल्यमरुणं यत्रेति। आम्रकेन्दुकादिपल्लवानां प्रथमोद्गमे रक्तवर्णत्वात् तत्रैव दृष्टान्तः। नखसमुल्लसच्चन्द्रकं नखा एव समुल्लसच्चन्द्राः निर्म्मलप्रकाशमानचन्द्रस्वरूपा यत्रेत्यर्थः।

परामृतसरोवरोदितसरोजसद्रोचिषम् परामृतसरोवरे उदितं यत्सरोजं पद्मं तद्वत् सद्रोचिषं निर्म्मलप्रकाशो यस्येति। अयम्भावः श्रीनाथस्य चरणाभ्यां निरन्तरं परमामृतं निःसरति। अतएवोक्तं पूर्णानन्देन—

सुधाधारासारं निरवधि विमुञ्चन्नतितरां
यतेः स्वात्मज्ञानं दिशति भगवान्निर्म्मलमतेः ॥ इति ॥

एवं परामृतं सरोवरस्वरूपं तदुपरिस्थितं चरणं पद्मवत् प्रकाशते इति । ननु उक्तपद्मद्वयकर्णिकापुटे गुरुस्थितिर्विधीयते । तत्किमधःस्थितद्वादश-दलकमलकर्णिकायां किंवा ऊर्द्ध्वस्थसहस्रदलकर्णिकायामित्याकाङ्क्षायामत्र वदन्ति । बृहच्छ्रीक्रमे—

सर्व्वोपरि ततो ध्यायेत् पश्चिमाननपङ्कजम् ।

स्रवन्तममृतं दिव्यं देव्यङ्के कमलान्तरे ॥ इति ॥

देव्यङ्के गुरुशक्त्यङ्के ।

यामले—

छत्रं मूर्द्ध्नि सहस्रपत्रकमलं रक्तं सुधावर्षिणम् ॥ इति ॥

गुरुगीतायाम्—

हंसाभ्यां परिवृत्तपत्रकमले दिव्यैर्ज्जगत्कारणै-

र्व्विश्वोत्तीर्णमनेकदेवनिलयं स्वच्छन्दमात्मेच्छया ।

तत्तद्‌योग्यतया स्वदेशिकतनुं भावैकदीपाङ्कुरं

प्रत्यक्षाक्षरविग्रहं गुरुपदं ध्यायेद्विबाहुं गुरुम् ॥ इति ॥

श्यामासपर्य्याधृतवचनम्—

शिरःपद्मे सहस्रारे शुक्लवर्णे त्वधोमुखे ।

तरुणारुणकिञ्जल्के सर्व्ववर्णविभूषिते ॥

कर्णिकान्तःपुटे तत्र द्वादशार्णसरोरुहे ।

तेजोमये कर्णिकान्तश्चन्द्रमण्डलमध्यगे ॥

अकथादित्रिरेखीये हलक्षत्रयमण्डिते ।

हंसपीठे मन्त्रमये स्वगुरुं शिवरूपिणम् ॥ इति ॥

एवमादिवचनैर्द्वादशदलकमलकर्णिकायां गुरोरधिष्ठानं विहितम् । कङ्कालमालिनीतन्त्रे—

सहस्रदलपद्मस्थमन्तरात्मानमुत्तमम् ।

तस्योपरि नादविन्दोर्म्मध्ये सिंहासनोज्ज्वलम् ।

तस्मिन्निजगुरुं नित्यं रजताचलसन्निभम् ॥ इत्यादि ॥

यामले—

सहस्रदलपङ्कजे सकलशीतरश्मिप्रभं
वराभयकराम्बुजम्—इत्यादि ।

पुरश्चरणरसोल्लासे—

श्रीमहादेव उवाच

सहस्रारे ततो नित्ये पङ्कजे परमाद्भुते ।
पद्मस्य वीजकोषे तु भावयेत् स्वगुरुं सदा ॥

श्रीपार्व्वत्युवाच

सहस्रारे महापद्मे सदा चाधोमुखे प्रभो ।
गुरुस्थितिः कथं देव सततं वद निश्चयम् ॥

श्रीमहादेव उवाच

शृणु प्रिये प्रवक्ष्यामि यदेतत् पृष्टमुत्तमम् ।
सहस्रारं महापद्मं सहस्रदलसंयुतम् ॥
सदाशिवपुरं तत्तु नित्यानन्दमयं सदा ।
नानागन्धयुतं पद्मं सहजानन्दमन्दिरम् ॥
सदा चाधोमुखं पद्मं वीजमूर्द्ध्वमुखं सदा ।
त्रिकोणाकाररूपेण कुण्डलीसंयुतेन च ॥ इत्यादि ॥

बालाविलासतन्त्रे—

श्रीदक्षिणामूर्त्तिरुवाच

प्रातरुत्थाय धवले सहस्रारे गुरुं स्मरेत् ।
अधोमुखे महापद्मे सर्व्ववर्णविभूषिते ॥
अकथादित्रिरेखाव्यहलक्षत्रयभूषिते ।
तदन्तश्चन्द्रविम्बस्थहंसपीठे स्मितराननम् ॥

श्रीदेव्युवाच

अधोमुखे गुरुस्तत्र कथं तिष्ठति च प्रभो ।

पादुकापञ्चकस्तोत्रं पञ्चवक्त्राद्विनिर्गतम् ।
षडाम्नायफलप्राप्तं प्रपञ्चे चातिदुर्लभम् ॥ ७ ॥

श्रीदक्षिणामूर्त्तिरुवाच

अधोमुखस्य पद्मस्य कर्णिकामध्यसंस्थितम् ।
चन्द्रबिम्बश्चोर्द्धवक्त्रं तत्र हंसस्ततः स्थितिः ॥ इति ॥

एतदादिभिर्व्वचनैः सहस्रदलकर्णिकायां गुरोरवस्थितिर्व्विधीयते । एवञ्चोभयकल्पे विहिते श्रीनाथस्य आज्ञया तयोरेकतरम् अवधार्य्यानुष्ठातव्यमिति सिद्धान्तः ।

अतएवोक्तं कुलार्णवे एकादशोल्लासे—

पारम्पर्य्यागमाम्नायं मन्त्राचारादिकं प्रिये ।
सर्व्वं गुरुमुखाल्लब्धं सफलं स्यान्न चान्यथा ॥ इति ॥ ६ ॥

स्तोत्रफलश्रुतिमाह । पादुकापञ्चकस्तोत्रमिति । पदरक्षणाधारः पादुका तासां पञ्चकम् । पद्मम् ॥ १ ॥ तत्कर्णिकास्थले अकथादित्रिकोणम् ॥ २ ॥ तदन्तर्नादविन्दुमणिपीठमण्डलम् ॥ ३ ॥ तदधःस्थहंसः ॥ ४ ॥ पीठोपरि त्रिकोणम् ॥ ५ ॥ समुदायेन पञ्चसंख्यकम् ।

अथवा पद्मम् ॥ १ ॥ त्रिकोणम् ॥ २ ॥ नादविन्दु ॥ ३ ॥ मणिपीठमण्डलम् ॥ ४ ॥ तदूर्द्ध्वस्थत्रिकोणाकारकामकलारूपेण परिणतो हंसः ॥ ५ ॥ इति पञ्चसंख्यकम् । तस्य स्तोत्रम् । फलश्रुतिसहितसप्तश्लोकात्मकमित्यर्थः ।

पञ्चवक्त्राद्विनिर्गतमिति ।

शिवस्य पञ्चवक्त्राणि यथा लिङ्गार्च्चनतन्त्रे—

सद्योजातं पश्चिमे तु वामदेवं तथोत्तरे ।
अघोरं दक्षिणे ज्ञेयं पूर्व्वे तत्पुरुषं स्मृतम् ।
ईशानं मध्यतो ध्येयं चिन्तयेद्भक्तितत्परः ॥ इति ॥

तेभ्यो विनिर्गतं तैरुक्तम् ।

षड़ाम्नायफलप्राप्तमिति । षड्मुखानि यथा पूर्व्वोक्तानि पञ्च । षष्ठवक्त्रन्तु पूर्व्ववक्त्रस्याधस्तात् गुप्तं तामसम् । एतत्तु शिवतन्त्रे सद्योजातादिषड्वक्त्र-न्यासे "ॐ हं क्रीं श्रौं क्रौं तामसाय स्वाहा" इत्यनेन तच्चोक्तध्याने "नील-कण्ठमधोवक्त्रं कालकूटस्वरूपिणम्" इत्यनेन च प्रकटितम् । मिलित्वा षड्वक्त्राणि भवन्ति । एभिः षड्वक्त्रैराम्नायते कथ्यतेऽसौ इति षड़ाम्नायः शिवोक्तस्तोत्रसमुदायः । तस्य फलं तत्तन्मन्त्रसमुदायविहितकर्म्मफलं प्राप्यते येनेत्यर्थः ।

प्रपञ्चे लिङ्गाद्याब्रह्मपर्य्यन्तमायाप्रकटितसंसारे । अतिदुर्ल्लभमिति अति-दुःखेन लभ्यते यत्तदतिदुर्ल्लभं तल्लाभकरणपुण्यपुञ्जजनकजन्मान्तरीयतपसः क्लेशस्वरूपत्वात् दुःखलभ्यत्वमिति भावः ॥ ७ ॥

इति श्रीकालीचरणकृता पादुकापञ्चकस्तोत्रस्य
अमलानामटिप्पनी समाप्ता ।

॥ * ॥ ॐ तत् सत् ॥ * ॥

षट्चक्रविवृतिः।

(विश्वनाथकृता।)

ॐ श्रीगुरवे नमः।

टीका श्रीविश्वनाथेन नत्वा सन्तन्यतेऽम्बिकाम्।
कैवल्यकलिकातन्त्रद्वितीयपटलस्य च॥

ब्रह्मरूपी परमेश्वरः वशिष्ठाय कुलभावमुक्त्वा कुलाचारं विना तस्मिन् नाधिकारः अतस्तदुपदेष्टुं गुरुसम्मानपूर्व्वकमाह यज्ज्ञातेनेत्यादि। तथाच कालिकापुराणे—

यः पूजयेद्वाान्यभावेन तस्य ऋणशोधनम्।
पितृदेवनरादीनां जायते न कदाचन॥
सोऽभ्यस्य त्रिपुरायोगं तेन योगेन संयुतः।
जायते यदि सुप्राज्ञस्तदा मोक्षमवाप्नुयात्॥

त्रिपुरायोगं कुण्डलिनीयोगं कुण्डलिन्याः सर्व्वदेवात्मकत्वात्।

उक्तं "सर्व्वदेवमयी सा हि" इति॥ * ॥

मेरोर्म्मेरुदण्डस्य बाह्यप्रदेशे क्रोड़े शशिमिहिरशिरे इड़ापिङ्गलानाड्यौ। "मेरुदण्डवहिःपार्श्वे चन्द्रसूर्य्यात्मके" इति मायातन्त्रात्। तयोः स्थितिप्रकारमाह टीकाकारधृततन्त्रे—

वाममुष्कात्तु सम्भूता नाड़ी दक्षिणगामिनी।
सुषुम्नाकलिता जाता वामभागं समाश्रिता॥

हृद्गता दक्षभागस्था जत्रुमध्यं समाश्रिता ।
वामन्तु नासिकाद्वारं प्राप्नोति गिरिजेऽमले ॥
नाड़ी दक्षिणमुष्कात्तु सञ्जातोत्तरगामिनी ।
सुषुम्नाकलिता जाता भागं दक्षिणमाश्रिता ॥
हृद्गता वामभागस्था जत्रुमध्यं समाश्रिता ।
दक्षिणं नासिकाद्वारं प्राप्नोति गिरिजेऽमले ॥

चापाकृतिर्भूत्वा दक्षिणगामिनी उत्तरगामिनीति ध्येयम् । मध्ये नाड़ी सुषुम्नेति । मध्ये मेरुदण्डस्य मध्यस्थविवरे ।

मेरुदण्डवहिःपार्श्वे चन्द्रसूर्य्यात्मिके शिरे ।
मध्ये सुषुम्ना—इति मायातन्त्रात् ।

स्पष्टमाह सारसमुच्चये—

या मुण्डाधारदण्डान्तरविवरगता हारनीहारगौरी
सौधीं धारां नभोऽम्भोरुहकुहरविधोः संस्रवन्तीं वहन्ती ।
तस्या वज्राख्यनाड्या खगमुदरदरीमध्यगं यो विदध्यात्
तस्या ब्रह्माण्डभाण्डप्रलयमपघनं स्याद्धनं मृत्युमृत्योः ॥

सा कीदृशी ? हारनीहारगौरी मुक्ताहारनीहारगौरी । "गौरोऽरुणे सिते पीते" इत्यमरः । एतेन सुषुम्नान्तर्गतायाः वज्राया मेरुदण्डान्तर्व्विवरगतात्वकथनेन सुषुम्नाया अपि मेरुदण्डान्तर्व्विवरगतात्वसिद्धिः । यद्वा या मुण्डाधारदण्डे यदन्तरं विवरं तत्र विवरगता अर्थात् सुषुम्नाया विवरगता ।

अन्तरं अवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये ।
छिद्रात्मीय विना वहिरवसरमध्ये अन्तरात्मनि च ॥ इत्यमरः ।

एवञ्च सुषुम्नाकलिता इति परम्परया आश्रिता इत्यर्थः । यद्वा तत्र तत्र स्थाने मेरुदण्डं भित्त्वा सुषुम्नाकलिता इत्यर्थः । गौतमीयेऽपि—

विश्वं शरीरमित्युक्तं पञ्चभूतात्मकं मुने ।
चन्द्रसूर्य्याग्नितेजोभिर्ज्जीवब्रह्मैक्यरूपकम् ॥

तिस्रः कोट्यस्तदर्द्धेन शरीरे नाड़यो मताः।
तासु मुख्या दशप्रोक्तास्तासु तिस्रो व्यवस्थिताः॥
प्रधाना मेरुदण्डेऽत्र चन्द्रसूर्य्याग्निरूपिणी।
इड़ावामे स्थिता नाड़ी शुक्ला चन्द्रस्वरूपिणी॥
शक्तिरूपा तु सा नाड़ी साक्षादमृतविग्रहा।
दक्षिणे या पिङ्गलाख्या पुंरूपा सूर्य्यविग्रहा।
सर्व्वतेजोमयी सा तु सुषुम्ना वह्निरूपिणी॥

मेरुदण्डे मेरुदण्डान्तरविवरे। सारदायामपि—

षण्णवत्यङ्गुलायामं शरीरमुभयात्मकम्।
गुदध्वजान्तरे कन्दमुत्सेधाद्द्व्यङ्गुलं विदुः॥
तस्माद्द्विगुणविस्तारं वृत्तरूपेण शोभितम्।
तत्र नाड्यः समुत्पन्ना मुख्यास्तिस्रः प्रकीर्त्तिताः॥
इड़ावामे स्थिता नाड़ी दक्षिणे पिङ्गला मता।
तयोर्म्मध्यगता नाड़ी सुषुम्ना वंशमाश्रिता॥
पादाङ्गुष्ठद्वयं याता शिफाभ्यां शिरसा पुनः।
ब्रह्मस्थानं समापन्ना चन्द्रसूर्य्याग्निरूपिणी॥

भट्टाः शिफाभ्यां मूलाभ्याम्। शिरसा अग्रभागेन। वंशं पृष्ठवंशम् आश्रित्य। विवरगतात्वमुक्तम्। या मुण्डाधारदण्डान्तरविवरगतेत्यनेनाहुः। तन्त्रान्तरे तु—

व्योम प्रोज्झित्य नासाग्रे गतौ चन्द्रदिवाकरौ।
अधोवक्त्रं महापद्मं क्रोड़ीकृत्य सुषुम्नया॥
व्याघुट्य नासिकामध्यं गतं चित्रा तु तद्गता।
ऊर्द्धं भित्त्वा तु लिङ्गं वै इतरान् पुष्करान् तथा॥
वहिरुद्गमनाकाङ्क्षाकाङ्क्षिनी मोक्षदायिनी।
जीवेनाहतसम्बन्धात् स्थिता सप्तमसंविधौ॥

तद्गता सुषुम्नात्र सा तु तत्प्रदेशं गता लिखिष्यामः न विरोधात्।

अतएव सप्तमसंविधौ इत्युक्तम्। नासिकामध्यं नासिकाद्वयमध्यस्थानं न तु नासिकाद्वयमध्यं गता तत्र इड़ापिङ्गले गते। अतएव "कुम्भयेच्च सुषुम्नया" इति सङ्गच्छते।

त्रितयेति। यतः सोमसूर्य्याग्निरूपा अतस्त्रितयगुणमयी। सुषुम्ना कीदृशी? स्मेरं प्रस्फुटितं तथाच प्रस्फुटितकनकधूस्तूरपुष्पमिव ग्रथितं वपुर्यस्याः सा तथा। यथा कनकधूस्तूरपुष्पस्य मध्ये अन्यत् पुष्पम् एवम्भूत-ग्रथिततमवपुरिति भावः। केचित्तु प्रथिततमवपुरिति पाठमाहुः। कुतः सुषुम्ना उत्पन्ना तदाह कन्दमध्यादिति। कन्दरूपमाह सारदायाम्—

गुदध्वजान्तरे कन्दमुत्सेधाद्व्यङ्गुलं विदुः।
तस्य द्विगुणविस्तारं वृत्तरूपेण शोभितम्॥
तत्र नाड्यः समुत्पन्नाः। इत्यादि।

गोरक्षसंहितायान्तु—

ऊर्द्ध्वं मेढ्रादधो नाभेः कन्दयोनिः खगाण्डवत्।
तत्र नाड्यः समुत्पन्नाः सहस्राणां द्विसप्ततिः॥

इत्युक्तम्। कन्दयोनिः कन्दरूपोत्पत्तिस्थानम् नाड़ीनामित्यर्थः। वज्रा-ख्यानाड़ीमाह वज्राख्येति। मेढ्रदेशात् लिङ्गमूलात् शिरःपर्य्यन्ता इत्यर्थः। कुत्र सा? तदाह। अस्या मध्ये सुषुम्नायामध्ये ज्वलन्ती उज्ज्वलन्तीत्यर्थः। "मध्यमश्चावलग्नञ्च मध्योऽस्त्री" इत्यमरः। मायातन्त्रेऽपि—

मध्ये सुषुम्ना तन्मध्ये वज्राख्या लिङ्गमूलतः॥ इति॥ *॥

चित्रानाड़ीमाह तन्मध्य इत्यादिना। तन्मध्ये वज्रामध्ये। प्रणव-विलसिता आज्ञाचक्रस्थप्रणवाधारत्वात्। सा कीदृशी? सकलसरसिजान् भित्त्वा एतत् पद्मं ग्रथनरचनया देदीप्यते। पद्मं किम्भूतम्? मेरुमध्यान्तरस्थं मेरुमध्ये यदन्तरं विवरं परम्परया तत्स्थम्।

मध्ये सुषुम्ना तन्मध्ये वज्राख्या लिङ्गमूलतः।
तन्मध्ये चित्रिणी सूक्ष्मा विसतन्तु सहोदरा।
मूलमूलात् सहस्रारस्तदन्तर्ब्रह्मनाड़िका॥

तथा—

मूलादिषट्सरोजातं चित्रिणीग्रथितं प्रिये।
लिङ्गाधोर्द्ध्वनाभिवुक्ककण्ठभ्रूमध्यदेशजम्॥

इति मायातन्त्रात्। मूलमूलात् सहस्रारस्तन्मूलाधारमूलात् सहस्रार इति। तथाच सहस्रारं चित्रिण्या ग्रथितम्। अत्र च—

तस्या मध्ये विचित्राख्या अमृतस्राविणी शुभा।
सर्व्वतेजोमयी सा तु योगिनीहृदयङ्गमा।
विसर्गाद्विन्दुपर्य्यन्तं व्याप्य तिष्ठति तत्त्वतः॥

इति गौतमीयवचनस्य विन्दुपर्य्यन्तं इन्दुपर्य्यन्तमिति वा पाठः। ललाटस्थ-विन्दुपर्य्यन्तं इन्दुपर्य्यन्तं वा व्याप्य सहस्राराधोदेशपर्य्यन्तगा तद्वतीत्यर्थो बोध्यः। केन चित्रायां पद्मानि सन्ति तदाह तन्त्रचूड़ामणौ—

तयैव ग्रथितं पद्मं मूलादिपद्मपञ्चकम्।
कलिकाकाररूपेण डाकिन्याद्यवलम्बितम्॥

तयैव चित्रयैव पद्मं मूलादिषड़िति शेषः। पद्मपञ्चकं स्वाधिष्ठानादि-पञ्चकं कलिकाकाररूपेण ग्रथितमिति सामान्यत उक्ता विशेषरूपेणोक्तम्। एतेन मूलाधारपद्मं विकसितं एवं समस्तपद्मान्यधोमुखान्येव। तदुक्तं कौलिकतन्त्रे ताराकल्पे—

सप्तपद्मं मयैवोक्तं सुषुम्नाग्रथितं प्रिये।
अधोवक्त्रादिमान्तञ्च नाख्येयं यस्य कस्यचित्॥

येन तस्याश्चित्रात्वं तदाह श्रीक्रमे—

तस्याश्चान्तर्गता तिष्ठेत् चित्राख्या योगिवल्लभा।
पञ्चवर्णोज्ज्वला देवि पञ्चभूतप्रकाशिनी।
पञ्चदेवाः पर्व्वलग्नाः सप्तान्या नाड्यो मताः॥

अन्यत्रापि—

ब्रह्मा जनार्द्दनो रुद्र ईश्वरश्च सदाशिवः।
चित्राख्यनाद्यन्तरस्थाः पञ्चभूताधिदेवताः॥

अत्र पञ्चभूतानां पञ्चाधिदेवता उक्ताः । भ्रूमध्ये तु परशिवोऽस्ति लिखिष्यमाणवचनात् ॥

ब्रह्मनाड़ीमाह तस्यान्तरिति । तस्यां चित्रायां तद्ब्रह्मनाड़ी प्रसिद्ध-ब्रह्मनाड़ी । हरमुखकुहरात् मूलाधारस्थस्वयम्भूलिङ्गमुखविवरात् । आदि-देवान्तसंस्था ब्रह्मपर्य्यन्ता । मायातन्त्रेऽपि "शिरा स्यात् ब्रह्मपर्य्यन्तम्" इत्यादि । विद्युन्मालेव विलासो यस्याः सा । पद्मसूत्रतुल्या अतः सूक्ष्मा । शुद्धज्ञानिनः प्रबुध्यन्ते ज्ञायन्ते यया सा तथा । अमृतस्राविणीत्वात् सकल-सुखयुता । भावो मनोधर्म्मः स्वभावः आत्मधर्म्मः शुद्धो भावः स्वभावो यस्याः सा इति पञ्चम्यन्तबहुव्रीहिः । "भावो हि मानसो धर्म्मः" इत्युक्तः ।

येन द्वारेण कुण्डलिन्या ब्रह्मणि गमनं तत् द्वारमाह ब्रह्मद्वारमिति । तदास्ये ब्रह्मनाड्या आस्ये ।

> मूलाधारात् सहस्रारस्तदन्तर्ब्रह्मनाड़िका ।
> शिरा स्यात् ब्रह्मपर्य्यन्तं तदन्तर्द्वारमुत्तमम् ॥

इति मायातन्त्रात् ।

> ब्रह्मद्वारमुखं नित्यं मुखेनाव्रुत्य तिष्ठति ।
> येन द्वारेण गन्तव्यं ब्रह्मस्थानं निरामयम् ।
> मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी ॥

इति गोराक्षसंहितावचनाच्च । सुधेति सुधाकणास्रुतिप्रदेशं ग्रन्थिस्थानम् एतद्द्वारं सुषुम्नाया नाड्या वदनं धीरा वदन्ति ॥ * ॥

आधारपद्ममाह अथेत्यादिना ।

> षस्त्रवत्यङ्गुलायामं शरीरमुभयात्मकम् ।
> गुदध्वजान्तरे कन्दमुत्सेधाद्द्व्यङ्गुलं विदुः ।
> तस्य द्विगुणविस्तारं वृत्तरूपेण शोभितम् ॥

इति सारदोक्तकन्द एव मुख्यनाड़ी एव ग्रन्थिस्तदूर्द्धं ध्वजाधः सुषुम्नास्य-लग्नम् ।

तथा च मायातन्त्रे—

मुख्यनाड़ीत्रयं ग्रन्थेरूर्द्धं वज्राध ईश्वरि ! ।
रक्तपर्णो वेदवर्णो मूलाधारोऽप्यवाङ्मुखः ॥ इति ॥

उद्यत् प्रस्फुटितम् ।

तयैव ग्रथितं पद्मं मूलादिपद्मपञ्चकम् ।
कलिकाकाररूपेण डाकिन्याद्यवलम्बितम् ॥

इति वचनात् । पूर्व्वमेव व्याख्यातं तत् । सुवर्णाभवर्णैरिति । तथाच दक्षिणामूर्त्तौ—

आधारे स्वर्णवर्णेऽस्मिन् वादिसान्तानि संस्मरेत् ।
द्रुतसौवर्णवर्णानि वर्णानि परमेश्वरि ॥ इति ॥

सारसमुच्चये षट्सु पद्मेषु वर्णाः विन्दुयुक्ता उक्ता ग्रन्थगौरवभिया नात्र प्रकटिताः । चतुष्कोणचक्रमिति ।

तथाच मायातन्त्रे—

तत्कर्णिकान्तरे पृथ्वी चतुष्कोणा सुपीतभा ॥ इति ॥

तथा तन्त्रान्तरे—

भूगृहं चतुरस्रं स्यादष्टौवज्रविभूषितम् ॥ इति ॥

धरायाः स्ववीजमिति । तथाच सारदायाम्—

वृत्तं दिवस्तत् षड्विन्दुलाञ्छितं मातरिश्वनः ।
त्रिकोणं स्वस्तिकोपेतं वह्नेरर्द्धेन्दुसंयुतम् ॥
अम्भोजमम्भसो भूमेश्चतुरस्रं सवज्रकम् ।
तत्तद्भूतसमाभानि मण्डलानि विदुर्बुधाः ।
वर्णैः स्वैरञ्जितान्यासन् स्वस्वनामावृतान्यपि ॥

तत्तद्भूतसमवर्णानि मण्डलानि तथा स्वैर्व्वर्णैः ह य र व ल वर्णैर्युक्तानि । तथा स्वस्वनामावृतानि पृथिव्यादीनां स्वस्वनामावृतानीत्यर्थः । एतदनुसारेण सर्व्वेषु पत्रेषु स्वस्ववीजानि ज्ञेयानि ॥ * ॥

चतुर्व्वाहुः इति । अत्र पद्मे ब्रह्मास्तीत्याह तदङ्क इत्यादिना । नवीनार्क-

तुल्यप्रकाशः रक्तवर्णः सृष्टिकारी ब्रह्मा चतुर्व्बाहुयुक्तः। चतुर्भागवेदो मुखाम्भोजलक्ष्मीर्यस्य स तथा ॥ * ॥

अत्र डाकिनी शक्तिरस्ति इत्याह वसेदत्रेति। तथाच भूतशुद्धितन्त्रे— मूलाधारं ब्रह्मस्थानमेतत् सौवर्णाभं डाकिनी देवी तत्रेति। एषा डाकिनी अनेकसूर्य्यप्रकाशा। अतिशयरक्ता इत्यर्थः। तन्त्रान्तरे—

रक्तां रक्तत्रिनेत्रां पशुजनभयकृच्छूलखट्वाङ्गहस्तां
वामे चैकं दधानां चषकमपि सुधापूरितं चैकवक्त्राम्। इति।

शुद्धबुद्धेः प्रकाशं वहन्तीत्यन्वयः ॥ * ॥

मध्ये अवान्तरदेवतादिकमभिधाय प्रकृतमाह वज्राख्येति। वज्राख्याया वक्त्रदेशे सामीप्ये सप्तमी अधोभागे इति यावत्।

मुख्यनाडीत्रयं ग्रन्थेरूर्द्ध्वं वज्राध ईश्वरि!।

इति मायातन्त्रात्। कर्णिकामध्यसंस्थं त्रैपुराख्यं त्रिकोणं एतत् कामरूपाख्यं त्रिकोणं तत् कामरूपाख्यं कन्दर्पो वह्निः समन्तात् भ्रमति। नाम प्रकर्षे जीवेशो वायुश्च निवसति। तथाच मायातन्त्रे—

तत्कर्णिकान्तरे पृथ्वी चतुष्कोणा सुपीतभा।
तन्मध्ये योनिमध्ये च वह्निवाय्वोः समाश्रये ॥ इति ॥

श्रीक्रमेऽपि—

कर्णिकायां स्थिता योनिः कामाख्या परमेश्वरी।
अपानाख्यं हि कन्दर्पम् आधारे तत्त्रिकोणके।
स्वयम्भूलिङ्गं तन्मध्ये पश्चिमाभिमुखं प्रिये ॥

रुद्रयामलेऽपि—

भ्रमद्योनिगतं ध्यायेत् कामं बन्धूकसन्निभम्।
ज्वलत्कालानलप्रख्यं तडित्कोटिसमप्रभम् ॥

तदेवाह जीवेश इत्यादिना। बन्धूकपुष्पसमूहमभिहसन् तदधिकरक्तवर्ण इति भावः। "बन्धूकः बन्धुजीवकः" इत्यमरः। "आधारे तत्त्रिकोणके" इत्युक्तत्वात्।

तथा—

मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मिके ।
मध्ये स्वयम्भूलिङ्गस्तु कोटिसूर्य्यसमप्रभः ॥

इति गौतमीयात् । तथा—

अधोमुखो लिङ्गरूपी हेमाभो भ्रमणे रतः ॥

इति ॥ * ॥

पुनरपि मायातत्त्वाच्चाह तन्मध्ये इति । त्रिकोणमध्ये लिङ्गरूपि स्वयम्भूलिङ्गम् । द्रुतसुवर्णकला इति कोमलः सुवर्णवर्णयोगित्वात् कोमलत्वाच्च तथाभिहितम् । पश्चिमास्यः अधोमुखः । ज्ञानध्यानाभ्यां प्रकाश्यते यः स तथा । प्रथमकिसलयाकाररूपः नूतनपल्लवाङ्कुराकारः भिद्यते इति । तथाच पूर्ण-चन्द्रादधिकरससमूह इत्यर्थः । स्निग्धं सन्तानं स्निग्धसमूहं हसतीति स्निग्ध-सन्तानहासी काशीवासीत्यादिविशेषणम् । सरितां आवर्त्तः चक्रवत् जलानां भ्रमणं तद्रूपप्रकाशो यस्य स तथा । "स्यादावर्त्तोऽम्भसां भ्रमः" इत्यमरः ॥ * ॥

तल्लिङ्गं सार्द्धत्रिवलयेनावेष्ट्य कुण्डलिनी शक्तिरस्ति इत्याह तस्योर्द्ध्वे इत्यादिना । बिसतन्तुसोदरतुल्या सा चासौ कला प्रकृतिश्चेति सा तथा । अतः सूक्ष्मा । नवीनचपलामाला तस्या विलासनशोभया सह आस्पदं आस्पर्द्धा यस्याः सा तथा । "तड़ित् सौदामिनी विद्युत् चञ्चला चपलापि च" इत्यमरः । सुप्ता निद्रिता शिवोपरि लसत् सार्द्धत्रिवृत्ता आकृतिः शरीरं यस्याः सा तथा । सा तु अधोवक्त्रा । यथा श्रीक्रमे—

अधोवक्त्रा स्थिता देवी ऊर्द्ध्वं पुच्छातिशोभना ।
अत्र विद्युल्लताकारा कुण्डली परदेवता ॥
परिस्फुरति सर्व्वात्मा सुप्ता हि भुजगाकृतिः ।
ब्रह्मद्वारमुखं नित्यं मुखेनावृत्य तिष्ठति ॥
येन द्वारेण गन्तव्यं ब्रह्मद्वारं मनोमयम् ।
मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी ॥

मस्तके मणिवद्भिन्ना स्वयम्भूलिङ्गवेष्टिनी ॥

योगान्तरेऽपि—

मुखेनाच्छाद्य तद्द्वारं कुण्डलीशक्तिरुज्ज्वला ।

निद्रावशगता देवी प्रसुप्तभुजगोपमा ॥

तथा मायातन्त्रेऽपि—

सार्द्धत्रिवलयानन्दा नन्दिता भास्करप्रभा ॥ इति ॥ * ॥

कूजन्तीति । उत्थिता सतीति शेषः । तथा च तन्त्रान्तरे—

झिल्लीराव्यक्तमधुरा कूजन्ती सततोत्थिता ॥ इति ॥

कोमलवाक्यैर्व्वाचं कूजन्तीत्यर्थः ।

तत् प्राप्य कुण्डलीरूपं प्राणिनां देहमध्यगम् ।

वर्णान्तराविर्भवति गद्यपद्यादिभेदतः ॥

इति सारदोक्तेः तत् चैतन्यम् । श्वासोच्छ्वासविभञ्जनेन वायुना यया जगतां जीवः जीवात्मा हंसः धार्य्यते ।

बिभर्त्ति कुण्डली शक्तिरात्मानं स्वं समाश्रिता ।

हंसः प्राणाश्रयो नित्यं प्राणो नाड़ीपथाश्रयः ॥

आधारादुद्गतो वायुर्यथावत् सर्व्वदेहिनाम् ।

देहं प्राप्य स्वनाड़ीभिः प्रयाणं कुरुते बहिः ।

द्वादशाङ्गुलमानेन तस्मात् प्राण इतीरितः ॥

भट्टाः कुण्डली आत्मानं परमात्मानं बिभर्त्ति तद्योगिभासिनीत्यर्थः । कीदृशी ? स्वं जीवात्मानम् आश्रिता जीवाधिष्ठाना सतीत्यर्थः । हंसः प्राणाश्रयः प्राणवायुसमाश्रयः प्राणः नाड़ीपथाश्रयः । कथं प्राणस्य नाड़ीपथाश्रयत्वम् ? इत्यत आह आधारेति । प्रयाणं कुरुते इति प्राणः इति प्राणपदव्युत्पत्तिरपि दर्शितेत्यन्तेनाहुः ।

दक्षिणामूर्त्तौ तु—

उच्छ्वासे चैव निश्वासे हंस इत्यक्षरद्वयम् ।

तस्मात् प्राणस्तु हंसाख्य आत्माकारेण संस्थितः ॥

षट्शतान्यधिकान्यत्र सहस्राण्येकविंशतिः ।
अहोरात्रं चरेद्वायुः स जपो मोक्षदायकः ॥

अन्यत्रापि—

सःकारेण वहिर्याति हंकारेण विशेत् पुनः ॥ इति ॥
प्रौढ़ामदोप्तश्रेणी ॥ * ॥

तस्याः कुण्डलिन्या मध्ये परमा नाम्नी शक्तिरुच्यते तन्मध्ये इत्यादिना । परमा उत्कृष्टा परापरानाम्ना अतिसूक्ष्मा ।

तथाच भट्टधृततन्त्रे—

सूक्ष्मा कुण्डलिनीमध्ये ज्योतिर्म्मात्रया परा मता । इति ।

सा एव परमात्मस्वरूपा । तथा च श्रुतिः—

तस्याः शिखाया मध्ये तु परमा सा व्यवस्थिता । इति ।

नित्या ध्वंसप्रागभावरहिता । आनन्दपरम्परा आनन्दसमूहयुक्ता । अतिचपलायमाना विद्युल्लता इव लसत् दीधितिर्दीप्तिर्यस्याः सा तथा । यस्याः कलायाः प्रभया ब्रह्माण्डादिकटाहान्तं जगत् शरीरं भासते सा विजयते । नित्यज्ञानस्य उदयो यस्यां सा । काव्यबन्धैर्व्वाक्यैः वृहस्पतीन् सेवते गौरवे बहुवचनम् ॥ * ॥

स्वाधिष्ठानाख्यपद्ममाह सिन्दूरेत्यादिना । अङ्गच्छदैः षट्पत्रैः विद्युत्प्रकारैर्व्वाद्यैः पुरन्दरान्तैर्व्वादिलान्तैः सविन्दुकं परिवृतं पद्मम् । तथा च मायातन्त्रे—

तदूर्द्ध्वे तु महेशानि स्वाधिष्ठानमृतुच्छदम् ।
रक्तवर्णं कर्णिकायामजमर्द्धेन्दुसंयुतम् ।
मण्डलं वारुणं देवि तदूर्द्ध्वे मणिपूरकम् ॥ इति ॥

दक्षिणामूर्त्तौ—

स्वाधिष्ठाने विद्रुमाभे वादिलान्तानि संस्मरेत् ।
विद्युत्पुञ्जसमाभानि विद्युद्भासितमस्तके ॥ इत्यादि ॥

सारदायां विशदप्रकाशं शुक्लवर्णं तत्तद्भूतसमाभानीति प्रागुक्तम् ।

अम्भोजं षड्दलपद्मं अर्द्धचन्द्रयुतम् ।
वं बीजं मकराधिरूढ़ं स्वाधिष्ठानं विष्णुगेहं प्रदिष्टम् ।
बालार्काभं राकिणी देवतात्र ॥

इति वचनात् ॥ * ॥

तस्याङ्के इत्यादि । नीलद्युतिरूपो मनोज्ञश्रियं शोभाम् आदधानः ।

गौतमीये—

स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः ।

नीलाम्बुजि देवसद्दृशकमनीयता शोभा यस्याः सा । नानायुधेति । तदुक्तं तन्त्रान्तरे—

श्यामां शूलाब्जहस्तां डमरुकसहितां तीक्ष्णटङ्कं वहन्तीम्
देवीं रक्तत्रिनेत्रां द्वितयदललसद्दंष्ट्रदन्तप्रभाभिः । इति ।

स मोहाद्भुतान्धकारसमूहे भानुतुल्यः तन्नाशको भवतीति । सुधेति अहद्दत्तुल्यकाव्यसमूहसम्पत्तिं भजन्ते । अत्र पश्यन्ती शक्तिरस्ति प्रमाणं विशुद्धपद्मव्याख्याने लिखिष्यते ॥ * ॥

मणिपूरपद्ममाह तस्योर्द्ध इत्यादिना ।

मणिवह्निभं तत् पद्मं मणिपूरं तथोच्यते ।

नीलवर्णे नीलवर्णडादिफान्तवर्णैर्युक्ते । तथा च दक्षिणामूर्त्तौ— सुनीले मणिपूरके डफान्तानि महानीलप्रभानि परिचिन्तयेत् । वह्नेर्मण्डलं बीजं चाह वैश्वानरस्येत्यादिना । वैश्वानरस्य वह्नेर्मण्डलं रक्तवर्णं त्रिकोणं तद्बाह्ये त्रिभिः स्वस्तिकैरीकाराकारैर्युक्तम् । मायातन्त्रे—

दशपत्रं पयोजातं कर्णिकायां महेश्वरि ।
वाह्नेयं मण्डलं रक्तं त्रिकोणं स्वस्तिकान्वितम् ॥

स्वबीजं रेफः । "वर्णैः स्वै रञ्जितान्यासन्" इति प्रागुक्तेः प्रातःसूर्य्यसमरक्तवर्णम् । मणिपूरन्तु नीलं रुद्रस्थानं लाकिनी देवतात्रेति वचनात् । तामाह रुद्रमूर्त्तिरित्यादिना । शुद्धसिन्दूररागः अतिशयरक्तवर्णः । वेदबाहूज्ज्वलाङ्गीत्यादि ।

तदुक्तं तन्त्रे—

क्षणां देवीं त्रिवक्त्रां त्रिनयनसहितां कुब्जिनीमुग्ररूपां
वज्रं शक्तिं सदण्डामभयवरकरां दक्षवामे दधानाम् । इत्यादि ।

ज्ञानेति । ज्ञानसमूहेन सह लक्ष्मीस्ताम् ॥ * ॥

अनाहतपद्ममाह तस्योर्द्ध इत्यादि । बन्धूकपुष्पकान्तिस्वरूपरक्तवर्णं कादिठान्तैः द्वादशवर्णैः सिन्दूरवर्णैः युक्तम् । तथाच दक्षिणामूर्त्तौ—

पिङ्गवर्णं महावह्निकलिकाभानि संस्मरेत् ।
कादिठान्तानि वर्णानि चतुर्थेऽनाहते प्रिये ॥

तन्मध्ये षट्कोणपद्मं वायुमण्डलम् । तथाच मायातन्त्रे—

अनाहतं द्वादशारं रक्ताभं हृदि सुव्रते ।
तन्मध्ये पावनं पद्मं षट्कोणं धूम्रवर्णकम् ॥ * ॥

वायुबीजमाह तन्मध्ये इत्यादिना । पवनाक्षरं यं । प्रमाणं आधारपद्मव्याख्याने उक्तम् । धूसरं ईषत् पाण्डुरम् । हस्तचतुष्टययुक्तं कृष्णसाराधिरूढ़म् । रक्तमनाहतमीश्वरगेहन्तु काकिन्यपीहोक्ता इति वचनात् । तदेवाह तन्मध्ये करुणानिधानमित्यादिना । ईश्वराभिधं ईश्वरनामानम् । हंसाभं सूर्य्यप्रभम् । अभयवरदपाणिद्वययुक्तम् । तत्र काकिनी नवतड़ित्पीता गौरवर्णा । त्रिनेत्रा । पाशकपालवराभयान् चतुर्भिर्भुजैः बिभ्रती । कङ्काल इति अस्थिमालाधरा । "स्यात् शरीरास्थिकङ्कालः" इत्यमरः । तथाच तन्त्रे—

काकिनीं मेघसंस्थाम्
पाशं शूलं कपालं डमरुमपि करैर्धारिणीं पीतवर्णां
दध्यन्ने सक्तचित्तां स्ववयवनमितां वारुणीमत्तचित्ताम् ।

शूलडमरुस्थाने वराभयं तथा अस्थिमाला तन्त्रान्तरे उक्तम् ।

बाणलिङ्गं तु तन्मध्येऽधोमुखे शक्तिके इति ।

त्रिस्त्रिकोणयुक्ते इति क्रमात् । तथा—

तन्मध्ये बाणलिङ्गन्तु सूर्य्यायुतसमप्रभम् ।
शब्दब्रह्ममयः शब्दो न हेतुस्तदहेतुकः ॥

अनाहताख्यं तत्पद्मं पुरुषाधिष्ठितं परम् ॥

पुरुषेण जीवात्मना इति गौतमीयाच्च । त्रिकोणं बाणलिङ्गं जीवात्मानञ्चाह एतन्नीरजे इत्यादिना । कनकं बन्धूकपुष्पसदृशं बन्धूकः पुष्पविशेषः तद्वदङ्गरागोज्ज्वलः ।

हेमबन्धूककुसुमशरच्चन्द्रनिभानि च ।

इति योगिन्येकवाक्यत्वात् । स्वयम्भूबाणलिङ्गेतरलिङ्गविशेषणं हेमादि । मौली मस्तके सूक्ष्मविभेदयुक्तो विवरयुक्तो मणिरिव दीप्तचिक्कालयः । शर्व्वस्य देवस्य पीठालयं निर्व्वातदीपशिखाकारहंसेन जीवात्मना शोभितम् । मायातन्त्रेऽपि—"आत्मा तत्र प्रदीपाभः" इति । भानोरित्यस्य मण्डलपदेनैकदेशेन सहान्वयः । तेन मण्डलमण्डितं अन्तरं मध्यं यस्य स चासौ लसत्किञ्जल्कश्चेति स तथा । तस्य शोभाधरम् । "किञ्जल्कः केशरोऽस्त्रियाम्" इत्यमरः ॥ * ॥

विशुद्धपद्ममाह विशुद्धाख्यमिति । हिमच्छायायुक्तस्योपरिलसितशरीरस्य चतुर्भिर्भुजैः पाशाङ्कुशादिलसितैः शोभितशरीरस्य दीप्तबुद्धेः उद्दीप्तज्ञानस्य । हिमाभः शुक्लः सदाशिव इत्याख्यायुक्तः सिद्धः प्रसिद्धः ।

तथा तन्त्रान्तरेऽपि—

सदाशिवस्थानमिदं विशुद्धं शाकिन्यथात्रापि च धूम्रवर्णा ।

सुधासिन्धोः शुद्धा शुक्ला । तथाच तन्त्रान्तरे—

देवीं ज्योतिःस्वरूपां त्रिनयनविलसत्पञ्चवक्त्रां सुदंष्ट्रीं
हस्ताम्भोजेषु चापं शूलमपि दधतीं पुस्तकं ज्ञानमुद्राम् । इति ।

पुस्तकज्ञानमुद्रामिति शरं पाशम् इति तन्त्रान्तरे उक्तम् । सुधांशोश्चन्द्रस्य मण्डलम् । तथाच स्वच्छन्दसंग्रहे—

अमृताद्यास्तथाकाशं चन्द्रविन्दुं तदूर्द्धतः ।
कण्ठोर्द्ध्वे परमेशानि लम्बिका चतुरङ्गुले ॥

मतिशीलस्य ज्ञानशीलयुक्तस्य शुद्धेन्द्रियस्य जनस्य महामोक्षद्वारसम्पत्तिं दधत् मण्डलमित्यर्थः । स जीवी विपदां अन्धकारस्वरूपाणां ध्वंससूर्य्यप्रकाशः । अत्र वैखरी शक्तिरस्ति ।

तथाच भट्टधृततन्त्रे—

सूक्ष्मा कुण्डलिनीमध्ये ज्योतिर्मात्रा परा मता ।
अश्रोत्रविषयात् तस्मात् किञ्चिदेवोर्द्ध्वगामिनी ॥
स्वयंप्रकाशा पश्यन्ती सुषुम्नानाभिमाश्रिता ।
सैव हृत्पङ्कजं प्राप्य मध्यमा नादरूपिणी ॥
ततः संजल्पमात्रा स्यादविभक्तोर्द्ध्वगामिनी ।
सैवोरुकण्ठतालुस्था शिरोघ्राणवदाश्रिता ॥
जिह्वामूलोष्ठनिष्ठ्यूता कृतवर्णपरिग्रहा ।
शब्दप्रपञ्चजननी श्रोत्रग्राह्या तु वैखरी ॥ * ॥

आज्ञाचक्रमाह आज्ञानामित्यादिना । गौतमीये—"आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्त्तितम् ।" चन्द्रतुल्यक्लेदजनकं ध्यानस्थानं प्रकाशस्वरूपम् । हक्षाभ्यां विशुद्धाभ्यां कलाभ्याम् अक्षराभ्यां युक्तं द्विपत्रम् अतीवशुभ्रम् । मायातन्त्रेऽपि—"आज्ञाख्यं द्विदलं शुभ्रम्" इति ।

दक्षिणामूर्त्तावपि—

आज्ञायां विद्युदाभायां शुभ्रौ हक्षौ विचिन्तयेत् ।

हाकिनीति । तन्त्रान्तरेऽपि—

आज्ञापुरं शारदचन्द्रशुभ्रं हाकिन्यथोक्ता शिवगेहमेतत् ।

विद्या पुस्तकम् । मुद्रा ज्ञानमुद्रा अङ्गुष्ठतर्ज्जनीमिलिता । तन्त्रे—

आज्ञाख्यां शुक्लवर्णां डमरुकसहितामक्षसूत्रं कपालं
विद्यां मुद्रां दधानां त्रिनयनविलसद्वक्त्रषट्कोणयुक्ताम् । इति ।

सूक्ष्मञ्च तत्प्रकाशस्वरूपञ्चेति तत् तथा ।

मायातन्त्रेऽपि—

आज्ञाख्यं द्विदलं शुभ्रं कर्णिकायां मनोलयम् । इति ।

सिद्धं नित्यं सिद्धशब्दो नित्यार्थः इति वैयाकरणाः । इतरशिवपदं इं कालं तरति इति इतरं शिवस्य परशिवस्य पदं इतरञ्च तत् शिवपदञ्चेति तत् ।

लिङ्गचिह्नेन लिङ्गाकारेण प्रकाशो यस्य तत्। विद्युन्मालेव प्रकाशो यस्य तत्। योगिनीहृदये—

इतरच्च पुनस्तथा शरच्चन्द्रनिभं सदा। इति।

आनन्दलहर्य्यामपि—

तवाज्ञाचक्रस्थं तपनशशिकोटिद्युतिधरं
परं शम्भुं वन्दे परिमिलितपार्श्वं परचिता।

ताराषोढ़ान्यासाधिकारतन्त्रे—

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः।
ततः परशिवो देवि षट् शिवाः परिकीर्त्तिताः॥

मूलाधारादिविशुद्धपद्मेषु पञ्चशिवन्यासमभिधाय—

आज्ञाचक्रे च देवेशि हक्षवर्णसमन्वितम्।
परं शिवं ब्रह्मरूपं हाकिनीसहितं न्यसेत्॥ इत्युक्तम्॥

स च सहस्रारनिर्गुणपरशिवस्यांशस्वरूपी अपरः शिवो ज्ञेयः। अतएव ब्रह्मशिवत्वात् ब्रह्मस्वरूपमित्युक्तम्। न तु ब्रह्म इत्युक्तम्। परमकुलपदम् एतत् पर्य्यन्तं परमकुलपदमित्युपसंहारेणोक्तम्।

तथाच श्रीमते—

तत्रैतद्दच्चिणं षट्कमाज्ञापूर्व्वं कुलोद्भवम्। इति।

आनन्दलहर्य्यामपि—

महीं मूलाधारे कमपि मणिपूरे हुतवहं
स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि।
मनोऽपि भ्रूमध्ये सकलमपि भित्त्वा कुलपथं
सहस्रारे पद्मे सह रहसि पत्या विहरसि॥

अत्र कं जलं स्वाधिष्ठाने मणिपूरे हुतवहमिति व्यत्ययेनान्वयः। ब्रह्मसूत्रेति ब्रह्मसूत्रस्य ब्रह्मनाड्याः प्रबोधो यस्मात् तत्। वेदानामादिवीजं प्रणवः तदत्र चिन्तयेत्। विलसितपरमोऽपूर्व्वसिद्धप्रसिद्धो यस्य सः। अत्रान्तरात्मा अस्तीत्याह शुद्धबुद्धेत्यादिना। शुद्धबुद्धः शुद्धस्वभावः स चासौ

अन्तरात्मा चेति सः। प्रदीपस्येव आभा दीप्तिर्यस्य ज्योतिषः एवम्भूत ज्योतिःप्रणवाभ्यां विरचितौ स्वरूपवर्णौ यस्य स वर्णशब्दः।

श्रीक्रमेऽपि—

भ्रूमध्ये अन्तरात्मानमरूपं सर्व्वकारणम्।
ॐकारज्योतीरूपन्तु प्रदीपाभं जगन्मयम्॥

अतएव प्रकाशः ज्योतिःस्वरूपः। तदूर्द्ध्वं पूर्व्वोक्तान्तरात्मोर्द्ध्वं अर्द्धचन्द्रः चन्द्रार्द्धे विन्दुरूपी मकारः तदुपरिनाद इति व्यत्ययेनान्वयः। एवं नाद-प्राग्वोधिनी लिखिष्यमाणयोगिनीहृदयात् ज्ञेया। असौ नादः अतीव शुक्ल इत्याह वनेत्यादिना। वनं जलं तद्वत् धवलवर्णः यश्च पीयूषाधारश्चन्द्रः तत्-समूहहासी तदधिकशुक्ल इति भावः।

योगिनीहृदयेऽपि—

इन्दौ तदर्द्धे बोधिन्यां नादे नादान्त एव च। इति।

इन्दौ विन्दौ तदर्द्धे अर्द्धचन्द्रे।

स्वच्छन्दसंग्रहेऽपि—

तत्र विन्दोर्यथा विन्द्वावरणे स तदूर्द्ध्वतः।
सूर्य्यकोटिप्रतीकाशम् अतिदृप्तं महद्गुणम्॥
तन्मध्ये दशकोटीनां संख्या योजनपञ्चकम्।
तत्कर्णिकायामासीनः शान्त्यतीतेश्वरः प्रभुः॥
पञ्चवक्त्रो दशभुजो विद्युत्पुञ्जनिभाकृतिः।
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिरनुक्रमात्॥
परिवार्य्य स्थिताश्चित्राः शान्त्यतीतेश्वरस्य च।
वामभागे समासीना शान्त्यतीता मनोन्मनी॥
पञ्चवक्त्रधराः सर्व्वा दशवाह्विन्दुभूषणाः।
विन्दुतत्त्वं समाख्यातं कोट्यर्व्वुदशतैर्व्वृतम्॥
अर्द्धचन्द्रं तदूर्द्ध्वन्तु बोधिनी तस्य चोपरि।
ज्योत्स्ना ज्योत्स्नावती कान्तिः सुप्रभा विमलापि च॥

अर्द्धचन्द्रोत्थिता ह्येताः कलाः पञ्च प्रकीर्त्तिताः ।
बन्धती बोधिनी बोधा ज्ञानबोधा तमोपहा ॥
निबोधिताः कलाः पञ्च कथिताः सुरसुन्दरि ।
ब्रह्मादिपरमेशानां परप्राप्तिनिबोधनात् ।
निबोधिकेति सा प्रोक्ता तस्या भेदाद्वरानने ॥
बोधिन्याख्यं यदुक्तं ते नादस्तस्योपरिस्थितः ।
पद्मकिञ्जल्कसङ्काशः कोटिसूर्य्यसमप्रभः ॥
पुरैः परिवृतोऽसंख्यैर्मध्ये पञ्चकलावृतः ।
इन्धिका दीपिका चैव रेतिका मोचिका तथा ॥
ऊर्द्ध्वगा मध्यगा तासां पञ्चमी परमा कला ।
चन्द्रकोटिसमप्रख्यं तन्मध्येऽब्दुदयोजनम् ॥
पद्ममध्ये समासीनमूर्द्ध्वगामिनमीश्वरम् ।
चन्द्रायुतप्रतीकाशं पञ्चवक्त्रं त्रिलोचनम् ॥
ऐन्दवाद्यैरावृतं च शूलपाणिं जटाधरम् ।
तस्योत्सङ्गगतामूर्द्ध्वगामिनीं परमां कलाम् ॥

ध्यायेदिति शेषः । निरालम्बामिति तद्वक्ष्यमाणात् । टीकाकारधृततन्त्रे—

त्यजेत् शैथिल्यमङ्गानां नासाग्रे रोपयेद्दृशौ ।
मुखं विवृणुयात् किञ्चित् दन्तैर्दन्तान् न संस्पृशेत् ॥
रसनामन्तरा कुर्य्यादनङ्गे धारयेन्मनः ।
इयं सा परमा मुद्रा निरालम्बेति पञ्चमी ॥

इह स्थाने एवं मुद्रां बद्ध्वा सदाभ्यासात् धृतपवनात् पवनसुहृदां वह्नीनां कलाः पश्यति । तदनन्तरं तन्मध्यान्तःप्रविलसितरूपान् ज्वलद्दीपाकारान् पश्यति । पश्चात् नवीनसूर्य्यप्रकाशाकारं गगनभूमध्यमिलितं पश्यति । इह स्थाने भगवान् साक्षात्कारविषयो भवति ।

ननु सर्व्वव्यापित्वात् अपरिच्छिन्नस्य ईश्वरस्य कथं परिच्छिन्नस्थाने अभिव्यक्तिरित्यत आह राहुरिति । यथा अम्बरगतो राहुर्न दृश्यते किन्तु

शशिसूर्य्ययोर्म्मण्डलमेव दृश्यते तथायं चिदात्मा एवम्भूतकर्म्मविशेषकरणात् अत्रैव साक्षाद्भवति । प्राणनिधने मरणकाले इह स्थाने प्राणान् वायून् ऊर्द्ध्वगामिन्या नाड्या समारोप्य वेदान्तविदितं "नित्यं विज्ञानमानन्दं ब्रह्म" इति श्रुतिविदितं परं नित्यं देवमित्यादिविशेषितं पुरुषं प्रविशति ।

तथा गीतायामपि—

प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्म्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम् ॥

इति ॥ * ॥

लयस्थानं वायोरिति । तदुपरि पूर्व्वोक्तनादोपरि चकारात् नादस्यापि लयस्थानम् । यत्र वायुर्नादश्च अथैनं जगदधरीकृत्य ब्रह्मरन्ध्रस्यादिस्थाने प्रलीयते तत् वायोर्नादस्यापि लयस्थानं नादान्तमिति यावत् । अत्र अर्द्धनारीश्वरोऽस्तीत्याह महानन्दमित्यादिना । महान् आनन्दो यत्र तं महानन्दस्वरूपम् । शिवार्द्धं शिवाया अर्द्धं शिवस्याकारम् अर्द्धनारीश्वरमित्यर्थः ।

तथा च श्रीक्रमे—

चेतसा संप्रपश्यन्ति नादान्ते वृषभध्वजम् ।
तमर्द्धदेहं वरदं कारणत्रयमातरम् ।
पुटद्वयविनिष्क्रान्तो वायुर्यत्र प्रलीयते ॥

स्वच्छन्दसंग्रहेऽपि—

हलाकारस्तु नादान्ते भित्त्वा सर्व्वमिदं जगत् ।
अधःशक्त्या विनिर्भेद्य ऊर्द्ध्वशक्त्यवसानकम् ॥
नाड्या ब्रह्मबिले लीनस्त्वव्यक्तो ध्वनिलक्षणः ।
अतो ब्रह्मबिलं ज्ञेयं रुद्रकोट्यर्व्वुदैर्युतम् ॥
तत्र ब्रह्मशिवो ज्ञेयः शशाङ्कशतसन्निभः ।
दशबाहुस्त्रिनेत्रश्च पञ्चवक्त्रेन्दुशेखरः ॥
ब्रह्माणी त्वपरा शक्तिः ब्रह्मणोत्सङ्गगामिनी ।
द्वारं सन्मोक्षमार्गस्य रोधयित्वा व्यवस्थिता ॥

हलाकारो लाङ्गलसदृशः ।

देवीस्थानं सहस्रारं प्रविशेदकुलं प्रिये ।

इति श्रीक्रमादकुलाख्यसहस्रारपद्ममाह तदूर्द्ध्वे इत्यादिना। शङ्खिन्या नाड्याः शिखरे अग्रे शून्यदेशे चित्रिण्या मेरुदण्डस्य च शून्यदेशे तेन सहस्रारं न मेरुदण्डस्य मध्ये न चित्रिण्या ग्रथितम् ।

मायातन्त्रेऽपि—

मूलादिषट्सरोजातं चित्रिणीग्रथितं प्रिये ।
लिङ्गाधोर्द्ध्वनाभिवक्षःकण्ठभ्रूमध्यदेशजम् ॥

अतएव स्वच्छन्दसंग्रहे—

द्वादशार्णं ललाटोर्द्ध्वं रूपिण्यार्द्धावसानकम् ।
द्व्यङ्गुलोर्द्ध्वशिरोदेशं परं व्योम प्रकीर्त्तितम् ॥

श्रीक्रमे—

आसव्यकर्णात् देवेशि शङ्खिनी च शिरोपरि ।

इत्याद्यनन्तरम् ।

शङ्खिनीनालं संप्राप्य चास्थिशून्यं बिभर्त्ति यः ।
अमृतं यत् त्रिकूटस्थं परमानन्दलक्षणम् ॥
सहस्रारं महापद्मं रक्तकिञ्जल्कशोभितम् ।
द्रुतहेमाम्बुजं जातधारपातप्रवर्षणम् ॥
विसर्गाधः पद्ममिति सर्गः शक्तिर्निशाकरः ॥ इति ॥

नारदोक्तेन विसर्गस्य सहस्रारपद्मधारिण्या ऊर्द्ध्वस्थितायाः शक्तेरधःपद्मम्। निर्व्वाणपद्धत्यामपि—

कुलरूपं भवेत् शक्तिः विसर्गमण्डलं प्रिये ।
सहस्रारं महापद्मं रक्तकिञ्जल्कशोभितम् ॥

सारसमुच्चयेऽपि "सहस्रारपद्मं विसर्गादधस्तात्" । पूर्णपूर्णेन्दुशुभ्रं पूर्णं पीयूषपूर्णं तच्च पूर्णेन्दुशुभ्रञ्चेति तत् । बालसूर्य्यरश्मिसमकेशरसमूहो यस्य तत् । पद्मन्तु शुक्लवर्णम् ।

यथा मायातन्त्रे—

महाशून्ये सहस्रारं निशाकरसहोदरम्।
अधोवक्त्रं कर्णिकायाः चन्द्रोर्द्धे शक्तिरूपिणी॥

ललाटाद्यैरकाराद्यैः समस्तमातृकाक्षरैः युक्तम्। तन्मध्ये पूर्णचन्द्रः स्निग्धसन्तानं हसतीति स्निग्धसन्तानहासी। तस्यान्तश्चन्द्रमण्डलस्य मध्ये त्रिकोणं तत्तु अकथादित्रिरेखात्मकं तत्त्रिकोणे हलक्षवर्णत्रयम्। तदन्तस्त्रिकोणमध्ये शून्यं परलिङ्गं परलिङ्गस्य तेजोवर्णत्वात् शून्यं शून्याकारमिति यावत्।

तथाच गौतमीये—

सहस्रारे हिमनिभे सर्व्ववर्णविभूषिते।
अकथादित्रिरेखासु हलक्षत्रयभूषिते।
तन्मध्ये परविन्दुञ्च सृष्टिस्थितिलयात्मकम्॥

योगिनीहृदये—

सूक्ष्मरूपं समन्तात्तु वृतं परमलिङ्गकम्।
विन्दुरूपं परानन्दकन्दं नित्यं पदोदितम्॥

व्याख्यातञ्च अमृतानन्दस्वामिना यथा परलिङ्गस्य तेजोवर्णः द्वादशवर्णो हंसः अतः सूक्ष्मरूपम् अतएव विन्दुरूपं नित्यञ्च मातृकात्वादुत्पत्तिविनाशरहितम्। पदात् पदं प्राप्य उदितं प्रकाशितम्। तदेवाह परमामोदसन्तानराशेः परं कन्दं सूक्ष्ममिति। शशिसमस्तकलाशुद्धरूपम्। "नित्यं विज्ञानमानन्दं ब्रह्म" इति श्रुतिबोधितो यः परशिवः स द्विधा भूत्वा परमशिवाख्यः सगुणः शिवः प्रकाशात्मा अत्र परविन्दुचक्रे निवसति इत्याह इह स्थाने इत्यादिना। परशिवसमाख्यानसिद्धप्रसिद्धं यस्य सः।

तदुक्तं सङ्केतपद्धत्याम्—

अकारः सर्व्ववर्णाग्रे प्रकाशः परमः शिवः।
हकारो नित्यकला प्रोक्तो विमर्षाख्यः प्रकीर्त्तितः।
अनयोः सामरस्यं यत् परस्मिन् महसि स्फुटम्॥

तत्र अमृतानन्दस्वामिनः अ इति ब्रह्मश्रुत्या अकारवाच्यः परशिवः

तस्यांशित्वेन परमशिवोऽप्यकारवाच्यः प्रकाशरूपब्रह्मांशित्वात् । विमर्षाख्यः विमर्षिणी सशक्तिरित्यन्तेनाह: "सर्व्वात्मा पुरुष एवेदं सर्व्वं यद्भूतं यच्च भाव्यम्" इति श्रुतेः । रसो द्रव्यविशेषः पर इति प्रसिद्धस्तस्य विसरः समूहस्तद्वल्लितः शुक्लः । "सन्दोहविसरव्रजाः" इत्यमरः । अज्ञानमोहान्धस्य हंसः सूर्य्यः सुधाधारासारं अतितरां विमुञ्चन् यतेः स्वात्मज्ञानं स्वस्य शिवाभेदज्ञानं दिशति । भगवान् ऐश्वर्य्यादियुक्तः स परमशिवः परमहंस इत्याह समास्ते इत्यादिना । सकलसुखसमूहस्य लहरी तरङ्गः तस्य परीवाहः । "जलोच्छ्वासाः परीवाहाः" इत्यमरः । परम इति नाम्ना समुचितः परमहंस इत्यर्थः । स च मायावच्छिन्नः । तथाच तन्त्रान्तरे—

सरोरुहमधोमुखं प्रविलसत् सहस्रच्छदं
क्रमादरुणकेशरप्रकरभास्वरनिर्म्मलम् ।
तदन्तरपि चिन्तयेदमृतरोचिषो मण्डले
पुराणपुरुषं परं परिगतं महामायया ॥ इति ॥
मायोपाधिविनिर्म्मुक्तं शुद्धमित्यभिधीयते ।
मायासम्बन्धतश्चेशो जीवोऽविद्यावशस्तथा ॥

इति वेदान्तोक्तेः । शिव इत्यादि स्पष्टम् । परमपुरुषमिति भारते—

अव्यक्तं मन इत्याह शरीरं परमुच्यते ।
अव्यक्तके पुरे शेते पुरुषस्तेन चोच्यते ॥

खगतिः खेचरः स्यात् । यद्वा खे ब्रह्मणि गतिः स्यात् । "खं ब्रह्म" इत्याद्युपनिषत् । ऊर्द्धशक्तिरूपां कलामाह तत्रास्ते इत्यादिना । प्रातःसूर्य्यतुल्या चन्द्रस्य षोड़शकला अमानाम्नीति यावत् ।

अमा षोड़शभागेन देवि प्रोक्ता महाकला ।
संस्थिता परमा माया देहिनां देहधारिणी ॥

इति वचनात् । सूक्ष्मत्वात् शतधाविभक्तमृणालतन्तुभागैकरूपा चयोदयरहितत्वान्नित्या अधोमुखी सृष्ट्युन्मुखी । पूर्णानन्दसमूहो यस्याम् । या अभिगलत्पीयूषधारा तस्या धरा ।

स्वच्छन्दसंग्रहे—

ब्रह्माणी त्वपराशक्तिः ब्रह्मणोत्सङ्गगामिनी।
द्वारं सुमोक्षमार्गस्य रोधयित्वा व्यवस्थिता॥
तां भित्त्वा तु वरारोहे ऊर्द्ध्वशक्तिं परां शिवाम्।
शक्तितत्त्वात्मिकां देवीं प्रसुप्तभुजगाकृतिम्॥
शक्तितत्त्वं समाख्यातं भुवनैराश्रितं महत्।
शक्तिं तत्त्वात्मिकामूर्द्ध्वशक्तेरुपरि संस्थिताम्॥

योगिनीहृदयेऽपि—

शक्तौ पुनर्व्व्यापिकायां स मनोन्मनीगोचरे॥ इति॥

व्यापिनीतत्त्वं शक्तितत्त्वस्वरूपमाह निर्व्वाणाख्य इत्यादिना। सूक्ष्मत्वात् सहस्रधाविभजितस्य केशभागस्यैकभागतुल्या अर्द्धचन्द्रवत् कुटिला सर्व्वार्क-तुल्यप्रभा द्वादशादित्यप्रभा। परात् षोड़श्याः कलायाः परतः। तदन्तर्गता चन्द्रमण्डलान्तर्गता न तु षोड़श्याः कलायाः अन्तर्गता। यथा सारसमुच्चये षोड़शीं कलामभिप्रेत्य—

एतस्याः परतः स्थिता भगवती भूताधिदेवाधिपा
निर्व्वाणाख्यकलार्द्धचन्द्रकुटिला सा षोड़शान्तर्गता।
वालाग्रस्य सहस्रधा विगलितस्यैकेन भागेन या
सूक्ष्मत्वात् सदृशी त्रिलोकजननी या द्वादशार्कप्रभा॥ इति॥

स्वच्छन्दसंग्रहे—

षोड़शान्तमिति ख्यातं व्योमस्थानेन्दुमण्डलम्॥ इति॥

तत्रैव—

आधारं भावनानाञ्च प्रवक्ष्यामि समासतः।
सूक्ष्मा चैव सुसूक्ष्मा च तथाचैव मृतामृता॥
चतुर्द्दिक्षु स्थितास्तासां मध्यस्था व्यापिनी स्मृता।
पञ्चवक्त्रा त्रिनेत्रा च सतेजाख्या च पञ्चमी॥ इति॥

समनापदमाह एतस्या इत्यादिना। परं उत्तरकालं मातीति परमा

ध्वंसरहिता नित्येत्यर्थः। सूक्ष्मत्वात् केशाग्रस्य कोटिभागैकभागरूपा अतः अतिगुह्या। निरवधि विलसन्ती या अमृतधारा तस्या धरा। मुनिमनसि लसिततत्त्वबोधं शिवाभेदज्ञानं वहन्ती।

इदन्ते तु तयोरैक्यमिति विद्या निगद्यते॥

इति परापञ्चशिकावचनात् ब्रह्मणोऽतिनैकट्येन तथोक्तम्। तथा—

समनान्तर्व्वरारोहे पाशजालमनन्तकम्।

इति वचनात् अत्रापि पाशजालम्। एतस्या निर्व्वाणकलायाः मध्यदेशे इति सामीप्ये सप्तमी। तथाच मध्यदेशसमीपे किञ्चिदुपरीत्यर्थः।

तथाच स्वच्छन्दसंग्रहे—

चिदानन्दस्वरूपा तु परा शक्तिस्तदूर्द्ध्वतः।
समना नाम सा शक्तिः सर्व्वकारणकारणम्॥
सर्व्वान्तानि विभर्त्तीयं शिवेन समधिष्ठिता।
अत्र रूढ़ः स भवने शिवः परमकारणम्।
शिवः सर्व्वस्य कर्त्तेयं शक्तिः कारणमुच्यते॥

उन्मनीपदमाह तस्या मध्यान्तराले इत्यादिना। तस्याः समनायाः मध्यान्तराले अत्र सामीप्ये सप्तमी। शिवपदं शिवतनुप्राप्तिस्थानम् उन्मनीति यावत्।

स्वच्छन्दसंग्रहे—

शिवतनुं समाख्यातं तदूर्द्ध्वं शक्तितनुतः। इति।

तथा तत्रैव—

शिवशक्तिद्वयञ्चैव शिवतनुं प्रकीर्त्तितम्।

सूक्ष्मार्थशक्त्यवच्छिन्नं शिवतनुमित्यर्थः।

तथाच तत्रैव—

यावत् सा समना शक्तिस्तदूर्द्ध्वं उन्मनी स्मृता।
नात्र कालकलाभानं न तनुं न च देवताः॥
अनिर्व्वाणं परं शुद्धं रुद्रवक्त्रं तदुच्यते।
शिवशक्तिरिति ख्याता निर्व्विकल्पा निरञ्जना॥

तत्त्वातीतं वरारोहे—

इत्यादि अग्रे लिखिष्यते। मनःसहितत्वात् समना। "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह" इति श्रुत्या मनोऽतीतत्वान्मना इत्यमृतानन्दस्वामिनः।

शक्तिमध्यगतो नादः समनान्तं प्रसर्पति॥

इति स्वच्छन्दसंग्रहात् नात्र कालकलांशस्य भानम्। परमकुलपदमिति परं उन्मन्याः परं अकुलपदम् अकुलाख्यपरशिवात्मकपदं विश्वस्य विश्रामस्थानत्वात्। पदमिति अमलं सत्त्वादित्रिगुणयुक्तम्। शाश्वतं नित्यम्। योगेन प्राप्तं नित्यानन्दमभिधानं यस्य तत्। "नित्यं विज्ञानमानन्दं ब्रह्म" इति श्रुतेः। शुद्धबोधस्य शुद्धज्ञानस्य प्रकाशो यस्मात्। तथाच टीकाकारधृततन्त्रे "उन्मन्यन्ते परशिवः" इति। स्वच्छन्दसंग्रहे उन्मनीमभिधाय—

तत्त्वातीतं वरारोहे वाङ्मनो नैव गोचरम्।

"यतो वाचो निवर्त्तन्ते" इत्यादि श्रुतेः। तत्त्वं "तत्त्वमसि" इति श्रुतेः।

स्वाभाविके परे धाम्नि विवरं तत्त्वसंज्ञकम्॥

इति शिवतन्त्रात्।

श्रीमते—

अकुलेश्वरदेवस्य सम्बन्धः प्रथमः स्थितः।
रूपातीतः परो विन्दुः शक्त्या वेष्टितभास्वरः।
अतो नादो विरोधी च अर्द्धचन्द्रसमुत्क्रमात्॥
एतत्तु पञ्चमप्रोक्तं ज्ञानरत्नं महोदयम्।
तत्र तद्दक्षिणं षट्कमाज्ञापूर्व्वं कुलोद्भवम्॥ इति॥

नियतनिजचित्त इति। गौतमीये—

अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यं दयार्ज्जवम्।
क्षमा धृतिर्म्मिताहारः शौचञ्चेति यमा दश॥
तपः सन्तोषमास्तिक्यं दानं देवस्य पूजनम्।
सिद्धान्तश्रवणञ्चैव ह्रीर्म्मतिश्च तपो हुतम्।
दशैते नियमाः प्रोक्ता योगशास्त्रविशारदैः॥ इति॥

तथाच एतद्‌द्वयाभ्यासशील: श्रीनाथवक्त्रात् गुरुवक्त्रात् मोक्षवर्त्मप्रकाशं क्रमं ज्ञात्वा हुङ्कारेण मूलाधारस्थितवह्निपवनयोराक्रमेण तप्तां कुण्डलिनीं कृत्वा निद्रितां तां बोध्य तल्लिङ्गं स्वयम्भूलिङ्गं भित्त्वा कुण्डलिनीवेष्टनस्य भेदं कृत्वा ब्रह्मद्वारस्य मध्ये तां रचयति । रुद्रयामले—

हुङ्कारेण समुत्थाप्य शक्तिं स्वाधारसंस्थिताम् ।

ततः सा प्रबोधिता तल्लिङ्गत्रयं स्वयम्भूवाणेतरलिङ्गत्रयं भित्त्वा भेदं कृत्वा तच्छिद्रेण ब्रह्माख्याया इति ल्यबलोपे पञ्चमी ब्रह्मनाड़ीमारुह्य सकल-सदनं प्राप्य परमरसयुक्तशिवे परमशिवे प्रदीपाभे देदीप्यते। ततः सा शुद्धस्वभावा सूक्ष्मतालक्षणेन तड़िदिव तत्तन्तुरूपा तन्मोक्षानन्दं घटयति। नयवशात् नीतिवशात् । समाधौ यतो योगीशः तां कुलकुण्डलिनीं जीवात्मना सार्द्धं मोक्षधाम्नि परमशिवे सच्चिदानन्दरूपे भगवतीं चैतन्यरूपां ध्यायेत् । तन्त्रान्तरे—

ध्यै चिन्तायां स्मृतो धातुश्चिन्तातत्त्वेन निश्चला ।
एतद्ध्यानमिह प्रोक्तं सगुणं निर्गुणं द्विधा ।
सगुणं वर्णभेदेन निर्गुणं केवलं तथा ॥

अन्यत्रापि—

मज्जीवब्रह्मणोरैक्यं सोऽहं स्यादिति वेदनम् ।
तन्निर्गुणमिदम् । इत्यादि ।

ततो लाक्षाभं रक्तवर्णं परमामृतं कुण्डलिनी पीत्वा पूर्णानन्दमहोदयात् परशिवात् शिवसकाशात् प्राक्‌पादितोऽन्यादिसृष्टिमार्गेण कुलपथात् कुल-पथमारुह्य ब्रह्म रुद्ध मूलाधारे स्वस्थाने प्रविशेत् । ततो योगी तद्दिव्यामृत-धारया योगपरम्पराप्राप्तया ब्रह्माण्डस्थितं शरीरस्थं दैवतं डाकिन्यादिकं तर्पयेत् प्रीणयेत् । श्रीनाथवक्त्रादिति यदुक्तं तत् गोरक्षसंहितादौ स्पष्टीकृतम् । यथा—

प्रबुद्धा वह्नियोगेन मनसा मारुता हता ।
शूचीव गुणमादाय व्रजत्यूर्द्ध्वं सुषुम्नया ॥

ज्वलन्ती भुजगाकारा पद्मतन्तुनिभा शुभा।
उद्घाटयेत् कवाटञ्च यथा कुञ्चिकया हठम्।
कुण्डलिन्या तथा योगी ब्रह्मद्वारं प्रभेदयेत्॥
कृत्वा संपुटितौ करौ दृढ़तरं बद्ध्वा तु पद्मासनं
गाढ़ं वक्षसि सन्निधाय चिबुकं ध्यानञ्च तच्चेतसि।
वारंवारमपानमूर्द्ध्वमनिशं प्रोत्सारयन् पूरयन्
प्राणं मुञ्चति मोक्षमेति शनकैः शक्तिप्रभावात् यतः॥

कुञ्चिकया कुलुपकारीत्याख्यया। निर्व्वाणपद्धत्यामपि—

आदौ पूरकयोगेन स्वाधारे योजयेन्मनः।
गुदमेढ्रान्तरे योनिस्तामाकुञ्च्य प्रबोधयेत्॥
भ्रमद्‌योनिगतं ध्यायेत् कामं बन्धूकसन्निभम्।
ज्वलत्कालानलप्रख्यं तड़िल्कोटिसमप्रभम्॥
तदूर्द्ध्वे तु शिखा सूक्ष्मा चिद्रूपा परमा कला।
तया सहितमात्मानमेकीभूतं विचिन्तयेत्॥
गच्छन्ती ब्रह्ममार्गेण लिङ्गभेदक्रमेण तु।
अमृतं यद्विसर्गस्थं परमानन्दलक्षणम्॥
द्रुतरक्तं सतेजाढ्यं धारापातप्रवर्षणम्।
पीत्वा कुलामृतरसं पुनरेव कुलं विशेत्॥
सा च प्राणः समाख्यातस्तन्त्रेऽस्मिन् परमेश्वरि।
एवमभ्यस्यमानस्य अहर्निशनिबन्धनात्।
चतुर्व्विधा तु या सृष्टिरस्यां योनौ प्रजायते॥
पुनः प्रलीयते तस्यां कालाग्न्यादिशिवान्तिकम्।
योनिमुद्रा परा सा तु बन्धस्तस्याः प्रकीर्त्तितः॥

चतुर्व्विधेति नैयायिकमते पुरुषात्। सांख्यमते प्रकृतिपुरुषाभ्याम्। पातञ्जलमते प्रकृतितः। मीमांसामते अदृष्टात् सृष्टिः। तत्र योगी द्विविधः।

यथा सारदायाम्—

पिण्डं भवेत् कुण्डलिनी शिवात्मा पदञ्च हंसः सकलान्तरात्मा ।
रूपं भवेत् विन्दुरमन्दकान्तिरतीतरूपं शिवसामरस्यम् ॥
पिण्डादियोगं शिवसामरस्यात् सवीजयोगं प्रवदन्ति सन्तः ।
शिवे लयं नित्यगुणाभियुक्तं निर्वीजयोगं फलमव्यपेक्षम् ॥ इति ॥

तथान्यत्र—

दिक्कालादिविवर्ज्जिते परशिवे चैतन्यमात्रात्मिके । इत्यादि ।

स्वच्छन्दसंग्रहेऽपि—

पिण्डं कुण्डलिनी शक्तिः पदं हंसः प्रकीर्त्तितः ।
रूपं विन्दुरिति ख्यातं रूपातीतस्तु चिन्मयः ॥

तत्रान्तरेऽपि—

पिण्डे युक्ताः पदे युक्ता रूपे युक्ताः षडानन ।
रूपातीते तु ये युक्तास्ते मुक्ता नात्र संशयः ॥

मतभेदे अनेकानि पद्मान्याह स्वच्छन्दसंग्रहे—

अधश्चोर्द्ध्वं सुषुम्नायाः सहस्रदलसंयुतम् ।
रक्तं श्वेतञ्च साहस्रदलस्थं शक्तिसंयुतम् ॥
ऊर्द्ध्वाधो मुखमूलन्तु कर्णिकाकेशरान्वितम् ।
शक्तिरूपं महादेवि कुलाकुलमयं शुभम् ॥
पङ्कजद्वयमीशानि स्थितं शाश्वतमव्ययम् ।
तयोर्म्मध्ये सुषुम्नान्तस्त्रिंशदाधारपङ्कजम् ॥
शक्तिरूपं शिवाकारं सर्व्वाध्यासं निजालयम् ।

नीलेति शेषः । तथा कियत् कियदूर्द्ध्वे पङ्कजानि ।

तदाह तत्रैव—

आधारपङ्कजस्योर्द्ध्वे सार्द्धद्व्यङ्गुलकोपरि ।
तैजसं साष्टपत्रञ्च पीतकर्णिकया युतम् ॥

हृल्लेखा कर्णिकामध्ये स्थिता लिङ्गादिदेवता।
एतस्मात् द्व्यङ्गुलस्योर्द्ध्वं स्वाधिष्ठानं षड़स्रकम् ॥
आप्यञ्च राकिणीशक्तिः पूर्व्वाभिः शक्तिभिर्युतम्।
ततश्च भावयेद्देवि नाभिमष्टाङ्गुलोपरि ॥
तत्पद्मं मणिपूरञ्च दशपत्रं सुशोभितम्।
लाकिनीमध्यगं तच्च तामर्थादाभिरावृतम् ॥
चतुर्द्दशाङ्गुलादूर्द्ध्वं मणिपूराख्यपङ्कजात्।
पङ्कजं काकिनीमध्यं वायव्यं द्वादशारकम् ॥
तत्रस्थकालरात्र्यादिशक्तिभिश्च समावृतम्।
तत्रस्थसूर्य्यविम्बे च नादो यानादिपीठकम् ॥
एकादशाङ्गुलादूर्द्ध्वं विशुद्धं षोड़शच्छदम्।
मध्यगा शाकिनी वाह्यपत्रेषु परमेश्वरि ॥
अमृताद्यत्तरान्तस्था चन्द्रविम्बं तदूर्द्ध्वगा।
कण्ठोर्द्ध्वं परमेशानि लम्बिका चतुरङ्गुली ॥
आज्ञाचक्रं द्विपत्राब्जं हच्चद्विदलसंयुतम्।
हंसवती चमा पार्श्वद्वये मध्ये तु हाकिनी ॥ * ॥

तन्त्रान्तरे ब्रह्मणः स्वाधिष्ठानमुक्तं यथा—

स्वाधिष्ठानं षड्दलोपेतमुद्यत्विद्युत्प्रेच्चं वादिलान्तैश्च वर्णैः।
युक्तं सावित्रीसहितं विरिञ्चिं ध्यायेदस्मिन् राकिणीं देवताञ्च ॥

योगिनीहृदये—

एताश्चतस्रः शक्त्यस्तु का पूजा तु इति क्रमात्।
पीठाकन्दे पदे रूपे रूपातीते क्रमाद्विदुः ॥

एतास्तत्र पूर्व्वोक्ता अम्बिकादयः चतस्रः कामरूपादिपीठत्वेन परिणताः। तथा च मूलाधारे कामरूपं हृदि पूर्णगिरिः भ्रूमध्ये जालन्धरः सहस्रारे उड्डीयानः। न च "एकमेवाद्वितीयं ब्रह्म" इत्यादि श्रुत्या ब्रह्मण एकत्वमभिहितम्। शक्तिस्तावत् केति चेत् तद्ब्रह्मशिवशक्तिसामरस्यपरत्वमेव।

यथा कुलार्णवे—

अद्वैतं केचिदिच्छन्ति द्वैतमिच्छन्ति चापरे ।
मम तत्त्वं न जानन्ति द्वैताद्वैतविवर्जितम् ॥

स्वच्छन्दसंग्रहेऽपि—

अनयोः सामरस्यं यत् परस्मिन् महसि ध्रुवम् ।

कूर्म्मपुराणे ईश्वरगीतायां शिववाक्यम्—

एकया मम सायुज्यमनादिनिधनस्फुटम् ।
पुंसोऽभूदन्यया भूतिमन्यया तत्तिरोहितम् ॥

एकया मायात्मिकया शक्त्या विशिष्टस्य मम अनादिनिधनं सायुज्यं सहयोगं अर्द्धनारीश्वरात्मकमभूत् । अन्यया आद्यया ज्ञानात्मिकयेति यावत् विशिष्टपुंसो भूतिं उत्पत्तिं जानीहि अन्यया चित्शक्त्या तत् तिरोहितम् । तयैव चणे तिरोहितम् । ब्रह्माविनाभूतम् ।

अतएव तैत्तिरीयवाक्यम्—

यत्तु मे निष्कलं रूपं चिन्मात्रं केवलं शिवम् ।
सर्व्वोपाधिविनिर्म्मुक्तमनन्तमपरं परम् ॥

कालिकापुराणेऽपि—

चितिशक्तिं विनाकारां परं ब्रह्मस्वरूपिणीम् ॥

जन्मखण्डे राधिकां प्रति कृष्णवाक्यम्—

यदा तेजःस्वरूपोऽहं तेजोरूपासि त्वं तदा ।
न शरीरी यदाहञ्च तदा त्वमशरीरिणी ॥

तन्त्रेऽपि—

न शिवेन विना शक्तिः न शक्त्या रहितः शिवः ।
अतस्तयोरभेदश्च चन्द्रचन्द्रिकयोरिव ॥

वेदान्तेऽपि "चिच्छक्तिर्ब्रह्माश्रिता ।" तथा—

मायोपाधिविनिर्म्मुक्तं शुद्धमित्यभिधीयते ।
मायासम्बन्धतश्चेशो जीवोऽविद्यावशस्तथा ॥

इत्युक्तम्। तदेव सामरस्यं परं ब्रह्म सगुणशिवं शक्त्यादिनानारूपेण परिणमते। यथा विश्वसारे—

कालेन प्रेरयेन्मायां सृष्टेरुत्पत्तिहेतवे।
या मूलप्रकृतिः प्रोक्ता सा माया परिकीर्त्तिता॥
योऽयं सदाशिवः प्रोक्तः स एव पुरुषः परः।
एकं ब्रह्म द्विधा भूत्वा सृष्टिरेषा विधीयते॥
अर्द्धेन वनिता भूत्वा अर्द्धेन पुरुषस्तथा।
तावुभौ च समौ कृत्वा सृष्टिव्यक्तिं नयेत् सुधीः॥

मायावच्छिन्नेश्वरस्य षड़ङ्गान्याह कूर्म्मपुराणादौ—

सर्व्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः।
अनन्तशक्तिश्च विभोर्व्विधिज्ञाः षड़ाहुरङ्गाणि महेश्वरस्य॥ * * ॥

नारायणो वैदिकश्च भट्टाचार्य्यः समीरितः।
तस्यात्मजो वामदेवभट्टाचार्य्यस्तथैव च।
तस्यात्मजो विश्वनाथस्तेनेयं रचिता मुदा॥

इति षट्चक्रविवृतिटीका
सम्पूर्णा।

बलदेवटीकाकारधृतः षट्चक्रनिरूपणस्याधिकः श्लोकः ।

इह स्थाने चित्तं निरवधि निधायात्तपवनो
यदि क्रुद्धो योगी चलयति समस्तं त्रिभुवनम् ।
न च ब्रह्मा विष्णुर्न च हरिहरो नैव खमणि-
स्तदीयं सामर्थ्यं शमयितुमलं नापि गणपः ॥ ३१ ॥ (१)

इह स्थान इति । इहस्थाने विशुद्धाख्यपद्मे निरवधि प्रतिक्षणं चित्तं मनो निधाय सम्बध्य आत्तपवनः गृहीतवायुः सन् कुम्भकं कृत्वेति यावत् । योगी जनः यदि क्रुद्धो भवति तदा समस्तं त्रिभुवनं चलयति । तदीयं सामर्थ्यं योगिन एतादृशत्रिभुवनचालनबलं शमयितुं ब्रह्मा सृष्टिकर्त्ता विष्णुः पालनकर्त्ता हरिहरः हरिहरात्मक ईश्वरः खमणिः सूर्य्यः गणपः गणेशः एते नालं न समर्था इत्यर्थः ॥

ॐ श्रीश्रीगुरवे नमः।

सरोजमधु सादरं सरसि मानसे सर्व्वदा
यथाददति षट्पदा नतु कदापि शैवालकम्।
तथैव गुणिनो बुधा वचसि दूषणत्यागतो
ममाददतु साम्प्रतं यदि गुणास्तमित्यर्थये॥

इह खलु दुःखजालसङ्कुलसंसारलब्धजनुषां परमपुरुषध्यानैकनिष्ठचेतसामपि मानुषाणां स्वाभ्यन्तरवर्त्तिषट्चक्रनिरूपणभेदादिज्ञानं विना मोक्षोपायः कोऽपि नास्तीति परमकारुणिको भगवान् परमेश्वरः दुःखसमवायात्तानुद्दिधीर्षुः पर्व्वतराजपुत्त्रीप्रश्नानुसारेण स्वप्रोक्ततन्त्रशास्त्रमहोदधीनन्तरान्तरा षट्चक्रनिरूपणं तद्भेदादिसङ्केतञ्च उपदिदेश। किन्तु तदुपदिष्टतन्त्रशास्त्राणामतीव बाहुल्यादशक्यबोधत्वाच्चाधुनिकाः स्वल्पायुषो जनाः परमपुरुषप्रोक्ततन्त्रशास्त्राणां सारांशमायत्तीकर्त्तुमनीशाः सन्तो नियतं निरयमेव गच्छन्तीति परपरित्राणपरायणः परमपुरुषसमाहितचेताः श्रीमत्पूर्णानन्दयतिः निखिलतन्त्रशास्त्रसारमुद्धृत्य तदर्थाविरोधिभिः स्वकल्पितपञ्चपञ्चाशच्छ्लोकैः षट्चक्रस्थितिस्थाननिरूपणतद्भेदसङ्केतसन्दर्भितं षट्चक्रनिरूपणं स्वरचित श्रीतत्त्वचिन्तामण्यां कृतवान्।

तस्य च पूर्व्वापेक्षया सहजबोधगम्यत्वेऽपि सारांशप्रकाशकटीकाया अभावात् अशक्यार्थबोधोऽयं ग्रन्थ इति प्रायश एव उपेक्षित आसीत्। इदानीन्त्वस्माभिस्तत्परिजिहीर्षया प्रचुरतरार्थव्ययेन साधनासिद्धबोधविद्वदग्रगण्यश्रीमत्कालीचरणप्रणीता निगूढार्थप्रकाशिनी कापि टीका संगृह्य पण्डितमण्डलीपरिशोधिता कृत्वा पुस्तकेऽस्मिन्निवेशिता। साम्प्रतन्त्वनया

विद्वांसो यदि कथञ्चिदप्यानुकूल्यभागिनो भवन्ति तदैवास्माकमर्थव्ययं परिश्रमञ्च सफलं मन्यामहे ।

किञ्च बहुलविस्तृतश्रीकालीचरणप्रणीतटीकावलोकनेन कियदपि कालक्षयं कर्त्तुमनीशानां विषयासक्तचेतसां झटिति मूलवृत्तान्तपरिज्ञानार्थं विद्वत्कुलचूड़ामणिशङ्करविरचिता मूलतत्त्वार्थविवृतिकारिकाऽपरापि टीका सन्निवेशिता ।

यस्तु

इह स्थाने चित्तं निरवधि निधायात्तपवनो
यदि क्रुद्धो योगी चलयति समस्तं त्रिभुवनम् ।
न च ब्रह्मा विष्णुर्न च हरिहरो नैव खमणि-
स्तदीयं सामर्थ्यं शमयितुमलं नापि गणपः ॥

इति श्लोकः विद्वत्कुलशिरोभूषणश्रीमद्बलदेवविद्याभूषणकृतटीकासम्वलितमुद्रितषट्चक्रनिरूपणनामकपुस्तकान्तरे एकत्रिंशच्छ्लोकात् परमधिको दृश्यते स तु अस्मदुपजीव्यश्रीमत्कालीचरणशङ्कराभ्यामुपेक्षितत्वात् नैव पुस्तकाङ्गत्वेन निवेशितः किन्तु पुस्तकस्य समाप्त्यनन्तरं श्रीमद्बलदेवविद्याभूषणविरचितया टीकया सह सन्निवेशित इति ।

अपरञ्च विश्वोत्तारणकारणश्रीमन्महेश्वरवदनपङ्कजविनिर्गतकैवल्यकालिकानामधेयतन्त्रस्य षट्चक्रनिरूपणात्मकद्वितीयपटलेन सार्द्धं सिद्धाचार्य्यवर्य्यश्रीमत्पूर्णानन्दयतिविरचितषट्चक्रनिरूपणात्मकश्लोकसमूहानां प्रायशोऽभिन्नत्वेऽपि क्वचित् क्वचित् पाठवैषम्यस्य कैवल्यकलिकातन्त्रद्वितीयपटलटीकाकृच्छ्रीमद्विश्वनाथसूरिवाक्येनानुमीयमानत्वात् तत्प्रणीतषट्चक्रविवृत्याख्यया टीकयापि पुस्तकमिदमलङ्कृतकलेवरमासीत् ।

किन्तु दुःखं पुनरेतदनुभूयते यद्बहुतरार्थव्ययं परिश्रमञ्च स्वीकुर्व्वद्भिः कुत्रापि कैवल्यकलिकातन्त्रं नोपलब्धं नापि दृष्टं सुतरामेव कैवल्यकलिकातन्त्रमलभमानैरनन्योपायैरस्माभिः कैवल्यकलिकातन्त्रेण श्रीमत्पूर्णानन्दयतिविरचितस्य षट्चक्रनिरूपणात्मकश्लोकसमूहस्य पाठादिवैषम्यं परिदर्शयितुमनीशैर्मूकैर्भूयते इति ।

अन्यच्च आर्य्यधर्म्मावलम्बिनां सर्व्वेषामेव श्रीगुरुराराधनीय इति पूर्व्वपूर्व्वाचार्य्यशिष्टाचारपरम्पराप्राप्तत्वात् जगद्गुरुरपीश्वरः श्रीगुरुपादुकापञ्चकस्तोत्रव्याजेन श्रीगुरोः स्वीयाराध्यतां दर्शयन् सर्व्वानुपदेष्टुं पादुकापञ्चकं नाम स्तोत्रमकार्षीत् तदपि विद्वत्प्रवरश्रीमत्कालीचरणविरचितया गूढ़भावार्थप्रकाशिकया अमलाख्यटीकया षट्चक्रविवृतेः प्राक् ग्रन्थेऽस्मिन् सन्निवेशितमिति ।

सम्पादकस्य निवेदनम् ।

सूचीपत्रम् ।

विषयः । पृष्ठायां । पंक्तौ ।

अ ।

अकथादित्रिकोणम् ७६,९७,९८ ।
अकुलपदम् १३३ ।
अनाहतपद्मं ३०,३३–३६,१२१,१२२ ।
अन्तरात्मा ६१,१२४ ।
अपराशक्तिः १३१ ।
अपानः १५,११६ ।
अमाकलादीनां अधिष्ठानं ६२,७० ।
अमृतानन्दस्वामिनः परलिङ्गस्य व्याख्या १२९,१३० ।
अम्भोजमण्डलं २४ ।
अर्केन्द्वग्निमण्डलानि ५१ ।
अर्द्धचन्द्रः १२५
अर्द्धनारीश्वरः ३८,३९,१२७ ।
अर्द्धमात्रा ५७ ।
अर्द्धेन्दुः ४५ ।
अवलालयः ९७ ।
अहङ्कारः ५५ ।

आ ।

आज्ञाचक्रं ४२,४३,४७,१२३, २२ ।
आज्ञीकला ५७,५८ ।
आत्मप्रबोधः ७३,७४ ।
आत्मसाक्षात्कारस्थानं ७४ ।
“आत्मा तत्र प्रदीपाभः” १२२ ।
आत्मानं प्रणवाकृतिं नादरूपं ४५,४९ ।
आदिदेवः ७,८ ।
आदिहंसयोर्युगं १००,१०२ ।
आद्याशक्तिः ७४ ।
आधारपद्मं ९,१९ ।

इ ।

इच्छा १०१,११७ ।
इड़ा ३,४,५,१०९ ।
इतरलिङ्गं ४५,५६,८० ।
इतरशिवपदं ४४ ।
इतरपदस्य व्याख्या १२३ ।
इन्धिका १२६ ।

ई ।

ईशः ३१ ।
ईश्वरः ७५,१२१ ।

उ ।

उन्मनी ४५,४९,५७,५८,५९, १३२,१३३ ।

विषयः । पृष्ठायां । पंक्तौ ।

उन्मन्यन्ते परशिवः १३३ ।

ऊ ।

ऊर्द्धगा १२६ ।

ऐ ।

ऐन्द्रवीजं ११ ।

क ।

कन्दम् ११२ ।

कन्दमध्यं २,५ ।

कन्दर्पो नाम वायुः १४ ।

कला ५७,४८,६५,७६,१२५,१२६ ।

कलापदं (भूयः) ४५ ।

काकिनी ३१,१२१ ।

काकिनीध्यानं ३२,१२१ ।

कान्तिः १२५ ।

कामरूपं १४,१५,११६ ।

कामकला ६७,१०१,१०२ ।

कारणावान्तरशरीरम् ५३,१२५,१२६ ।

कुण्डलिनी १,७,१८,२०,२१,२२,२३, ७४,७५,७७,७८,८०,८२,८५,८६, ६१,६२,१०६,११७, ११८, ११६, १२३,१३४,१३५,१३६ ।

कुण्डलीविवरं ६६,६७ ।

कुहुः ६ ।

कैवल्यकलिकातन्त्र टीका १०६ ।

विषयः । पृष्ठायां । पंक्तौ ।

कौस्तुभः २५

ख ।

"खं ब्रह्म" १३०

खेचरीमुद्रा ४६,८० ।

ग ।

गान्धारराग: ५७ ।

गान्धारी ६ ।

गुरुः ६१,६५,६६,७६,६७,६८, १००,१०१,१०५,१०६ ।

गुरुचरणाभ्याम् परमामृतं निःसरति १०४,१०५ ।

गुरुध्यानयोगः १०७ ।

गुरुवक्त्रात् ब्रह्मज्ञानं १३४ ।

च ।

चक्रभेदप्रकारः ८२ ।

चणकाकाररूपः ५१,७४ ।

चन्द्रमण्डलं ६०,६१,६५,७३ ।

चन्द्रविन्दुः १०१ ।

चन्द्रस्य षोड़श कलाः ६२ ।

चित् कला १०१ ।

चित् शक्तिः २१ ।

चित्रा ११२ ।

चित्रिणी २,५,७,४५,७७,७६,८१, ६६ ।

विषयः ।	पृष्ठायां । पंक्तौ ।
ज ।	
जीवः	११८ ।
जीवन्मुक्तः	६८ ।
जीवात्मना सह कुण्डलिनीनयनं	१३४ ।
जीवात्मा (दीपकलिकाकारः)	७८,११८ ।
जीवात्मनः मूलाधारे आनयनं	७८ ।
जीवात्मनोरैक्यं	८३,८६ ।
जीवेन सार्द्धं कुण्डलिनीचालनं	८६ ।
ज्ञानबोधा	१२६ ।
ज्ञानात्मा-ज्ञानशक्तिः	५१ ।
ज्ञानेच्छाक्रियात्मानः नादबिन्दु निबोधिकाः	७२ ।
ज्येष्ठा	१५,८७,१०१ ।
ज्योत्स्ना	१२५ ।
ज्योत्स्नावती	१२५ ।
ड ।	
डाकिनी	१३,११६ ।
डाकिनीध्यानं	१३ ।
त ।	
तत्त्वज्ञानं	७१ ।
तत्त्वबोधः	७१ ।
"तत्त्वमसि"	१३३ ।
तमोपहा	१२६ ।

विषयः ।	पृष्ठायां । पंक्तौ ।
त्रासा	१२६ ।
त्रिकोणं	१४,६०,६५,११७ ।
त्रिकोणशक्तिः	३२ ।
त्रिपुरसुन्दरी	५८ ।
त्रिपुरा	१०१ ।
त्रिपुरायोगः	१०८ ।
त्रिबिन्दुः	७५ ।
त्रैपुराख्यं कोणं	१४ ।
द ।	
दशशतदलपद्मं	५८ ।
दीपकलिकाहंसः	३१ ।
दीपिका	१२६ ।
द्वादशार्णपद्मं	८५ ।
ध ।	
धरायाश्चतुष्कोणचक्रं	१० ।
धरावीजं	१० ।
ध्यानं (सगुणं निर्गुणञ्च)	१३४ ।
ध्रुवमण्डलम्	४५ ।
न ।	
नभोमण्डलम्	३६ ।
नाड़ीत्रयाणां वेणीबन्धक्रमत्वम्	३,४ ।
नादः	४५,५७,५८,५८,७२.१२६ ।
नादबिन्दू	६५,७२,८८,१०० ।
नादशक्तिः	२१,१३३ ।

विषयः।	पृष्ठायां। पंक्तौ।
नादान्तः	४५।
"नित्यं विज्ञानमानन्दं ब्रह्म"	१३३।
नित्यानन्दः = निर्गुणब्रह्म	२२।
नियमा दश	१३३।
निर्व्वाणकला	६२,७०,७१,७५,१३१।
निर्व्वाणशक्तिः	७१,७२,७३।
निरालम्बपुरं	४८,४९।
निरालम्बा मुद्रा	१२६।
निबोधिका	४५,७२,१२६।
निवृत्तिः	१२५।

प।

विषयः।	पृष्ठायां। पंक्तौ।
पञ्चभूताधिदेवतानां चिन्तान्तरस्थत्वम्	११३।
पञ्चवक्त्राणि	१०७।
पञ्चविधं चैतन्यम्	८२।
पद्मानां अवाङ्मुखत्वं	११५।
पद्मानां स्थानानि	१३६,१३७।
पद्मानां पत्रं वर्णात्मकं	९०।
परवस्तु	५६।
परं कन्दं	६२।
परं ज्योतिः	६१।
परं देव्याः पदं	६७।
परं लिङ्गं	१२०।
परं विन्दुः	६१,६२,७०,७४,८२,९०।
परं विन्दुरूपःशिवः	८५।
परमकुलपदं	४४।
परमकुण्डली	७४।
परमःपुमान्	५८।
परमः पुरुषः	६७।
परमरसशिवः	८०,८१।
परमब्रह्म	७०,७३।
परमशिवः	१२४।
परमशिवस्थितिः (निर्व्वाणतन्त्रोक्ता)	५१।
परमहंसः	१०२।
परमा	१२६।
परमात्मा = परशिवः	५१।
परमात्मज्ञानात्मनोःपूजा	५१।
परमाशक्तिः	११५।
परमेश्वरः	५८।
परविन्दुः	७४।
परशक्ति	२१,५९।
परशिवः	५१,६२,६५,६६,८३।
परा	१९,२१,१२३।
परलिङ्गम्	१२९,१३०।
पराशक्तिः	७६।
पश्यन्ती	१९,२१,८१,१२३।
पश्चिमास्यः	१६।
पादुकानां पञ्चकं	१०७।

विषयः ।	पृष्ठायां । पंक्तौ ।
पादुकापञ्चकस्तोत्रं	९५,१०७ ।
पिङ्गला	३,४,१०९ ।
पुराणपुरुषस्थानं	१३० ।
पृथ्वी चतुष्कोणा पीताभा	११५ ।
पौराणिकमतम्	७५ ।
प्रकृतिः	५५,५६,५८ ।
प्रकृतिपुरुषः	६७,६८,७४ ।
प्रजापतिः	११ ।
प्रणवः	१२४ ।
प्रणवाकृतिः	५ ।
प्रतिष्ठा	१२५ ।
प्राणः	१५ ।

व ।

वज्रा	२,५,७,११०,११२ ।
बद्धः	६९ ।
बन्धः	६८
बन्धती	१२६ ।
बुद्धिः	५५,५६ ।
बुद्धितत्त्वं	१९ ।
बोधा	१२६ ।
बोधिनी	५७,५८,५९,१२६ ।
ब्रह्मणः स्वाधिष्ठानं	१३७ ।
ब्रह्मद्वारमुखं	१८ ।
ब्रह्मद्वारं (सुषुम्नाया वदनं)	८,९ ।
ब्रह्मपदं	७४ ।
ब्रह्मरन्ध्रं	६१ ।
ब्रह्मा	२३,७३ ।
ब्रह्माणी	१२७,१३१ ।
ब्रह्माण्डादिकटाहः	२१ ।
ब्राह्मीध्यानं	१२ ।

भ ।

भगवत्साक्षात्कारस्थानं	५० ।
भानुमण्डलम्	२३,२४ ।
भुजङ्गी	७ ।
भूतशुद्धिः	७७,७९ ।

म ।

मणिपीठमण्डलं	९९,१०० ।
मणिपूरं (वैश्वानरस्य मण्डलं वा)	२७,१२० ।
मध्यका	१२६ ।
मध्यमा	८१,१२३ ।
मनोन्मनी	१२५ ।
मनः	४३,५५,५६ ।
मन्त्रसिद्धिः	३७ ।
मन्त्रार्णा देवता प्रोक्ता	११ ।
महत्तत्त्वं	५६ ।
महानादः (लाङ्गलाकृतिः)	५९ ।
महानादरूपम्	५३,५४ ।

विषयः।	पृष्ठायां। पंक्ती।
महावायुः	६१।
महाशङ्खिनीशक्तिः	६५।
मात्रार्द्धा शक्तिः	५७।
मालावर्णः	५८।
मुक्तपुरुषाः	६८,१३६।
मूलचक्रध्यानफलं	२२।
मूलाधारः	१९।
मूलाम्बुजगह्वरं	१८।
मेरुः	२,४,६।
मोक्षं	७३,७४।
मोचिका	१२६।

य।

यमा दश	१३३।
योगः	८२,९१।
योगज्ञानफलं	९२।
योगस्य गोपनेनानुष्ठानं	६१।
योगभेदः	८२,८३।
योनिमुद्रा	४८।
योनिमुद्रालक्षणं	४८।

र।

राकिणी	२६,१२०।
राकिणीध्यानम	२६।
रामा	१५,९७,१०१।
रुद्रः	२८।

विषयः।	पृष्ठायां। पंक्ती।
रूपातीतः परोविन्दुः	१३३,१३६।
रेतिका	१२६।
रौद्री	१०१।

ल।

लकारादिवर्णः	५९।
लयक्रमः	८७,८८,८९।
ललाटादिवर्णः	६०।
लाकिनी	२९,१२०,१२१।
लाकिनीध्यानम्	२९।
लिङ्गत्रयं	८०।

व।

वरुणवीजं (वं)	२४,२५।
वर्णसंहरणप्रकारः	९।
वह्निकणा	४८।
वह्निवीजं (रं)	२७।
वह्निविन्दुः	१०१।
वह्नि शशिमिहिरमण्डलानि	५१।
वाक्शुद्धिः	५३।
वाणलिङ्गम्	३२,८०,१२१।
वायुमण्डलं	३०।
वायुवीजं (यं)	३१।
वायोः लयस्थानं	५३,५७,१२७।
विकृतिः = प्रतिविम्बता	५६।
विद्या	४२,१२५।

विषयः ।	पृष्ठायां । पंक्तौ ।
विन्दुः	४५,५७,५८,६१,७४,७५, ७६,११८ ।
विन्दुतत्त्वम्	१२५ ।
विन्दुरूपी मकारः	१२५ ।
विमला	१२५ ।
विन्दुसमुद्भवः	५८ ।
विशुद्धः	३६,३७,३८ ।
विष्णुचक्रं	४५ ।
विष्णोः वक्षे पुं विन्दुः	८८ ।
विष्णोः स्थाने प्राणारोपणप्रकारः	५२,६८ ।
विसर्गः	५५,५८,६१,६५,६६,७६ ।
वीजं	५७,५८,५८ ।
वृत्तः कुण्डलिनीशक्तिः	७५ ।
वेदानामादिवीजं	४४,१२४,१२५ ।
वैखरी	२०,२१,१२३ ।
व्यापिका	५८ ।
व्यापिनीशक्तिः	१३१ ।
व्रह्मनाड़ी	८ ।
श ।	
शक्तिः	५७,५८,५८,६८ ।
शक्तिजृम्भिता	५६ ।
शक्तीनां षट्पङ्कजाधिपत्वत्	१३ ।
शङ्खिनी	६,५५,६१,१२८ ।
सर्व्वस्य पीठालयं	३३ ।

विषयः ।	पृष्ठायां । पंक्तौ ।
शब्दब्रह्म	८,१२१ ।
शब्दोत्पादिकाः शक्तयः	८१ ।
शाकिनी	३७,१२२ ।
शाकिनीध्यानं	४०,१२२ ।
शान्तिः	१२५ ।
शान्त्यतीतेश्वरः	१२५ ।
शिवः	४५,७४ ।
शिवगेहम्	११३ ।
शिवपदम्	६८,१२३ ।
शिवस्य पञ्चवक्त्राणि	१०७ ।
शिवस्थानं	६७ ।
शिवाङ्कं	१२७ ।
शून्यं	६१,६२,७४,७५,१२८ ।
शूलाष्टकं	१० ।
श्यामा	२० ।
श्रीवत्सः	२५ ।
ष ।	
षट्कोणम्	३० ।
षट्चक्रश्लोकाध्ययनफलं	८४ ।
षट्पद्मानां चित्रिणीग्रथितत्वम्	११३ ।
षड़ाम्नायः	१०८ ।
षोड़शाधाराः	४५ ।
षोड़शीकला	१३१ ।
स ।	
सकलोपासकानां देवतास्थानं	६७,६८ ।

विषय:	पृष्ठायां । पंक्तौ ।
सगुणाविर्भाव:	२२ ।
सच्चिदानन्द:	७६ ।
सदाशिव:	३८,१२२ ।
सप्तदश कला:	५८ ।
समनापदम्	१३१,१३२,१३३ ।
समनी	५९,१३२ ।
समाधि:	९०,९१ ।
समनोन्मनीगोचरे	१३१ ।
सरस्वती	६ ।
सर्व्वदेवतामय: परं विन्दु:	६८ ।
सर्व्ववर्णात्मकं पत्नं	९ ।
सर्व्वात्मा	६२,६३ ।
सर्व्वेश:	६६ ।
सहस्रदलं	७,५९ ।
सहस्रार:	७०,८५,१२८ ।
सामरस्य चिद्गुणप्रकार	८३,८४,८५ ।
सिराकारं शिवाकारं व	५४ ।
सुप्रभा	१२५
सुषुम्ना	२,७,५ ११०,१११, ११४ ।
सुषुम्नायाः त्रिगुणात्मकत्वम्	४ ।
सूर्य्यमण्डलम्	६१,६५,७० ।

विषय: ।	पृष्ठायां । पंक्तौ ।
सूर्य्यविन्दु:	१०१ ।
सृष्टि:चतुर्व्विधा	१३५ ।
सोऽहं	८६,१३४ ।
स्थूलानां सूक्ष्मे लय:	८९ ।
स्वगुरुशिवरूप:	६५ ।
स्वयम्भू:	१६,८० ।
स्वाधिष्ठानं	१९,२३,२६,११९ ।
ह ।	
हंस:	१२,६२,६३,६५,६६,७३,७४, ७६,७८,११८,११९ ।
हंसपीठ:	६५ ।
हंस: प्रकृतिपुरुषरूप:	१०२ ।
हंसमन्त्रं	७७ ।
हरमुखकुहरं	११४ ।
हलक्ष	७६,९७ ।
हरि:	२५ ।
हरिहरपदं	६७ ।
हस्तिजिह्वा	६ ।
हाकिनी	४२,१२३ ।
हाकिनीध्यानान्तरं	४३ ।
हुतभुक् शिखालयं	१००,१०१ ।
हुङ्कार:	७७ ।

सूचीपत्रं सम्पूर्णम् ।